MSS No. 331 Subject PHILOSOPHY

Name of MSS न्याय मुक्तावली टीका

Author दिनकर भट्ट

Period 1850 Folios 63

Script SANSKRIT Source Prithi Pal Singh

Missing Folios

मंगललक्षणम् ॥ ननु किंनाम मंगलम् विघ्नभिन्नत्वे सति विघ्नध्वंसप्रतिबंधकाभावभिन्नत्वे सति प्रारिप्सितविघ्नध्वंससाधारणकारणत्वं मंगलत्वं
घ्नध्वंसप्रतिबंधकाभावेतिव्याप्तिवारणाय सत्यंतपदद्वयम् वृष्टिविघ्नध्वंससाधारणकारीरीयागेतिव्याप्तिवारणाय प्रारिप्सितेति काला
तिव्याप्तिवारणायासाधारणेति ॥ इति मं॰ लक्षणम् ॥

ॐ श्रीगणेशाय नमः ॥ ॥ श्रीसरस्वत्यै नमः ॥ लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं भारद्वाजकुलांबुधौ विधुमिव श्रीगोरखाख्याद्बुजातं ॥ न
नवद्वसासिद्धांतमुक्तावलीगूढार्थान्तनुते यथामति महादेवः येषां कृते ॥ १ ॥ तत्र तावन्न्यायापरिच्छेदव्याख्यानं चिकीर्षुः श्रीविश्वनाथपंचाननो निर्विघ्नपरिस
माप्त्यर्थं कृतस्येश्वरनिर्देशरूपमंगलस्य शिष्याश्चाप्येवं कुर्युरिति शिष्यशिक्षायै निबंधं कुर्वन्नीश्वरं प्रार्थयते ॥ चूडामणीति ॥ लीलेति ॥ इदं च विशेष्यं नातः समा
प्तत्वदोषः ॥ वस्तुतस्तु विधोः किमिति चूडामणीकरणं किमर्थं वा तत्केवलयीकरणमित्याकांक्षया निराकांक्षा प्रतिपत्तिर्न संभवतीति लीलेत्यादिविशेषणानुक्तो
हेतान्वयबोधाभावान्नायमुक्तदोषः ॥ उक्त्या याकांक्षया विशेषणान्वय एव तत्प्रसरादिति ॥ लीलया तांडवं नृत्यं तत्र पंडितोभिज्ञ इत्यर्थः ॥ अनेन च नृत्यविशिष्टतया
स्य...तिविषयात्प्रार्थितार्थप्रदो भवेत्येवेति सूचितम् ॥ न च लक्षणारहितेन कथं नृत्यं तत्राह ॥ चूडामणीकृतेति ॥ अचूडामणिश्चूडामणिः संपद्यते इति चूडामणीकृतः
चूडामणीकृतो विधुर्येन स तथेत्यर्थः ॥ वलयीकृतेति ॥ अवलयं वलयं संपद्यते इति स तथा ॥ वलयीकृतो वासुकिर्येन स तथेत्यर्थः ॥ शिष्यावधानाय प्रतिजानीते ॥
निजनिर्मितेति ॥ निजेन स्वेन निर्मिता रचिता या कारिकावली ताम् ॥ अति अत्यंतः संक्षेपः शब्दसंक्षेपो यासु ता अतिसंक्षिप्ता हृद्या चिरंतनानां करणादप्रभृती
नामुक्तयो वचांसि वचः प्रतिपाद्यानुक्तयस्ताभिरहं विशदीकरवाणि प्रकटीकरोमीत्यर्थः ॥ ननु लीलावत्यादिप्राचीननिबंधाध्ययनेनैव कारिकावलीप्र
तिपादितार्थबोधसंभवे किमनेन भवत्कृतविशदनिबंधनेनेत्यत उक्तम् अतिसंक्षिप्तेति ॥ तथा च लीलावत्यादिप्राचीननिबंधेषु ग्रंथबाहुल्येन बहुतरदुःखहेतुप्रतिपत्तिकतया ना
बालानां प्रवृत्तिरिति भावः ॥ स्वोक्ते सामस्त्यकर्तृताप्रयुक्तानादरणीयतां निरसितुं चिरंतनेत्युक्तम् ॥ नन्वित्यवधारणे ॥ तथा च कृतकादेवेत्यर्थः ॥ एतेन स्वस्य ग्रंथकरणे
लोभाभावः सूचितः ॥ स्वस्य ग्रंथकरणप्रवृत्तौ निमित्तमाह ॥ राजीवेति ॥ राजीवदयाकृपा तया वशंवदस्तदधीन इत्यर्थः ॥ ननु ग्रंथादौ श्रोतृप्रवृत्तये प्रयोजनादि वक्त
व्यं भवति तस्य चेहानुक्तत्वाद्ये ज्ञानीयुस्तैर्ग्रंथस्य स्यादित्याशंक्य विषयप्रयोजनसंबंधाधिकारिणां सूचयन्नति संक्षिप्तत्वादितद्ग्रंथस्य सकलपदार्थप्रतिपादक
तया कथं बालव्युत्पत्तिरित्याशंकां चैतद्ग्रंथस्य सकलपदार्थप्रतिपादकत्वप्रदर्शनेन परिहरन् यत्करोषि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कु
रुष्व मदर्पणमिति भगवदुक्तेर्मुक्तावलीसमस्तकीयग्रंथं श्रीभगवति वार्पयन् स्वकीयत्वनुहृमयेग्रंथस्य ... स्यनाम मनी निवध्नाति ॥ सद्रव्येति ॥ द्रव्यैः सहिता युक्ता ॥ प्रतिपा
पारकतया गुणैरपि शंकिता युक्ता ॥ सतामस्तेयगुणादीनां पंचानां कर्मणां तापिकावोधिका ॥ सज्जाति रूपं सामान्यं विशेषो नित्यः समवायस्तैर्मिलिता ॥ यद्वा संति सामा
न्यविशेषनित्यमिलितानि यस्यां नित्यमिलितं नित्यसंबंधः ॥ अभावप्रकर्षैः प्रागभावादिभेदेन वेलक्षण्यं तस्योज्वला प्रकाशिका ॥ एषा वृद्धिस्या सिद्धांतमुक्तावली सिद्धं

ग्रंथघटकीभूतवर्णानुकूलकृत्यधिकरणक्षणध्वंसा
नधिकरणतादृशकृतिक्षण इत्यर्थः = ६

सं+

1 A

ताएवमुक्तास्तासामावलीपंक्तिः॥ विश्वानीरायणास्यवक्षसिवक्षःस्थले विन्यस्ता विशेषतोर्पिता॥ कृतिनांपंडितानांमनसोमुदंतोषंचिरंचतनुतां वितनुतां विस्तारयत्वित्यर्थः
ननुयुक्तीनामत्रासत्वात्कथंविद्वेषांसंतोषस्तत्राह॥ सद्युक्तिरिति॥ सत्योयुक्तयोयस्यांसातथा॥ मुक्तावलीसादृश्यंचग्रंथेद्रव्यादिपदार्थवत्तया॥ यथाहिमुक्तावलीसद्
व्यासाध्यतयाद्रव्यवती द्रव्यसाध्येतियावत्॥ नानाविधद्रव्यघटितावा॥ गुणेनसूत्रेण गुंफितानिर्मिता॥ कृतिनांगुणयवतांयानिसम्निसमीचीनानिभगवद्गुणनादिरूपाणि
कर्माणितेषांबोधिका॥ सत्सामान्यंसमीचीनजातिविशेषोमहत्वनिर्मलत्वादिस्ताभ्यांनित्यमनवरतंमिलितासंबद्धा॥ अभावेतेजोभावेंधकारेसतिप्रकर्षेणोज्वलाऽर्थप्रकाशि
केतिद्रव्यादिसकलपदार्थवर्तिनीयायंग्रंथोपीति॥ अत्रचमुक्तावलीत्वोक्त्यानिर्दोषत्वंसूचितम्॥ अत्रद्रव्यादिपदार्थप्रतिपादकतत्सदर्शनेनद्रव्यादयोविषयाउक्ताः॥ प
दार्थतत्त्वावधारणंचप्रयोजनंसूचितम्॥ संबंधश्चशक्तिप्रतिपाद्यप्रतिपादकभावः॥ पदार्थतत्त्वावधारणकामोधिकारी॥ ग्रंथारंभसमयेकृतस्यमंगलस्यतन्निबंधनस्यचवैयर्थ्य
माशंक्यफलंदर्शयति॥ विघ्नविघातायेति॥ प्रारब्धमिष्टस्यग्रंथस्येतिशेषः॥ यद्यप्यत्रघातपदस्योत्पन्निमद्भावपरतयाविपदमनर्थकमितिप्रतिभातितथापिविशिष्टवाचकप
दानांसतिविशिष्टेविशेषणवाचकपदसमवधानेविशेष्यमात्रपरतायाः सकीचकैर्मारुतपूर्णरंध्रैरित्यत्रकीचकावेणवस्तेस्युर्येस्वनंत्यनिलोद्धताइतिकोशान्मारुतपूर्णरंध्रत्वविशिष्ट
वेणुबोधककीचकपदेदृष्टत्वाद्घातपदमभावमात्रपरंद्रष्टव्यम्॥ ननुनिष्फलत्वान्मंगलाचरणमयुक्तम्॥ नचनिष्फलत्वमेवासिद्धंतस्यफलविशेषश्रुत्यत्वहेतुनासाधनादित्य
भिप्रायेणाशंकते॥ नन्विति॥ मंगलस्यकारणत्वाभावेव्यतिरेकव्यभिचारहेतुमाह॥ विनापीति॥ निर्विघ्नपरिसमाप्तीति॥ विघ्नध्वंसरूपकसमाप्तीत्यर्थः॥ नचतत्रजन्मांतरीयमं
गलकल्प्यंनान्वयव्यभिचारइतिवाच्यम्॥ भोगादिनापिनास्तिकादौनिविघ्नताशसंभवेनजन्मांतरीयमंगलसंदेहेनव्यभिचारसंभवात्॥ अत्रकादंबर्यादिग्रन्थेमंगलसत्वेपिसमाप्त्य
दर्शनेनान्वयव्यभिचारोपिदोषोबोध्यः॥ व्यभिचारसंदेहस्यग्राह्यसंशयरूपतयाकारणताग्रहप्रत्ययएवप्रतिबंधकत्वंनत्वनुमितौनेतस्यानुकूलत्वादित्यभिप्रायवान्मंगलंस
माप्तिफलकंसमाप्त्यन्याफलकत्वेसतिसफलत्वादितिपरिशेषानुमानेनमंगलस्यसमाप्तिफलकतांव्यवस्थापयिष्यन्नत्रयमतोविशेष्यासिद्धिनिरासायफलवत्तांसाध
यति॥ अविगीतेति॥ विषयत्वंचज्ञानविषयस्करवेतिप्रसक्तमतआचारेति॥ आचारस्यात्रयद्यपिक्रियैवतथापिविषयत्वस्कृतेःकृतिरेवविवक्षिता॥ तद्विषयत्वंचविधेयतया
बोध्यम्॥ तेनफलेनव्यभिचारः॥ नस्योद्देश्यतयाकृतिविषयत्वात्॥ विधेयतयाकृतिविषयत्वंचचैत्यवंदनादावपीत्यतआह॥ शिष्टेति॥ शिष्टत्वंचफलसाधनतांशेभ्रांतिरहित
त्वंनतुवेदप्रामाण्याभ्युपगंतृत्वंतेनबुद्धमेणादर्शीदौनव्यभिचारः॥ शिष्टाचारविषयत्वंश्येनयागादावप्यस्त्यतोऽविगीतेति॥ अविगीतत्वंचबलवदनिष्टाननुबंधित्वंतेनश्ये
नादौप्रवृत्युपयुक्तबलवदनिष्टाननुबंधीष्टसाधनत्वरूपसाध्याभावेपिनव्यभिचारः॥ सिद्धेनुमिते॥ तत्रमंगले॥ फलजिज्ञासायांविशेषतःफलेजिज्ञासायाम्॥ ननुतर्हिकथं

निष्फले।

तद्देदविशेष्यक
प्रामाण्यप्रकारक
निश्चयकालीनवे
दविशेष्यकाप्रामाण्यप्रकारकनिश्चयप्रतियोगिकयावत्संसर्गाभाववत्वंतेनज
न्मांतरवेदप्रामाण्यनिश्चयवतोबौद्धस्यनेतजन्मनिशिष्टत्वापत्तिः नवावेदप्रा
माण्यनिश्चयस्य ... न्यकालेशिष्टस्याशिष्टत्वापत्तिरितिभावः = २

निष्फलत्वस्य

मंगलस्यकारणत्वाभावे=
व्यभिचारसंदेहस
सफलत्वे

यत्र चेतीति। स्वाव्यवहितोत्तरक्षणावच्छिन्नस्वेतरयावत्कारणसमवहितस्वाधिकरणवृत्तिकार्याभाववत्त्वं तत्कार्ये प्रति तत्कारणस्यान्वयव्यभिचारः कादंबरीकर्तरि मंगलाधिकरणे मंगलाव्यवहितोत्तरक्षणावच्छेदकेन समाप्त्यभा वसत्त्वेऽपि मंगलेतरविघ्नध्वंसरूपसमाप्तिकारणस्य तत्राभावेन मंगलेतरयावत्कारणापि का ... वहितमंगलाधिकरणकादंबरीकर्तृनिरूपितमंगलोत्तरक्षणावच्छिन्नवृत्तिकसमाप्त्यभाववत्त्वं

गंगास्नानादौ = रणसम त्वस्याभा

वैजात्यं चेत्स्वरूपतन्मंगला नाप्यत्वरूपं मंगलान्तरात्व न रूपं वा = ६

व्यापकत्वं च कार्याव्यवहितपूर्व क्षणावच्छिन्नकार्याधिकरणवृत्तिकाभावप्रतियोगितानवच्छेदकधर्मवत्त्वं

नियतपूर्ववर्तित्वं = ३

व्यभिचारज्ञानादेः प्राभावप्रतियोगितावच्छेदकधर्मवत्त्वं व्यभिचारसंदेहस्य तादृशव्यापकताग्रहे न स्वभाव व्याप्तिज्ञानविषयत्वात् व्याप्रतिबंधकत्वेन विशिष्टकारणताग्रहे प्रतिबंधकत्वं तेनाद्रव्यजोपाधिरूपकारणताग्रहे तथा प्रतिबंधकत्वाभावेऽपि तत्रातिरिक्तेत्यर्थः = ३

दि॰ कं॰ टी॰ २

गंगास्नानादीनामदृष्टार्थकत्वेऽत्यंतःसंभवतीति ॥ तथा च तत्रादृष्टासंभवेनादृष्टकल्पनेति भावः ॥ ननु तथापि विश्वजिन्न्यायात्स्वर्ग एवेष्टं कल्प्यतामत आह ॥ उपस्थितत्वादिति ॥ आरब्धे कर्मनिर्विघ्नं समाप्यतामितीच्छया दौ प्रवृत्तपुरुषकामनाविषयत्वेन परिशेषानुमाने प्रवर्त्तमानस्योपस्थितत्वादित्यर्थः ॥ कल्प्यतेऽनुमीयते ॥ अनेन च मंगलस्य समाप्तिहेतुत्वेऽनुमानमेव प्रमाणं न तु शिष्टाचारानुमितश्रुतिरिदानीमानुपूर्वीविशेषनिर्णयाभावेन तस्या अबोधकत्वादिति सूचितम् ॥ व्यापकत्वघटितकारणतायाः प्रतिबंधकज्ञानविषयव्यतिरेकव्यभिचारमुद्धरति ॥ इत्थं चेति ॥ मंगलस्य समाप्तिफलकत्वे चेत्यर्थः ॥ तत्रापि ॥ नास्तिकादिग्रंथेऽपि ॥ न तत् ॥ मंगलं ॥ कल्प्यतेऽनुमीयते कार्यरूपसमाप्तेरिति शेषः ॥ याह्य संदेहपर्यवसन्नस्य दृष्टौकव्यभिचारसंदेहस्य कारणतानुमितावप्रतिबंधकत्वाद्व्यभिचारनिर्णयस्य चाभावादिति भावः ॥ नन्वेवमप्यन्वयव्यभिचारज्ञानं कारणताग्रहविरोधि भविष्यत्येवेत्याशंक्यान्वयव्यभिचारं निरस्यति ॥ यत्र चेति ॥ तत्र कादंबर्यादौ ॥ बलवत्तरत्वं वैजात्यम् ॥ नन्वेवमपि कादंबर्यादौ कृतेन विघ्नध्वंसः स्यादत आह ॥ प्रचुरस्येति ॥ प्रचुरस्येव मंगलस्येत्यर्थः ॥ बलवत्तर ... विघ्ननिवारणे ॥ बलवत्तरादृष्टविघ्ननिवारणे ॥ तेन प्रचुरविघ्नस्यापि संग्रहः ॥ ननु तथापि कादंबर्यादौ विघ्नध्वंसो मा जायतां समाप्तिः परं जायतां मंगलरूपहेतोः सत्त्वादित्याशंक्याह ॥ विघ्नध्वंसस्येति ॥ तथा च स्वजन्यविघ्नध्वंससंबंधेन मंगलाभावान्न समाप्तिरिति भावः ॥ आहुरित्यस्वरस ... सोद्भावनं तद्बीजं तु विघ्नध्वंसद्वारा मंगलस्य हेतुत्वं न संभवति ॥ नास्तिकग्रंथसमाप्तौ व्यभिचारात् ॥ न च स्वजनकसं ... विघ्नध्वंसोत्पत्त्यवच्छेदकतासंबंधेन समाप्तिं प्रति स्वजन्यविघ्नध्वंसावच्छेदकतासंबंधेन मंगलस्य हेतुत्वात्तत्प्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसंबंधेन समाप्तिं प्रत्याश्रयतासंबंधेन मंगलस्य हेतुत्वाद्वा जन्मांतरीयमंगलकल्पनया न व्यभिचार इति वाच्यम् ॥ तथा सति जन्मांतरीयसमाप्तिमुद्दिश्य जन्मांतरे मंगलेक ... रणायतैरतः स्वप्रतियोगिचरमवर्णावच्छेदकतासंबंधेन समाप्तिं प्रति स्वोत्पत्त्यवच्छेदकज्ञातीयतासंबंधेन मंगलहेतुत्वस्य वाच्यतया नास्तिकशरीरे व्यभिचारस्य दुर्वारत्वात् ॥ न च पुत्रकामाधिकरणविरोधः सहकार्यंतरासमवधाने नैहिकपुत्राभावेऽप्यामुष्मिकपुत्ररूपफलस्य तत्र सिद्धांतितत्वादिति वाच्यम् ॥ तत्र पुत्रमात्रकामनाश्रवणात् ॥ इह तु विशिष्टशिष्टाचारानुमितश्रुत्यैहिकसमाप्तेरेव मंगलफलत्वात् ॥ न च स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन मंगलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य मंगलकार्यतावच्छेदकत्वान्न व्यभिचार इति वाच्यम् ॥ कारणस्य कार्यतावच्छेदकत्वानुपगमात् ॥ अत एव काशीमरणान्मुक्तिरिति श्रुत्यंतर्गतपंचम्याः प्रयोजकत्वपर्वाणीग्रंथकृतां संगच्छते ॥ अन्यथा तत्रापि काशीमरणविशिष्टमुक्तिं प्रति काशीमरणे हेतुत्वस्य निर्दुष्टतया तद्योपवर्णनमसंगतमेव स्यात् ॥ अथ तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुत्यात्तत्त्वज्ञानस्य मुक्तिसामान्यं प्रति हेतुत्वं प्रतिपादितं न च काशीमरणस्य हेतुत्वे न संभवति काशीमरणजन्यमुक्तौ तत्त्वज्ञानस्य व्यभिचारात् ॥ अतः काशीमरणस्य न मुक्तिजनकत्वम् ॥ अपि तु तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमेवेति ग्रंथकृतां तात्पर्यं पंचम्याः

काशीमरणस्य प्रयोजकत्ववर्णनम् = २

परत्वो = ३

कारणस्य कार्यतावच्छेदकत्वांगीकारे = २

अन्वयव्यभिचारश्च स्वस्वव्यापारेतरयावत्कारणसमवहितस्वस्वव्यापारोत्तरक्षणावच्छिन्नस्वाधिकरणवृत्तिकार्यानधिकरणत्वकत्वं एतज्ज्ञानस्याव न एतच्च नियतपूर्ववृत्तिताकभिन्नरूपान्यथासिद्धत्वाभाववव्याप्यत्वनाज्ञानविधयाकारणताग्रहप्रतिबंधकत्वमिति भावः = ५

मंगलस्य= नास्तिकशरीरेवाणेपि=२ व्यभिचारे

विघ्नप्रागभाव एव मंगलफलमिति निरीतेन=२ पुनरधरमिश्रास्तन्मतस्यापि व्यवच्छेदः प्रागभावस्यानित्यत्वेन मंगलजन्यत्वाभावादिति ध्येयम्=६ मंगले सप्रवृत्तिः विघ्नध्वंसार्थमेवेति भावः=६

3A

प्रयोजकत्वपरत्वोपवर्णनेन तत्कारणस्य कार्यतानवच्छेदकत्वात्तयोरवर्णनमिति चेदुक्तकारणस्य कार्यतावच्छेदकत्वमस्तु वस्तुतो वीक्षरीत्या मंगलजन्यविघ्नध्वंसाविशिष्टसमाप्तित्वस्य कार्यतावच्छेद
कत्वेन नास्तिकशरीरे व्यभिचारवारणम् ॥ एवमपि भोगादिनाश्यविघ्नध्वंससत्वे कसमाप्तौ प्रानयतनश्ववर्जिताकेन ध्वंसेनैव मंगलस्य लीयसमाप्त्युपपत्तेर्मंगलस्यान्यथासिद्धत्वं दुर्वारमेव ॥ न च व्या विघ्नध्वंसेन=२
पारेणाव्यापारिणो नान्यथासिद्धिरिति वाच्यम् ॥ यत्रैव्यापारिणः प्रमाणबोधितकारणतानिर्वाहाय व्यापारस्य कारणत्वं कल्प्यते ॥ यथा यागस्य स्वर्गहेतुतानिर्वाहाय धर्मस्य तत्र ॥ तत्रैव व्यापा
रेणाव्यापारिणो नान्यथासिद्धिः ॥ अत एव काशीमरणस्य तत्त्वज्ञानेन मुक्तावन्यथासिद्धत्वात् प्रयोजकत्वपरतया श्रुतिसमर्थनं संगच्छते ॥ प्रकृते च प्रतिबंधकाभावस्य कार्यमात्रे हेतुतया मंगल मंगलस्यकारणताप्रसंगे=
कारणतां विनापि रूपतया मंगलस्यान्यथासिद्धत्वं दुष्परिहरमेवेति विघ्नध्वंसस्य द्वारत्वमिच्छतां प्राचां मतेपि विघ्नध्वंसस्य कार्यतावश्यकतया विघ्नो निवर्त्ततामिति कामनया मंगलाचरणे
न च विघ्नध्वंस एव फलमिति वदतां चिंतामणिकृतां मतमाह ॥ न व्याप्त्विति ॥ विघ्नध्वंस एवेत्येवकारेण समाप्तिव्यवच्छेदः ॥ फलं प्रवृत्त्युद्देश्यम् ॥ ननु समाप्तिस्तर्हि किंस्विकी स्यादित्यत आह ॥ समाप्तिस्त्विर उद्देश्यंनामयदर्थीयाप्रवृत्तेतत्स्योद्देश्यम्=६
ति ॥ बुद्धिज्ञानेन प्रतिभा तद्विशेषः स्फूर्त्याख्यः ॥ प्रतिभादी [illegible] त्यादिना विघ्नसंसर्गाभावपरिग्रहः ॥ अनयैव रीत्या कौरीरीस्थलेप्यवग्रहनिवृत्तिरेव फलं वृष्टिस्तु स्वकारणादेवेति ध्येयम् ॥ एवं मं
गलस्य विघ्नध्वंसं प्रति जनकत्वे स्वतःसिद्धविघ्नविरहवतेति ॥ विघ्नात्यंताभाववता ॥ ननु निष्फले प्रवृत्तिरेव कथमत आह ॥ विघ्नशंकयेति ॥ संशयनिश्चयसाधारणविघ्नज्ञानमेव प्रवर्त्तकमि प्रयोजननिश्चयज्ञानस्यावर्त्तकत्वादितिकाकनुरभिप्राय:=
तिभावः ॥ तदाचरणात् ॥ मंगलाचरणात् ॥ ननु विघ्नसंशये मंगलाचरणमेवासिद्धमित्यत आह ॥ तथैवेति ॥ शिष्टाचारादिति ॥ विषयतासंबंधेन मंगल इति शेषः ॥ ननु निर्विघ्नपुरुषानुष्ठितमं
गलस्थले न्वयव्यभिचारेण विघ्नध्वंसं प्रति मंगलस्य कारणता बाधिता ॥ तथा च बाधितार्थबोधकत्वाद्वेदस्याप्रामाण्यमिति मीमांसकमतेः कारणताबोधकत्वमंगीकर्त्तुमाशंकां निरस्यति ॥ न चे
ति ॥ तस्य ॥ निर्विघ्नपुरुषानुष्ठितमंगलस्य ॥ तद्बोधकेति ॥ मंगलविघ्नध्वंसयोः कार्यकारणभावबोधकेत्यर्थः ॥ सति विघ्न इति ॥ तथा चोपदर्शितस्थले प्रतियोगिरूपकारणाभावेन विघ्नध्वंस विघ्न=
स्य कार्यानुदयोपपत्तौ कारणताया अबाधितत्वेन न कारणताबोधकवेदाप्रामाण्यमिति भावः ॥ अत एव ॥ नाशं प्रति प्रतियोगिनः कारणत्वादेव ॥ तद्बोधकवेदाप्रामाण्यमिति ॥ प्रायश्चित्तस्य पापनाशक
त्वबोधकवेदाप्रामाण्यमित्यर्थः ॥ ननु मंगलं न विघ्नध्वंसे कारणं विनायकस्तवपाठादिजन्यविघ्नध्वंसे व्यभिचारात् ॥ विनायकस्तवस्य मंगलत्वेपि तदनुकूलकंठाभिघातरूपस्य तत्पाठस्य मंगलत्वा मंगल+
भावात् ॥ न च पाठकतासंबंधेन विनायकस्तव एव विघ्ननाशकः स च मंगलमेवेति न व्यभिचार इति वाच्यम् ॥ सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठत इत्यादिना तत्पाठस्यापि विघ्ननाशकत्वबोध
नात् ॥ प्रायश्चित्तजन्यविघ्नध्वंसे व्यभिचाराच्चेत्यत आह ॥ मंगलं चेति ॥ स्तवपाठादिरित्यादिना प्रायश्चित्तसंग्रहः ॥ तथा च मंगलस्य स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन मंगलविशिष्टविघ्नध्वंसत्वं
विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकम् ॥ एवं विनायकस्तवपाठादेरुपदर्शितसंबंधेन विनायकस्तवपाठादिविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं कार्यतावच्छेदकमिति न व्यभिचा
र इति भावः ॥ ननु विघ्नध्वंस एव यदि मंगलस्य फलं तदा समाप्तिकामस्य मंगले प्रवृत्तिर्न स्यादतः समाप्तिसाधनविघ्नध्वंससाधनत्वान्मंगले प्रवृत्तिर्व्याख्यातव्येति न संभवति ॥ स्वतःसिद्धविघ्नविरह वैनाहंनमंगलजन्यतावच्छेदकतयासिद्धजातिविरोधः=२

निष्फलत्वापत्तिरिति किमनेन विघ्नध्वंसस्य फलत्वाभावः शंकयेति अयान्वयव्यभिचार उत फलोपधायकत्वाभावः नाद्यः विघ्नध्वंसस्य फलत्वाभ्युपगमेन तदभावेऽप्यापत्तेरयोगात् न द्वितीयः अन्वयव्यभिचारे मंगलस्य विघ्नध्वंससाधनत्वाभावेन तत्प्रयुक्तत्वेऽप्यापत्तेरयोगात् विशिष्टतृतीयेऽविघ्नध्वंसं प्रति कारणत्वं स्वतविघ्नाभावेन तत्सम्पादितमंगलस्य विघ्नध्वंसफलोपधायकतया विघ्नाभावे दोषापत्तेः संभवादिति भावः=८

स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन=२

विनायकस्तवपाठादिना मंगलं न विघ्नध्वंसहेतुर्निर्विघ्नध्वंसाधिकरणवृत्त्यभावप्रतियोगित्वात्=५

विघ्नशंकया शिष्टकृतविषयत्वं मंगले=५

3

दि.क.टी.

स्थलेव्यभिचारेण विघ्नध्वंसस्य समाप्तिसाधनत्वाभावादित्याशंक्याह ॥ कश्चिदिति ॥ प्रतिबंधकेति ॥ संसर्गाभावस्य ॥ संसर्गाभावत्वेन सर्वसंसर्गाभावस्य ॥ तथा च विघ्न[illegible] संसर्गाभावत्वेन हेतुत्वान्न दूर्वोक्त-
व्यभिचार इति भावः ॥ अत्र च तत्र द्विघ्नाभावत्वेन हेतुतानत्वविघ्नाभावकूटत्वेन विघ्नप्रागभावादीनामेकत्रासंभवेन समाप्तिर्न स्यादिति बोध्यम् ॥ यत्र मंगलं विनापि समाप्तिस्तत्र विघ्नध्वंसा-
भाववति समाप्तेर्दर्शनाद्व्यतिरेकव्यभिचार[illegible]शंकां निषेधयति ॥ इत्थं चेति ॥ दुरितध्वंसकल्पनेनेतज्जनकीभूतमंगलकल्पने च गौरवादाह ॥ स्वतः सिद्धेति ॥ यत्र च मंगले सत्यपि न समाप्तिस्तत्र
मंगलाद्विघ्नध्वंसो भवत्येव ॥ समाप्त्यभावस्तु विघ्नभूयस्त्वात्तन्मंगलानंतरोत्पन्नविघ्नाद्वेत्यवधेयम् ॥ अथ समाप्तिविघ्नध्वंसयोरेककालीनत्वनिश्चयोः कथं कार्यकारणभाव इति चेदुच्यते
स्वप्रतियोगिप्रयोजकत्वसंबंधेन चरमवर्णध्वंसरूपसमाप्तिं प्रति विशेषणतासंबंधेन विघ्नसंसर्गाभावत्वेन हेतुत्वमिति ॥ वस्तुतस्तु आहुरित्यनेन सूचितामन्यथासिद्धिं प्रकटयति
कश्चिच्चेति ॥ विघ्नात्यंताभाव एवेत्येवकारेण विघ्नध्वंसस्य तद्द्वारकमंगलस्य च व्यवच्छेदः ॥ समाप्तिसाधनं ॥ समाप्त्यव्यवहितपूर्ववर्तितया निश्चितः ॥ तथा च तेनैव मंगलस्य लीयसमाप्ति-
निर्वाहे मंगलस्य तज्जन्यविघ्नध्वंसस्य चान्यथासिद्धिः ॥ ध्वंसप्रागभा[illegible]वयोरत्यंताभावेन विरोधे मानाभावाद्ध्वंसस्थलेप्यत्यंताभावसत्त्वादिति भावः ॥ न त्वन्योन्याभावभिन्नाभावत्वेनै-
व लाघवाद्धेतुतास्त्वत आह ॥ प्रतिबंधकसंसर्गेति ॥ प्रतिबंधकसत्त्वेपि संबंधांतरावच्छिन्नाभावस्य सत्त्वात्कार्यापत्तिवारणाय तत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वेनैव हेतुत्वं च स्य-
वाच्यत्वेन न ध्वंसस्य हेतुता तस्य संसर्गावच्छिन्नत्वे मानाभावादिति भावः ॥ दुरितध्वंसः ॥ दुरितध्वंससामग्रीप्रयुक्तः ॥ स्वतः सिद्धो दुरि[illegible]तकारणाभावप्रयुक्तः ॥ एतेन विघ्नध्वंसस्य तदत्यंताभा-
वस्य वा समाप्तिहेतुत्वविचारस्याप्रकृततया तद्व्यवस्थापने प्रकृतानुपयोगः ॥ एवं प्रतिबंधकाभावकूटस्य हेतुत्वे प्रागभावध्वंसयोर्युगपदवस्थानासंभवेनैकदाकूटाप्रसिद्धिः ॥
दूर्वोक्तरीत्या तत्तत्संसर्गावच्छिन्नप्रतियोगिताकत्वस्य प्रतिबंधकाभावविशेषणत्वे न ध्वंसप्रागभावयोः संग्रह इति दूषणानि ॥ उक्तरीत्या प्रतिबंधकात्यंताभावस्यैव कार्ये-
मात्रे हेतुत्वादिति ॥ ॥ इति मंगलविचारः ॥ ॥ नूतनेति ॥ नूतनश्चासौ जलधरो मेघस्तस्य रुचिरिव रुचिर्दीप्तिर्यस्य तस्मै ॥ एतेन यथा नूतनजलधरः शीघ्रं वृष्टिप्रदस्तथायमपि
स्वाभिलषितप्रदातेति सूचितम् ॥ नमस्कार्यस्य भगवतः संतुष्टतां सूचयितुमाह ॥ गोपेति ॥ गोपानां वधूट्यो मुग्धस्त्रियस्तासां दुकूलं वस्त्रं तस्य चोराय ॥ तस्मै इति ॥ तच्छब्दः सा-
मान्यतः सकलजनप्रसिद्धत्वसूचनाय ॥ श्रीकृष्णाय नम इत्यनेन भगवतो नमस्कारप्रकारीभूतापकर्षावधित्वमुक्तम् ॥ मानाभावाद्भगवतीत्याशंक्य नैयायिकाभिमतेश्वरसा-
धकानुमानसूचनाय तत्रैव संसारमहीरुहस्य बीजायेत्युक्तम् ॥ संसारस्य महीरुह इति षष्ठीतत्पुरुषभ्रमं व्यावर्तयितुं कर्मधारयमाह ॥ मुक्तावल्यां संसार एवेति ॥ बीजत्वं समवा-
यिकारणत्वं तच्चेश्वरे बाधितमत आह ॥ निमित्तेति ॥ नन्वीश्वरनमस्काररूपमंगलाचरणमयुक्तमीश्वरे मानाभावात् ॥ नहि तत्र प्रत्यक्षं प्रमाणम् ॥ अरूपिद्रव्यत्वेन बाह्यप्रत्यक्षावि-
षयत्वात् ॥ नापि मानसम् ॥ परात्मनः परेण मनसा प्रत्यक्षवारणाय आत्मप्रत्यक्षे प्रतिपरात्मव्यावृत्तविजातीयमनःसंयोगत्वेन हेतुत्वस्यावश्यकवाच्यतया ईश्वरे तस्याभावा-

३

कर्तृजन्यत्वरूपसाध्याभावात् ॥३॥

वं ॥ न च द्यावाभूमी जनयन्नित्यादि श्रुतिरेव प्रमाणम् ॥ श्रुतीनामीश्वरोच्चरितत्वेनैव प्रामाण्यादीश्वरसंदेहे श्रुतिप्रामाण्यस्यापि संदिग्धत्वादत आह ॥ एतेनेति ॥ प्रमाणमनुमानद्वयं प्रमाणां
तर्थांक्षित्यंकुरादिकमपीति ॥ नन्वत्र किं पक्षतावच्छेदकं न तावत्क्षितित्वम् ॥ अंकुरादेरपि क्षितित्वेन पृथक्कृतउपादानवैयर्थ्यात् ॥ किं च क्षितित्वसामानाधिकरण्येन साध्यसिद्धेरुद्दे
श्यत्वे दृष्टांते घटादावंशतः सिद्धसाधनम् ॥ अवच्छेदकावच्छेदेन तथात्वे परमाणौ बाधः ॥ जन्यक्षितित्वस्य पक्षतावच्छेदकत्वे परमते जन्यपदव्यावर्त्याप्रसिद्धिस्तन्मते ऽजन्यक्षि
तेरभावात् ॥ जन्यत्वस्यैव तथात्वसम्भवेन पक्षतावच्छेदककोटौ क्षितित्वस्य व्यर्थत्वाच्च ॥ न च तदपि संभवति ॥ पक्षतावच्छेदकहेत्वोरैक्यप्रसंगादिति चेन्न ॥ स्वरूपसंबंधविशेषरू
पकार्यत्वस्यैव पक्षतावच्छेदकत्वात् ॥ प्रागभावप्रतियोगित्वरूपकार्यत्वस्यैव हेतुत्वेन तयोरैक्याभावात् ॥ साध्यं च स्वोपादानगोचरज्ञानचिकीर्षाकृतिजन्यत्वम् ॥ कार्यमात्रप्र
तिकृतेरेवान्वयव्यतिरेकाभ्यां हेतुत्वेन तज्जनकज्ञानचिकीर्षयोस्तत्रासिद्धत्वेन तत्रितयजन्यत्वरूपसाध्यस्य तत्र बाधात् ॥ दृष्टांते यज्ञसाधारण्यस्य स्वत्वस्याभावेन तद्घटितस्वोपादा
नगोचरेत्यादिसाध्यस्यासंभवात् ॥ कृतित्वावच्छिन्नयोपादानगोचकृतित्वस्य गौरवेण कार्यजनकतानवच्छेदकत्वाच्च ॥ किंतु विशेष्यतासंबंधावच्छिन्नकृतित्वावच्छिन्नकारणतानि
रूपितकार्यत्वं तेनादृष्टद्वारास्मदीयकृतिजन्यत्वस्य पक्षे सत्त्वेपि न सिद्धसाधनम् ॥ यद्यपि कार्यमात्रे कृतित्वेनैवान्वयव्यतिरेकाभ्यां ज्ञानत्वेनेच्छात्वेन च हेतुत्वं स्वीक्रियते तदा
तादृशज्ञानजन्यत्वमिच्छाजन्यत्वं कृतिजन्यत्वं वा साध्यमस्तु ॥ यद्वा कर्तृजन्यत्वमेव साध्यमिति तन्न ॥ कार्यमात्रे कर्तृत्वेन जनकत्वे मानाभावाल्लाघवात्कृतित्वेनैव तत्र हेतुत्वात्
ननु कार्यविशेष्यतासंबंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितजन्यताशालि प्रागभावप्रतियोगित्वादित्यनुमानं फलितम् ॥ तत्र च ध्वंसे पक्षतावच्छेदकजन्यत्वाक्रान्ते विशेष्यता
संबंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितसमवायसंबंधावच्छिन्नजन्यत्वरूपसाध्यस्याभावाद्बाध इति चेन्न ॥ सत्त्वविशिष्टजन्यत्वस्यैव ध्वंसव्यावृत्तस्य पक्षतावच्छेदकत्वोपगमात् ॥
न च हेत्वधिकरणे ध्वंसे उक्तसाध्याभावेन व्यभिचार इति वाच्यम् ॥ सत्त्वविशिष्टस्य हेतौ विशेषणात् ॥ अथैवं रीत्या व्यभिचारवारणेपि ध्वंसस्य कृतिजन्यत्वे मानाभावेन कार्यमात्रस्य कृति
जन्यत्वप्रवादो व्याहन्येतेति चेन्न ॥ तादृशप्रवादस्य निर्युक्तिकत्वेनाश्रद्धेयत्वात् ॥ यद्वा जन्यत्वमात्रं ध्वंससाधारणमेव पक्षतावच्छेदकं कृतिजन्यत्वमात्रं साध्यम् ॥ एवं च हेतावपि सत्त्वविशिष्टं नो
पादेयम् प्रयोजनाभावात् ॥ एवं च ध्वंसेपीश्वरीयकृतिजन्यत्वस्य निराबाधतया कार्यमात्रे कृतिजन्यत्वप्रवादोप्युपपद्यत इति ॥ न च कृतिजन्यत्वमात्रस्य साध्यत्वे ऽदृष्टद्वारा हविरादिगोच
रास्मदीयकृतिजन्यत्वमादाय सिद्धसाधनमिति वाच्यम् ॥ अदृष्टाद्वारकेन कृतिजन्यतया विशेषणीयत्वादिति दिक् ॥ एतादृशानुमितौ लाघवसहकारेण ज्ञानेच्छाकृतिषु च नित्यत्व
मेकत्वं च भासत इति नित्यैकत्वसिद्धिः ॥ अथेश्वरज्ञानादौ कीदृशमेकत्वमनुमित्या विषयीक्रियते ॥ न तावत्संख्यारूपं गुणे गुणानंगीकारात् ॥ न च नित्यज्ञानवन्निष्ठभेदप्रतियोगितानवच्छे
दकत्वरूपमेकत्वं तद्विषय इति वाच्यम् ॥ ईदृशैकत्वस्य नित्यज्ञानानुमितेः प्रागनुपस्थितत्वेन तादृशानुमितौ भानासंभवादिति चेदत्र केचित् ॥ सामानाधिकरण्यसंबंधेनैव ज्ञानादावा

ईश्वर

श्रयगतमेकत्वमनुमितौ भासते॥ यद्वा द्वित्वसमानाधिकरणत्वरूपमेकत्वं तु द्विषयः॥ न च जीवेश्वरगतसामानाधिकरण्यस्येश्वरज्ञानादौ सत्वाद्बाध इति वाच्यम्॥ दुःखवद्वृत्तित्वेन हि त्वस्य विशेषणीयत्वात्॥ न चैवमपि घटेश्वरगतद्वित्वसामानाधिकरण्यस्य तत्र सत्वाद्बाध इति वाच्यम्॥ आत्मानात्मवृत्तिभिन्नत्वेनापि द्वित्वस्य विशेषणीयत्वादित्याहुस्तन्त्र॥ ई श्वरे ज्ञानद्वयांगीकारेप्येतादृशैकत्वभाननिर्वाहेणेष्टसिद्धेः॥ वस्तुतस्तु स्वाधिकरणावृत्तिस्वभिन्नज्ञानकत्वमेवैकत्वम्॥ एवमीश्वरे स्वाकृत्योरपि द्रष्टव्यम्॥ एवं च तादृशा नानाविसिद्धौ न त्रगुणत्वेन हेतुना द्रव्याश्रितत्वे साधनीये द्रव्यांतरस्य बाधादीश्वरसिद्धिरिति द्रष्टव्यम्॥ अप्रयोजकत्वादिति॥ अनुकूलतर्काभावादिति भावः॥ इदमुपलक्षणम्॥ शरीरा जन्यत्वहेतौ शरीररूपविशेषणस्यासिद्धिवारकस्यापि व्यभिचारावारकत्वेन व्यर्थतया तद्विशेषणावच्छेदेन व्याप्तिग्रहासंभवेन व्याप्यत्वासिद्धेश्चेत्यपि द्रष्टव्यम्॥ न च व्यर्थविशे षणत्वस्याधिकोन्नयाविग्रहस्थानत्वे पितज्ज्ञानस्य व्याप्तिप्रतिबंधकत्वे मानाभाव इति वाच्यम्॥ तथापि गुरुधर्मस्यानवच्छेदकतया साध्यसंबंधितावच्छेदकरूपव्याप्तेस्तत्राभावेन व्याप्यत्वासिद्धेर्दुर्वारत्वादिति॥ तदुक्तमाचार्यैरेकामसिद्धिं परिहरतो द्वितीयापत्तेरिति॥ कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवेति॥ न चान्वयव्यतिरेकाभ्यां घटत्वाद्यवच्छिन्नं प्रति कुला लादिकृतित्वेनैव हेतुत्वादेतादृशकार्यकारणभावे मानाभाव इति वाच्यम्॥ घटत्वपटत्वादिभेदेनानंतकार्यकारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्व कल्पनस्यैवोचितत्वात्॥ यद्विशेषयोरिति न्यायेन कार्यत्वकृतित्वाभ्यां सामान्यकार्यकारणभावस्यावश्यकत्वात्॥ न च तादृशन्यायो निष्प्रमाणक इति वाच्यम्॥ कार्यत्वावच्छि न्नाभावे तत्कृत्यभावकूटस्य प्रयोजकत्वकल्पने गौरवात्॥ कृतित्वावच्छिन्नाभावस्यैकस्य प्रयोजकत्वे लाघवादिति॥ केचित्तु सामान्यकार्यत्वं कृतेः कार्यतावच्छेदकं तथापि घटत्वाद्यवच्छिन्नं प्रति कृतेः कारणतया संयोगाद्यकालीनं घटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वे साधनीये जीवानां बाधादीश्वरसिद्धिरित्याहुः॥ दीधितिकृतस्तु का र्यत्वावच्छिन्नं प्रति कृतेर्हेतुत्वाभावेपि घटत्वाद्यवच्छिन्नं प्रति कृतेर्हेतुतया खंडघटोत्पत्तेः पूर्वं चेष्टानुरोधेनेश्वरस्य नित्यशरीरकृतेरावश्यकतया तद्द्वारा प्रयत्नेनेश्वरसिद्धिमाहुः॥ न चैवरीत्या घटादिकुलालादिचेष्टयोरन्वयव्यतिरेकाभ्यां कार्यत्वाद्यवच्छिन्नं प्रति चेष्टात्वादिना हेतुत्वादंकुरादुत्पत्तेः पूर्वं चेष्टानुरोधेनेश्वरस्य नित्यशरीरमपि सिद्ध्येदिति चेन्न तादृशान्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति क्रियात्वेनैव हेतुत्वात्तत्र चेष्टात्वेन हेतुत्वे मानाभावात्॥ आचार्यमतानुयायिनस्तु चेष्टात्वेन हेतुत्वमस्तु च तदनुरोधेनेश्व रस्य नित्यशरीरं तथापि नेश्वरस्यातिरिक्तशरीरसिद्धिः॥ परमाणूनामेव तच्छरीरत्वोपगमात्॥ एवं चेश्वरकृतिजन्यचेष्टावद्भिः परमाणुशरीरैरेव तत्तत्कार्याणामुत्पत्तेः परमाणु क्रियायां चेष्टात्वरूपवैजात्यांगीकारात् शरीरलक्षणोक्तत्वाव्यापित्वस्यापि चेष्टाचतुःपरमाणूनां शरीरत्वानुपपत्तिः॥ न च नानापरमाणूनां शरीरत्वकल्पने गौरवात् लाघवेनातिरि क्तशरीरसिद्धिरिति वाच्यम्॥ तच्छरीरस्य महत्त्वे ऽन्तःपातस्य पाषाणादौ प्रवेशासंभवेन पाषाणांतर्वर्तिभेकशरीरोत्पादकत्वानुपपत्तेः॥ अणुत्वे च तद्रूपस्य कार्यत्वोत्पादकत्वानुपपत्ते

4A

रित्याह रित्यलं पक्षे वेति ॥ यत्तु सर्वोक्तस्थापनानुमाने शरीरजन्यत्वमुपाधिस्तस्य घटादौ साध्यव्यापकत्वात् ॥ अंकुरादौ साधनाव्यापकत्वाच्च ॥ न चांकुरादौ सकर्तृकत्वरूपसाध्यसंदेहेनो-
पाधेः साध्यव्यापकत्वसंशयात्सोपाधित्वनिश्चय इति वाच्यम् ॥ तथापि संदिग्धोपाधित्वस्य दुर्वारत्वात् ॥ न चेदृशोपाधिसंदेहाहितो व्यभिचारसंदेहः पक्षीयव्यभिचारसंदेहः स च न प्रतिबंध- एवा
क इति वाच्यम् ॥ पक्षेतरस्मिन्योर्व्यभिचारसंशयस्यापि प्रतिबंधकत्वात् ॥ अत एवानुकूलतर्कविरहदशायां पक्षेतरत्वे संदिग्धोपाधिरित्यभिधानं ग्रंथकृतां संगच्छते इति तन्न ॥ कार्यत्वे
न कृतित्वेन कार्ये कारणाभावरूपस्यानुकूलतर्कस्य सत्वेन कार्यत्वरूपहेतोः साध्यव्याप्यत्वनिश्चयेन साध्यव्याप्यव्यापकत्वेनोपाधेः साध्याव्यापकत्वनिश्चयादिति ॥ एवं चोक्तानुमा-
नेनेश्वरसिद्धौ तदुच्चरितत्वेन वेदस्य प्रामाण्यनिश्चयाद्वेदोपीश्वरे प्रमाणमित्याह ॥ धाता भूमीइति ॥ इत्यादय इत्यादिना ईश्वरमुपासीत ॥ यः सर्वज्ञः सर्ववित् ॥ यस्य ज्ञानमयं तपः सोका-
मयत इत्यादीनां परिग्रहः ॥ कार्यपक्षकानुमानं चोपलक्षणम् ॥ सर्गाद्यकालीनद्व्यणुककर्मप्रयोजकं कर्म प्रयत्नजन्यं कर्मत्वात् ॥ गुरुत्ववतां पतनाभावः पतनप्रतिबंधकप्रयत्नप्रयुक्तः धृतित्वा-
त् ॥ ब्रह्माण्डनाशः प्रयत्नजन्यः नाशत्वात् ॥ घटादिव्यवहाराः स्वतंत्रपुरुषप्रयोज्याः व्यवहारत्वात् ॥ आधुनिकैर्लिप्यादिवत् ॥ वेदजन्या प्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या शाब्दप्रमात्वात् ॥ कल्पित+
वेदाः संसारिपुरुषप्रणीताः वेदत्वात् ॥ वेदः पौरुषेयो वाक्यत्वात् ॥ द्व्यणुकपरिमाणजनिका संख्यापेक्षाबुद्धिजन्या ॥ एकत्वान्यसंख्यात्वात् ॥ इत्यनुमानांतराण्यपि साक्षात्परंपरयेश्वरसाधकानि
बोध्यानीति ॥ तदुक्तं कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः ॥ वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्यय इति ॥ आयोजनं कर्म पद्यते गम्यते अनेनेति पदं व्यवहार इति संक्षेपः ॥ १ ॥ मूले शिष्य-
बुद्धिसाधनाय प्रतिजानीते ॥ द्रव्यं गुणा इति ॥ निरूप्यंते इति शेषः ॥ संयोगादेर्द्रव्याकर्मणोरतिरिक्तत्वं नास्तीति भूषणमतं निराकर्तुं तथेत्युक्तम् ॥ यथा गुणाः पृथक्पदार्थस्तथा कर्मापीत्यर्थः ॥ अभा-
वोधिकरणात्मक एवेति प्राभाकरमतं दूषयितुं पुनस्तथेत्युक्तम् ॥ युक्तिरग्रे वक्ष्यते ॥ यद्यपि विभागवाक्यस्य न्यूनाधिकसंख्याव्यवच्छेदकतयैव सप्तसंख्यालब्धा तथापि सप्तग्रहणं स्पष्टार्थम् ॥ न
न्वन्ये पदार्थाः कुतो नोक्ता इत्यत आह ॥ कीर्तिता इति ॥ तथा चैतेभ्योन्ये पदार्था न संत्येव कणादप्रभृतिभिरनुक्तत्वादिति भावः ॥ नन्वितरेषु ग्रंथेषु षड्भावपदार्थाः सप्तमस्त्वभाव इति निरूपितं त-
थैवात्र कुतो न निरूपितमित्याशंक्याह ॥ मुक्तावल्यां सप्तमस्येति ॥ अत्र समवायैकार्थसमवायान्यतरसंबंधेन सत्तावच्छिन्नभावत्वं तदभावोऽभावत्वम् [illegible] प्राप्तमर्थो-
प्राप्तम् ॥ तेन प्राप्तत्वेन ॥ पृथगुपन्यास इति ॥ भावत्वेनोपन्यास इत्यर्थः ॥ तेषामिति शेषः ॥ नन्वन्येपि पदार्थाः कथं न संति ॥ न्यायग्रंथे षोडशपदार्थनिरूपणादित्याशंक्य नैयायिकानामपि मते
सप्तपदार्था इत्यविरुद्धम् ॥ षोडशपदार्थानां सप्तपदार्थेष्वेवांतर्भूतत्वादित्याह ॥ एते चेति ॥ उक्तार्थे भाष्यसम्मतिमाह ॥ प्रतिपादितं चेति ॥ एवमेवेति ॥ द्रव्यगुणकर्मसामान्यविशेषसमवायाभा-
वाः सप्तैव पदार्थाः षोडशानामत्रैवांतर्भावादिति प्रतिपादितमित्यर्थः ॥ कथमंतर्भाव इति चेदित्थम् ॥ प्रमाणमध्ये इंद्रियादेर्द्रव्ये ॥ व्याप्तिज्ञानादेर्गुणे ॥ प्रमेयमध्ये आत्मशरीरेंद्रियस्वरूपस्य द्रव्ये
बुद्धेर्गुणे अर्थस्य गंधरसरूपस्पर्शशब्दस्वरूपस्य गुणे ॥ मनसो द्रव्ये ॥ प्रवृत्तेर्गुणे ॥ दोषाणामिच्छाद्वेषमिथ्याज्ञानस्वरूपाणां रागद्वेषमोहपदप्रतिपाद्यानां गुणे ॥ प्रेत्यभावस्य मरणाभावो जननमितिव्युत्प-

5

न्या॰सु॰टी॰ ५

यागादिसाधन= शरीर१

स्यामरणोत्तरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमित्तं चरमप्राणसंयोगध्वंसो मरणम्॥ आद्यशरीरप्राणसंयोगो जन्म॥ तथा च मरणोत्तरतादृशसंयोगरूपस्य तस्य गुणो॥ सुखदुःख
संवेदनरूपस्य मुख्यफलस्य गुणो॥ गौणमुख्यसाधारणजन्ममात्रस्वरूपफलस्यापि द्रव्यादिषु॥ पीडालक्षणस्य दुःखस्य गुणो न भावः॥ अपवर्गस्त्वात्यन्तिकी दुःखनिवृत्तिः
दुःखानि शरीरं षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेत्येकविंशतिः॥ तत्र दुःखत्वजातिशून्ये शरीरादौ दुःखसंबंधितया गौणं दुःखत्वं स्वर्गादिसुखस्यापि
तन्नाशज्ञानेन दुःखसंबंधित्वमव्याहतमेव॥ न चैकविंशतिदुःखान्तर्गतयोर्मनःश्रवणयोर्नित्यत्वात्कथं नाश इति वाच्यम्॥ यद्रूपविशिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुतया
नाशात्तद्रूप= दुःखत्वं तद्रूपस्य कर्णशष्कुल्या नाशेनैव विशिष्टश्रवणेन्द्रियरूपदुःखनाशात्॥ एवमात्ममनःसंयोगरूपव्यापारविशिष्टस्यैव मनसो ज्ञानद्वारा दुःखरूपतया व्यापारनाशेन त व्यापार=
द्विशिष्टमनोदुःखरूपनाशसंभवादिति॥ दुःखनिवृत्तावात्यन्तिकत्वं च स्वसमानाधिकरणदुःखासमानकालीनत्वम्॥ नन्वेतादृशदुःखध्वंसस्य मुक्तित्वे कथं तत्त्वज्ञानसाध्यता
दुःखध्वंससमा= तस्येति चेदित्थम्॥ तत्त्वज्ञानेन मिथ्याज्ञानजन्यवासनानाशः॥ वासनानाशे च दोषस्य वासनाविशिष्टरागादेरभावः॥ विशेषणाभावे विशिष्टाभावात्॥ तादृशरागरूपहेत्व वासनाविशिष्ट=
प्रवृत्त्यनुत्पादे= भावे च प्रवृत्तेर्धर्माधर्मरूपाया अभावोऽनुत्पत्तिः॥ तदनुत्पादे प्रारब्धकर्माधीनदेहान्यदेहसंबंधरूपजननाभावः॥ भोगतत्त्वज्ञानाभ्यां प्रारब्धतद्भिन्नकर्मनिवृत्तिरिति जन्मा
भावे दुःखानुत्पादः॥ तथा च स्वसमानाधिकरणदुःखासमानकालीनत्वरूपविशेषणांशे तत्त्वज्ञानस्य प्रयोजकत्वान्मुक्तेस्तत्त्वज्ञानसाध्यत्वम्॥ तथा च सूत्रम्॥ दुःख
जन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः॥ अस्यार्थः॥ पठितेषु जन्मादिषु मध्ये उत्तरोत्तरेषामपाये तदनन्तराभावाद्व्यवहितपूर्वाभावात्॥ तथा च तत्त्व
ज्ञानेन मिथ्याज्ञानस्य नाशः॥ तेन दोषाणां नाशः॥ तेन प्रवृत्तेरनुत्पादः॥ तेन जन्मानुत्पादः॥ तेन दुःखानुत्पाद इति स्वीकृत एवार्थः पर्यवसितः॥ एकविंशतिदुःखनाशस्य कारणसाध्यो
न तत्र तत्त्वज्ञानस्य प्रयोजकत्वे निर्वहति॥ न च यावद्योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्त्तिगुणनाशकारणत्वात्स्वोत्तरोत्पन्नगुणेनैव दुःखध्वंसरूपमुक्तिसंभवेन तत्त्वज्ञानापेक्षेति दुःखप तत्त्व+
दं दुःखसाधनदुरितपरतया व्याख्येयम्॥ दुरितस्य च योग्यगुणत्वाभावान्न स्वोत्तरवर्त्तिगुणनाश्यता॥ तेनाशेषरूपमुक्तेस्तत्त्वज्ञानसाध्यत्वमेवेत्याहुः॥ तथा चैतादृशापवर्गस्याभावे संशयस्य दुरितध्वंसरूप=
ज्ञाने= गुणो साध्यतया इच्छाविषयरूपस्य प्रयोजनस्य यथायथं द्रव्यादिषु॥ साध्यसाधनोभयवत्ता निश्चयविषयरूपस्य दृष्टान्तस्य यथायथं द्रव्यादिषु॥ तन्त्रशास्त्रसिद्धार्थरूपस्य सिद्धान्तस्य द्रव्यादिषु॥
शब्दस्वरूपप्रतिज्ञाद्यन्यतमरूपाणामवयवानां गुणो॥ व्याप्यारोपेण व्यापकारोपस्य तर्कस्य गुणो॥ निर्णयस्य गुणो॥ तत्त्वबुभुत्सोः कथारूपस्य वादस्य गुणो॥ विजिगीषुकथारूपस्य जल्पस्य गुणो॥
स्वपक्षस्थापनहीनकथारूपवितण्डाया गुणो॥ अनुमितितत्करणज्ञानान्यतरप्रतिबंधकज्ञानविषयरूपाणां हेत्वाभासानां यथायथं द्रव्यादिषु॥ अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरं प
रिकल्प्य दूषणाभिधानरूपस्य छलस्य गुणो॥ असदुत्तररूपजातेर्गुणो॥ पराजयहेतुस्वरूपनिग्रहस्थानानां यथायथं द्रव्यादिषु वृत्तिरिति भावः॥ निग्रहस्थानानि प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः

5 A

प्रतिज्ञासंन्यासो हेत्वंतरमर्थांतरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं नि-
रनुयोज्यानुयोगोपसिद्धांतो हेत्वाभासाश्च ॥ अत्र चकारो नुक्तसमुच्चयार्थः ॥ तेन दृष्टांते साधनवैकल्यादीनां परिग्रहः ॥ तत्र विशिष्य प्रतिज्ञातस्य पक्षादेः परित्यागरूप-
प्रतिज्ञाहानेरभावे ॥ परोक्तदोषोद्दिधीर्षया हेतौ नुक्तविशेषणविशिष्टपरतया प्रतिज्ञातार्थकथनरूपस्य प्रतिज्ञांतरस्य गुणे ॥ स्वोक्तसाध्यादिविरुद्धहेत्वादिकथनरूपप्रतिज्ञावि-
रोधस्य गुणे ॥ स्वोक्तसाध्यादेः परेण दूषणे कृते तत्साध्यापलापरूपप्रतिज्ञासंन्यासस्याभावे ॥ परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकवि-
शिष्टकथनरूपहेत्वंतरस्य गुणे ॥ प्रकृतानाकांक्षिताभिधानरूपार्थांतरस्य गुणे ॥ अवाचकपदप्रयोगरूपनिरर्थकस्य गुणे ॥ परिषत्प्रतिवादिबोधानुकूलोपस्थित्यजनकवा-
चकवाक्यप्रयोगरूपाविज्ञातार्थस्य गुणे ॥ अभिमतवाक्यार्थबोधानुकूलाकांक्षाद्यन्यपदरूपस्यापार्थकस्य गुणे ॥ समयनिबंधवि[illegible]कथीभूतकथाक्रमवि-
न्यूनस्य
[illegible]परीतक्रमेणाभिधानरूपस्याप्राप्तकालस्य गुणे ॥ यत्किंचिदवयवशून्यावयवाभिधानरूपस्य गुणे ॥ अधिकहेत्वाद्यभिधानरूपस्याधिकस्य गुणे ॥ पुनरभिधानरूप-
स्य पुनरुक्तस्य गुणे ॥ परिषदा त्रिरभिहितस्याप्रत्युच्चारणरूपस्याननुभाषणस्याभावे ॥ परिषदा विज्ञातार्थं वादित्रिरभिहितस्याप्यविज्ञानरूपस्याज्ञानस्याभावे ॥ उत्तरार्हं स
परोक्तं बुद्ध्वाप्युत्तरस्याप्रतिपत्तिरूपाया अप्रतिभाया अभावे ॥ असंभवत्कालांतरककार्यव्यासंगमुद्भाव्य कथाविच्छेदरूपस्य विक्षेपणस्याभावे ॥ स्वपक्षे दोषमनुद्धृत्य परप-
क्षे दोषाभिधानरूपमतानुज्ञाया गुणे ॥ निग्रहस्थानप्राप्तवतो निग्रहस्थानानुद्भावनरूपस्य पर्यनुयोज्योपेक्षणस्याभावे ॥ निग्रहस्थानानवसरे तन्निग्रहस्थानाभिधान-
रूपस्य निरनुयोज्यानुयोगस्य गुणे ॥ कथायां स्वीकृतसिद्धांतत्यागरूपस्यापसिद्धांतस्याभावे ॥ हेत्वाभासानां पूर्वोक्तलक्षणानां द्रव्यादिष्वनभाव इति ॥ इत्यंतर्भाव
अविप्रणीतत्वं=
पदार्थेषु ॥ भाष्यस्यार्थे[illegible]त्वमाणं क्वमणिकृतां संमतिमाह ॥ अत एवेति ॥ मण्यादिसमवधाने सति वह्निना दाहो न्यत्र वारणाय मण्यादेः कारणविघटकत्वरूपाप्रति-
प्रतिबंधकता=
बंधकताया व्यासीयवह्निनिष्ठदाहानुकूलशक्तिरूपकारणविघटकतयैव निर्वहतीति मण्यादिप्रतिबंधकत्वान्यथानुपपत्त्या सिद्धायाः शक्तेः प[illegible]ज्ञावेषनं नु[illegible]त्वा-
दतिरिक्तत्वमिति यदार्थाः सप्तकीर्तिताः इति मूलमयुक्तमित्यभिप्रायेण प्रा[illegible]भाकरः शंकते ॥ नन्विति ॥ अतिरिक्तेति ॥ सप्तपदार्थातिरिक्तेत्यर्थः ॥ अतिरिक्तपदार्थं नामेव
व्यवस्थापयति ॥ न ग्राहीत्यादिना ॥ मण्यादीत्यादिना मंत्रोषध्यादिपरिग्रहः ॥ समवहितेन ॥ समीपवर्तिना ॥ न तु वह्निरूपकारणाभावादेव न दाह इति न मण्यादेः प्रतिबंध-
कत्वमतः ॥ समवहितेन वह्निनेति ॥ दाह[illegible] रूपांतरेणान्यथासिद्धिः ॥ एवं[illegible] रूपपराहतिर्वा ॥ मण्याद्यतिरिक्तप्रतिबंधकत्वं खंडयति ॥ न चान्येनेति ॥ मण्यादिसमवधानशून्येनेत्यर्थः
न च वह्नौ यदि दाहानुकूला शक्तिस्तदा मण्यादिसत्वेऽपि कुतो न दाहस्तत्राह ॥ न चेति ॥ स्वीकृत्य युक्त्या शक्तिसिद्धावित्यर्थः ॥ दाहानुकूलेति ॥ अत्र च दाहानुकूलत्वं कारणत्वं
दाहकारणत्वं दाहानुकूलत्वं वा दाहकारणतावच्छेदकत्वं=१

च्छेदकसाधारणं ॥ तेन शक्तेः कारणतावच्छेदकत्वेपि न क्षतिः ॥ नश्यत इत्यस्य इति कल्प्यत इत्यनेनान्वयः ॥ तथा च वह्निनिष्ठशक्तित्वावच्छिन्नं प्रति मणित्वेन नाशकत्वस्वीकारेणाम
ण्यादिसत्त्वदशायां शक्तेरभावादेव न दाह इति भावः ॥ ननु मण्यादेर्यदि शक्तेर्नाशकत्वं तदा सत्युत्तेजके विशिष्टे मण्यादावपसारिते वा दाहानापत्तिरित्यत आह ॥ उत्तेजके ने
ति मण्याद्यपसारणे न चेत्यत्र चकारो वाकारार्थो ॥ न च दाहं प्रति मण्यभावत्वेन हेतुत्वकल्पनान्न मणिसमवधानकाले दाहापत्तिरिति वाच्यम् ॥ मण्यभावत्वेन रूपेण स्वतंत्रहेतु
त्वकल्पने गौरवात् ॥ विलक्षणशक्तिमत्त्वेनैव वह्नेः कारणत्वकल्पनस्यैवोचितत्वादित्यभिमानात् ॥ नन्वेवं शक्तिसिद्धावपि तस्या अतिरिक्तत्वासिद्धिरिति चेन्न ॥ उक्तपदार्थेष्वनं
तर्भूतत्वात् ॥ तथा हि ॥ न तावद्द्रव्यात्मिका शक्तिः ॥ गुणादिवृत्तित्वात् ॥ अत एव न गुणात्मिका कर्मात्मिका वा ॥ न च सामान्याद्यन्यतमरूपा ॥ उत्पत्तिमत्त्वे सति विनाशित्वादिति ॥
इति शक्तिपक्षः ॥ एवमतिरिक्तां शक्तिं प्रसाध्य सादृश्यस्याप्यतिरिक्तपदार्थतां व्यवस्थापयति ॥ एवमित्यादिना ॥ अतिरिक्तेति ॥ उक्तसप्तपदार्थातिरिक्तेत्यर्थः ॥ षड्भावानंतर्भू
तत्वे सत्यभावानंतर्भूतत्वादिति हेतुः पूरणीयः ॥ तत्र सत्यंतासिद्धिं निरस्यति ॥ तद्धीति ॥ न तत्सादृश्यम् ॥ द्रव्येतौ ॥ सामान्येपीति ॥ सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादित्यर्थः ॥
तेन सामान्यत्वेन व्यभिचारः ॥ व्यतिरिक्तत्वे सतीति विशेषणान्न प्रमेयत्वादौ व्यभिचारः ॥ भावत्वे च द्रव्यादिषट्कान्यतमत्वरूपे हेतुमति साध्यस्य सत्त्वान्न व्यभिचार इति ॥ यद्येति ॥ तद्भिन्नभेदः=
यदि सादृश्यं द्रव्यादावंतर्भूतं तदा द्रव्यादेः सामान्यावृत्तित्वेन यथा गोत्वं तथाश्वत्वमित्यबाधितप्रतीतिर्न स्यादित्यर्थः ॥ अभावेंतर्भावमाशंक्य निराचष्टे ॥ नापीति ॥ यद्यप्य
तिरिक्तो भावमनंगीकुर्वतः प्राभाकरस्य मतेऽभावेंतर्भावचिंतासंभवति तथापि परमतमभ्युपेत्येदं निराकृतमिति भावः ॥ सत्त्वेन ॥ भावत्वेन ॥ प्रतीयमानत्वात् ॥ प्रमीयमाणत्वात्
इति सादृश्यपदार्थः ॥ मणिसमवधानकालीनवह्निना दाहवारणाय प्राभाकरेण साधितां शक्तिं दूषयति ॥ मण्याद्यभावेति ॥ अतिरिक्तशक्तिकल्पनां शक्तौ नाश्यनाशक
भावकल्पनां चापेक्ष्य लाघवाद्दाहत्वावच्छिन्नं प्रति मण्यभावत्वादिनैव हेतुताकल्पनमुचितमिति भावः ॥ दाहादिकमित्यादिपदेन वह्निसंग्रहः ॥ मणिसत्त्वे वह्नेरप्यनुत्पत्तेः ॥
तथा च मणिरूपप्रतिबंधकसद्भावान्न दाहवह्नी इति भावः ॥ ननु यदा कदाचिन्मण्यभावविशिष्टदाहे दाहापत्तिः ॥ कारणतावच्छेदकावच्छिन्नकारणसत्त्वस्यैव नियामकत्वा कार्योत्पत्ति+
न्मण्यभावविशिष्टवह्नित्व वह्निविशिष्टमण्यभावत्वं वा कारणतावच्छेदकमित्यत्र विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुभूतकार्यकारणभा
वद्वयापत्तिरित्यत आह ॥ मण्याद्यभावादिरिति ॥ तथा च प्रतिबंधकत्वेन कार्यानुकूलधर्मविघटकत्वम् ॥ बाधज्ञानस्यानुमितिप्रतिबंधकभावापत्तेः ॥ किंतु कारणीभूता त्वा+
भावप्रतियोगित्वम् ॥ तच्च मण्यभावस्य हेतुत्व एवोपपद्यते ॥ न त्वतिरिक्तशक्तिसत्त्व इति भावः ॥ ननु प्रतिबंधकत्वस्येदृशत्वे कारणीभूतवह्निरूपाभावप्रतियोगित्वस्याभा वह्न्यभावाभावरूप=
वेतिव्याप्तिः ॥ स्वप्रागभावप्रतियोगिनि घटादौ चेति चेन्न ॥ तादात्म्यातिरिक्तसंबंधावच्छिन्ना या कारणता तदाश्रयीभूतो यो भावभिन्नोऽत्यंताभावस्तत्प्रतियोगित्वस्यैव ६

घटादि=

वह्न्यभावाभावस्य वह्निस्वरू
पत्वेन भावभिन्नत्वाभावात्=

उत्तेजकरूपकारणाम्... =५

पाकज शक्तिध्वंसयोः प्रतियोगि
तासंबंधेन कारणत्वात् =३

संयोगाभावस्याव्याप्यवृत्तित्वात् =७

6A =१

विवक्षितत्वात् कारणताविशेषोपादानाच्च स्वात्यंताभावप्रत्यक्षे स्वस्य प्रतिबंधकत्वापत्तिः परास्ता ॥ विषयस्य तादात्म्यसंबंधेनैव प्रत्यक्षे हेतुत्वात् ॥ ननु वह्निमण्यभावयोर्द्वयोर्हेतुत्वापेक्ष
यातिरिक्तशक्तेरेकस्या एव हेतुता युक्ता लाघवादित्यत आह ॥ अनेनैवेति ॥ दाहादिकं प्रति मण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः ॥ सामंजस्ये ॥ मणिसमवधाने दाहवारणे ॥ प्रा
गभावे मानाभावादाह ॥ ध्वंसेति ॥ इदमुपलक्षणम् ॥ प्रतियोगिध्वंसयोः शक्तिनाशमण्योः शक्तिमण्युपसारणयोश्च कार्यकारणभावकल्पनापि स्यादित्यपि बोध्यम् ॥ उत्तेजकाभा
वेति ॥ तथा च केवलं मणिर्न प्रतिबंधकः किंतूत्तेजकाभावविशिष्टस्तदभावश्चोत्तेजकसमवधानकालेपीति हेतुतीति न व्यभिचार इति भावः ॥ अथ मण्यादिस्थलीयदाहं प्रत्युत्तेज
कस्यैव हेतुतास्त्विति चेन्न ॥ तस्याननुगतत्वात् ॥ न तदभावकूटविशिष्टमण्यभावस्यैवाननुगतत्वात् ॥ अत्रेदं बोध्यम् ॥ अभावीयविशेषणतासंबंधेन दाहत्वावच्छिन्नं प्रत्युद्देश्यतादैशिक
विशेषणतान्यतरसंबंधावच्छिन्नप्रतियोगिताकानां तत्तदुत्तेजकाभाववतां सामान्याधिकरण्यरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य मण्यादेः दैशिष्ट्यमण्यादेर्दैशिकविशेषणतासंबंधाव
च्छिन्नप्रतियोगिताकाभावस्याभावीयविशेषणतासंबंधेन हेतुत्वमिति ॥ एतेन संयोगसंबंधावच्छिन्नप्रतियोगिताकमण्यभावस्य तत्संयुक्तेपि सत्त्वात् दाहापत्तिरित्यपास्तम् ॥ नन्वनुमा
नमेव शक्तौ प्रमाणम् ॥ तथाहि ॥ वह्निर्दाहानुकूल[illegible]द्विशिष्टातींद्रियधर्मसमवायी दाहजनकत्वात् [illegible] हस्तवदात्मवदिति ॥ वह्निद्वारकैककत्वमादाय अर्जनकपालस्थवह्नि निर्द
ष्टत्वरूपमादाय वा सिद्धसाधनवारणाय साध्ये दाहानुकूलेति ॥ वह्निद्वारकेंधनसंयोगमादाय हस्तवदात्मसंयोगमादाय वा द्वेष इति ॥ वह्निनिष्ठस्पर्शमादाय तद्वारणा
यातींद्रियेतीति चेन्न ॥ विपक्षबाधकतर्कविरहेणास्यानुमानस्याप्रयोजकत्वात् ॥ केचित्तु वह्निप्रति तृणफूत्कारसंयोगादीनां तृणफूत्कारसंयोगत्वादिरूपेण कारणताया व्य
भिचारेणासंभवादतिरिक्तशक्तिसिद्धिः ॥ न च तृणफूत्कारणयोररणिनिर्मथनयोर्मणितरणिकिरणयोश्च संबंधस्य जन्यतावच्छेदकं वह्निवृत्तिवैजात्यत्रयं कल्प्यमिति वा
च्यम् ॥ तेनान्यतावच्छेदकवैजात्यत्रयकल्पनामपेक्ष्य तत्तत्संबंधानामेकशक्तिमत्त्वेन कारणत्वकल्पनाया एव लाघवेन न्याय्यत्वादित्याहुः ॥ तन्न ॥ तत्संबंधसाधारणैकजातेरे
वाभ्युपगमात् ॥ न च योग्यव्यक्तिजातेर्योग्यत्वापत्तिरिति वाच्यम् ॥ दोषविशेषेण शक्तिरिवायोग्यत्वकल्पनात् ॥ न चैनोदनात्वादिना संकरः ॥ तस्या
दोषत्वात् ॥ अन्यतमत्वेन कारणतासंभवाच्च ॥ न चान्यतमत्वघटकभेदानां मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण कारणतावच्छेदकभेदात्कार
णतावाहुल्यमिति वाच्यम् ॥ कारणतावच्छेदकोनां समनियतानां भेदानामैक्येन कारणतावच्छेदकैक्यसंभवात् ॥ न च भेदानां स्वरूपतोवच्छेदकत्वासंभवेन तृणफूत्कारसंयोगभेद
विशिष्टारणिनिर्मथनसंबंधभेदविशिष्टमणितरणिकिरणसंबंधभेदावच्छिन्नप्रतियोगिताकभेदत्वादिनावच्छेदकत्वं वक्तव्यम् ॥ तथा चावच्छेदकतावच्छेदकभेदविच्छेदकता
भेदस्तदेव कारणताभेद इति वाच्यम् ॥ स्वरूपसंबंधरूपाया अतिरिक्ताया वा कारणताया अवच्छेदकताभेदेप्यभेदादित्यन्यत्र विस्तरः ॥ परे तु तृणादिसंबंधकालीनवायुसंयो

उत्तेजकाभावविशि
ष्टमण्यभावः =४

व+

दैशिकविशेषणतासं
बंधेन अभावकूटेन =

वाहुल्ये =

विशेषणस्य उत्तेजका
भावस्य वित्त्वात् =
तत्त्वात् +

मणिसंयुक्तेपि देशे =

सिद्धसाधन =
तद्वारणाय +

न व्यभिचार[illegible]

नोदनात्वं तत्राभावसमा
नाधिकरणा जातिर्यत्र
तृणफूत्कारादिनोदनात्वे
ऽस्त्वा न तत्त्वावभाव
समानाधिकरणानोद
नात्वे[illegible]
[illegible]
नोदनयोरेकत्र समावे
शात् तृणफूत्कारसंयो
गादिना नोदनादो =५

अप्शब्दस्याप्सु जलत्वादि पाणिनीयकृत्वैय
दा॰ रत्वात् आपो जलानीति प्रतापस्याग्नितेजः
शब्दवाच्यत्वात् प्रकृते तेजः पदार्थदर्शीयति
वह्नि+ +५

शब्द+

निरूपके
उपमाने=

7

न्या॰मु॰टी॰

गादीनामेकशक्तिमत्त्वेन हेतुनामाद्यविनिगमनाविरहान्नशक्तिसिद्धिरित्याहुः ॥ अतिशक्तिपदार्थं नव उ नम ॥ यत्तच्छक्तिनेसादृश्यमप्यतिरिक्तपदार्थः इति तदपि निराकरोति ॥ सा
दृश्यमपीति ॥ तद्भिन्नत्वे सतीति ॥ इदं च सादृश्यनिरूपकेति व्याप्तिवारणाय ॥ अनुयोगितासंबंधविवक्षणे तु न देयमेव ॥ तद्गतभूयोधर्मवत्त्वमिति ॥ तत्रासाधारणेन विद्य उपमाने=२
मानायेभूयांसो धर्मास्तद्वत्त्वमित्यर्थः ॥ नन्विदं गगनं गगनाकारं सागरः सागरोपमः ॥ रामरावणयोर्युद्धं रामरावणयोरिवेत्यादावव्याप्तमिति चेन्न ॥ तद्भिन्नधर्ममा गगनादित्रि=
विवक्षया त्रस्याविवक्षितत्वात् ॥ क्रमभेदेभेदस्तस्याहा ॥ अतएव युगभेदविवक्षायामिहोपमालंकारोऽन्यथानन्वयालंकार इत्युक्तमालंकारिकैः ॥ सादृश्यघटकधर्मश्च क्वचिज्जातिरूपो यथा
घटसदृशः पट इत्यादौ क्वचिदुपाधिरूपो यथा गोत्वं तथाश्वत्वमपीत्यादौ ॥ यथा चंद्रसदृशमुखमित्यादौ वाह्लादकत्वादि ॥ अतिरिक्तकल्पने गौरवादिति ॥ न व्याप्तसादृश्यम ति+
तिरिक्तमेव ॥ न चातिरिक्तत्वे पदार्थविभागव्याघात इति वाच्यम् ॥ तस्य सामान्यं परया वा तत्त्वज्ञानोपयोगिपदार्थमात्रनिरूपणपरत्वात् ॥ एवमधिकरणत्वमपि ॥ तस्य संयोगादिस्वरूपत्वे अधिकरणत्वम=
वदरकुंडसंयोगस्याश्रितत्वेन कुंडे वदरमिति वदरे कुंडमित्यपि प्रयोगः स्यात् ॥ एवं प्रतियोगित्वमपीत्याहुः ॥ सादृश्यलक्षणं लक्ष्ये योजयति ॥ यथेति ॥ इतिशब्दः श्लोकव्याख्यासमाप्ति
द्योतकः ॥ क्षित्यां क्षितिरुत्रविक्षितिक्ष्मत्यया न क्षितिशब्दस्य क्षयवाचकत्वात् क्षितिपदस्य प्रकृतोपयोगिनमर्थमाह ॥ क्षितिः पृथिवीति ॥ वह्न्यादिरिति ॥ तदर्थः ॥ देवशब्दस्यापि
मरुच्छब्दवाच्यत्वात् प्रकृतोपयोगिनमर्थमाह ॥ मरुद्वायुरिति ॥ व्योमशब्दस्य वेदे ब्रह्मणि प्रयोगादाह ॥ व्योम आकाश इति ॥ देहविशिष्टार्थकेन तदेहिशब्देनावयवानामप्यस्थि
तेराह ॥ देही आत्मेति ॥ अथेश्वरस्य देहिनां मध्येऽनंतर्भावात्कथं द्रव्यत्वमिति चेन्न ॥ वृद्धास्तावच्छान्यायेनेश्वरस्य शरीरमिच्छंति ॥ संसारी इवेश्वरः शरीरमित्यन्ये ॥ अतएवात्मस्व
सारात्मेति ॥ पृथिव्यप्तेजोवाय्वात्मन इति पंचैव द्रव्याणि ॥ व्योमादेरीश्वरात्मन्येवांतर्भावात् ॥ मनसश्चात्मसमवेतत्वेन तदंतर्भावादिति नवीनाः ॥ तन्मतं निराकर्तुं संख्याबोधकं करणे पद+
नार्थमाह ॥ एतानि नवेति ॥ व्योमत्वमात्रवच्छब्दाश्रयतया सिद्धिः ॥ न च भगवत एव शब्दाश्रयत्वम् ॥ प्रत्येकं जीवमादाय विनिगमनाविरहात् ॥ न च जीवानामाश्रयत्वे शब्दश्रवणमिति प्रत्य
क्षापत्तिः ॥ अदृष्टवद्योग्यत्वस्यैव कल्पनात् ॥ कालदिशोस्तु एतस्मिन्काले घटः पूर्वस्यां दिशि घट इत्याद्यनुगताकारप्रत्ययात् ॥ मनसश्चात्मसमवेतत्वे पार्थिवादि पृथिव्या
नादाय विनिगमनाविरह इत्याशयः ॥ अधिकमग्रे व्यक्तीभविष्यति ॥ मूले द्रव्याणीति ॥ द्रव्यपदं द्रव्य[illegible]स्वरूपजातिविशिष्टार्थकं ॥ ननु गुणाश्रयत्वविशिष्टार्थकं गोत्वात् ॥ गु
णवत्वं किं प्रमाणमिति ॥ किंशब्दः प्रश्ने ॥ ननु द्रव्यं द्रव्यमित्यनुगतप्रतीतिरेव जातिसाधका भविष्यतीत्यत आह ॥ नहीति ॥ तत्र ॥ द्रव्यत्वजातौ ॥ घटेति ॥ तथा च पामराणां घटा
दिषु द्रव्यत्वज्ञानाभावेन सकलद्रव्यसाधारण्याद्द्रव्यत्वजातिसिद्धिर्न भविष्यतीति भावः ॥ कार्येति ॥ प्रागभावप्रतियोगित्वम् ॥ न च ध्वंससाधारण्यं सत्त्वेन विशेषणीयत्वात् ॥ अत्र च का कार्यत्व+२
र्यस्य समवायः प्रत्यासत्तिः कारणस्य तादात्म्यं यत्र समवायेन कार्यं तत्र तादात्म्येन द्रव्यमिति नियमात् ॥ ननु जन्यसत्त्वरूपकार्यत्वावच्छिन्नप्रतितादात्म्येन द्रव्यत्वेन कारणत्वे मा

७

कार्यत्वस्यापि … धर्मप्रतियोगित्वकालिकसंबंधेन … त्वादिमत्वमित्यविनिगमनाविरहा दिति=२=२

प्रतिबंधकतावच्छेदकतया द्रव्यत्व जातिसिद्धावपि इति शेषः=८

7A

कार्यत्वस्य उपाधित्वात्=२=१

नाभावः॥ न च नीले नीलोत्पत्तिवारणाय तथा हेतुत्वमावश्यकमिति वाच्यम्॥ समवायेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसंबंधेन नीलहेतुत्वेनैव तद्वारणात् कार्यतावच्छेदक
त्वे गौरवात्॥ कालिकसंबंधेन घटत्वादिकमादाय विनिगमनाविरहाच्चेत्यत आह॥ संयोगस्येति॥ अत्र च रूपादिगुणानां सकलद्रव्यसाधारण्याभावेन द्रव्यकार्यतया परित्यागः
सकलद्रव्यवृत्तिसंख्यादिस्वस्य च गगनादिवृत्तिसंख्यादिवृत्तित्वात्॥ न च संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वे मानाभावः॥ तत्र द्रव्यसमवेतसत्तासामान्यं प्रति
तद्व्यक्तित्वेन समवायिकारणत्वस्यावश्यकतया गुणादौ तदुत्पत्त्यसंभव इति वाच्यम्॥ कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वनियमेन तादृशकारणत्वस्यावश्यकत्वात्॥ नित्यसंयो
गीकर्तृमतसाधारण्येनाह॥ विभागस्येति॥ जातिरूपद्रव्यत्वसिद्धेः॥ क्वचित्तथैव पाठः॥ अत्र यद्यपि गुणवत्त्वेनान्यथासिद्धिः संभवति तथापि समवायसंबंधधर्मबाधे सत्येवानुमि
तेः परंपरासंबंधविषयत्वमिति भावः॥ इदमुपलक्षणम्॥ द्रव्यव्यतिरिक्तद्रव्यांतरानुत्पत्त्या समवायेन द्रव्यस्य प्रतिबंधकत्वं कल्पनीयमिति प्रतिबंधकतावच्छेदकतया द्रव्यत्वसिद्धिः
प्रतिबंधकतावच्छेदकं च पृथिव्यादिचतुष्टयमात्रवृत्तिभूतत्वमेव॥ नित्यव्यावर्तकत्वात्॥ भूतत्वस्य प्रतिबंधकतावच्छेदकत्वे तदुत्पत्त्यनुपपत्तिः स्यात् तथात्वमादाय विनिगमनाविरहापत्तिः
द्रव्यत्वस्य प्रतिबंधकतावच्छेदकत्वं तद्धर्मिग्राहकमानसिद्धम्॥ न चैतस्य गगनादिवृत्तित्वे मानाभाव इति वाच्यम्॥ भूतत्वेनैतत्तुल्यवृत्तिकत्वापत्त्या विनिगमनाविरहेण गगनादि
पंचवृत्तित्वाभ्युपगमात्॥ न च भूतत्वेन तुल्यव्यक्तिवृत्तित्ववारणाय मनोवृत्तित्वमेव द्रव्यत्वे कल्प्यतां॥ गगनादिवृत्तित्वकल्पने गौरवात्॥ गगनादिवृत्तित्वकल्पनेपि मूर्त
त्वेन सांकर्यवारणाय मनोवृत्तित्वावश्यकत्वादिति वाच्यम्॥ तथा सति मूर्तत्वजात्या द्रव्यत्वस्य तुल्यव्यक्तिवृत्तित्वापत्तिरिति॥ द्रव्यत्वजातिः॥ ननु दशमद्रव्यस्य तमसः स
त्वान्नवद्रव्याणीत्ययुक्तमित्यभिप्रायेण मीमांसकः शंकते॥ नन्विति॥ ननु तमसि मानाभावादेव नायुक्तमित्याशंक्य तमःसाधकप्रत्यक्षप्रमाणमाह॥ तद्धीति॥ तमो हीत्यर्थः
प्रत्यक्षेण॥ चक्षुरिंद्रियेण॥ ननु तमसः सिद्धावपि तस्य द्रव्यत्वे किं मानमित्याशंक्यानुमानं प्रमाणमाह॥ तस्येति॥ चकारो द्रव्यत्वमित्यनेनान्वेति॥ तथा च तमो द्रव्यं रूपव
त्वादित्यनुमानेन तमसो द्रव्यत्वे प्रमाणं सूचितम्॥ इदमुपलक्षणम्॥ परत्वापरत्वाश्रयत्वादित्यपि बोध्यम्॥ इदं तमः परमिदमपरमिति प्रतीतेः॥ हेत्वंतरमाह॥ कर्मवत्त्वादिति॥
कर्मवत्त्वं च समवायेन विवक्षितं तेन जन्यमात्रस्य कालिकसंबंधेन कर्मवत्त्वेपि न व्यभिचारः॥ न च स्वरूपासिद्धिः॥ चलतीत्याद्येति प्रतीत्या कर्मवत्त्वसिद्धेः॥ तमसः द्रव्यत्वं
निरा | भावे के कृते॥ तद्धीत्यादिना॥ गंधेति॥ गंधाभावस्य हेतुत्वोक्तौ परगत गंधप्रतियोगिताकाभावमादाय घटे व्यभिचारोतः अन्यत्व [illegible] मुक्तम्॥ हेतुश्च प्रतियोगिव्यधिकरणः | द्रव्येति
समवायसंबंधावच्छिन्नप्रतियोगिताको पि बोध्यः॥ तेन नीलोत्पत्तिकालीनसंयोगसंबंधावच्छिन्नगंधाभाववति घटे व्यभिचारः॥ नीलरूपेति॥ अनुगतेनैकेनैव नीलरूपे
णाहेतनाजलाद्यष्टभेदसिद्धेः स्नेहाभास्वररूपाभावादीनामननुगततानानेहेतुतयोपन्यासः॥ जलादिकमित्यादिना तेजः प्रभृति [illegible] द्रव्यसंग्रहः॥ तथा च नवमः

येन प्रमाणेन द्रव्यं रूपं धर्मि सिध्यति तेनैव प्रमाणेन द्रव्यत्वस्य प्रतिबंधकतावच्छेदकत्वं सिध्यति=८ … त्वाभावसमानाधिकरणं द्रव्यत्वं आकाशादौ … रूपं मनसि तयोरेव … चलरूपे=१

प्रतिबंधकतावच्छेदकत्वमादाय=१ भूतत्वप्रतिबंधकतावच्छेदकत्वे द्रव्यत्वप्रतिबंधकतावच्छेदकं=८

द्रव्यत्वस्य गगनादि … वृत्तित्वाभावे=

प्रतियोगिव्यधिकरणत्वकथनेन=२ समवायसंबंधावच्छिन्नेति प्रतियोगिताविशेषणकथने न=२=३
द्वितीयक्षणे गंधस्य सत्ता
तत्र प्रतियोगिव्यधिकर
णगंधाभावहेतुः=२=३

तमसः द्रव्य
त्वे: ६५

तथा च तमो न पृथिवी भवितुमर्हति प्रतियोगिव्यधिकरणसमवायसंबंधावच्छिन्नगंधत्वावच्छिन्नगंधनिष्ठप्रतियोगिताकाभाववत्त्वात् जलादिवदित्यनुमानं पर्यवसन्नम्=२

द्रव्यत्वे आलोकनिरपेक्षेणाचक्षुरिंद्रिय
णाग्रहणं न स्यात् ॥ द्रव्यग्रहे आलोकमपेक्ष्य
चक्षुरिन्द्रियस्य हेतुत्वादित्यत आह ॥ तत्रात्य
न्ते चेति ॥ न [illegible] मप्रत्यक्षेत्यर्थः ॥ तथा चतमो=१

वेष्वन्तर्भावासंभवेन परिशेषेण तमसोऽधिकद्रव्यत्वसिद्धिरिति भावः ॥ तदुक्तम् ॥ तमः खलु चलं नीलं परापरविभागवत् ॥ प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हतीति ॥ ननु तमसोऽभिन्न
द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव संयोगसंबंधेनालोकत्वेन कारणत्वावधारणादिति भावः ॥ आवश्यकतेजोभावेनेति ॥ प्रकृष्टमहत्त्वोद्भूतानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनेत्य
र्थः ॥ अंधकाराभावत्वेन जः किं न स्यादिति तत्र न सम्यक् ॥ उष्णस्पर्शभास्वररूपवत्तेरनयपत्रेरिति लाघवनायावश्यकपरम् ॥ उपपत्तेः ॥ तमोव्यवहारोपपत्तेः ॥ नन्वेतमसस्तेजोभावत्वे रूपव
त्त्वप्रतीतिः कथमभावे रूपाभावादित्यत आह ॥ रूपवत्तेति ॥ ननु रूपवत्त्वप्रतीतेर्भ्रान्तत्वं तत्रैव स्वीक्रियते यत्रोत्तरकाले बाधज्ञानं प्रकृते च तमसि चलतीतिप्रतीतिसिद्धकर्मवत्त्वहेतुना तम
सि द्रव्यत्वं सेत्स्यतीत्यत आह ॥ कर्मप्रतीतिरपीति ॥ नहि द्रव्येऽन्योपाधिकी कर्मप्रतीतिरिति भावः ॥ ननु प्रतीतेर्भ्रान्तत्वं तत्रैव स्वीक्रियते यत्रोत्तरकाले बाधज्ञानं प्रकृते च तमो न चलतीत्युत्तर
काले बाधज्ञानाभावात्कथं प्रतीतेर्भ्रान्तत्वमित्यतो दृष्टान्तरमाह ॥ तम इति ॥ अवयवादीत्यादिनोत्य त्रिध्वंसपरिग्रहः ॥ यत्स्वारोपितं नीलं रूपं तम इति कंदलीकारमतं तत्र ॥ इह अंधकार इ
ति प्रतीतेरपि भ्रमत्वापत्तेः ॥ तमो नीलं नत्नीलिमेति प्रत्ययाच्च ॥ इति तमोवादः ॥ ननु तमसो नतिरिक्तत्वेपि सुवर्णस्यातिरिक्तद्रव्यस्य सत्त्वान्नवत्वव्याघातस्तदवस्थ एवेत्यत आह ॥ सुवर्णा
स्येति ॥ वक्ष्यत इति ॥ तेजोनिरूपणावसर इति शेषः ॥ कण्ठत इति ॥ रूपरसगंधस्पर्शाः संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गु
णा इति विभागसूत्रे सप्तदशकंठोक्ताः ॥ चशब्देनेति ॥ सूत्रस्थचशब्देन गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः सप्त समुच्चिताः ॥ ते च सर्वे एकतया चतुर्विंशतिगुणा इति व्यवहृताः ॥
ननु चतुर्विंशतेः किं नाम गुणत्वं न च जातिविशेषस्तत्र प्रमाणाभावादित्यत आह ॥ तत्रेति ॥ तेषु गुणेष्वित्यर्थः ॥ अग्रे गुणनिरूपणावसरे वक्ष्यत इति ॥ द्रव्यकर्मभिन्ने सामान्यवति या
कारणता सा किंचिद्धर्मावच्छेद्या कारणतात्वादित्यनुमानेन गुणत्वजातौ प्रमाणमिति भावः ॥ एतत्तत्वं तत्रैव स्फुटीभविष्यति ॥ [illegible] ॥ इति गुणसामान्यनिरूपणम् ॥ प्रत्य
क्षसिद्धेति ॥ चलनाकारानुगतप्रत्ययवेद्येत्यर्थः ॥ अधिकतयेति ॥ कर्मविभाजकोपाधिभिर्भ्रमणत्वादिभिः ॥ मूले गमनादेरिति ॥ अथैवमुत्क्षेपणादीनां गमनादेव लाभे उत्क्षेप
णत्वादिभिरपि विभागोनुचितः ॥ नहि उत्क्षेपणादौ गमनत्वं नानुभाविकम् ॥ ऊर्ध्वमधश्च प्रक्षिप्तलोष्टरावूर्ध्वं गच्छत्यधो गच्छतीति प्रत्ययादिति चेन्न ॥ स्वतंत्रेच्छस्य मुनेर्नियोगप
स्तु पृथिवीत्वजातिरपि पृथिव्या लक्षणम्॥ न च व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत इत्याचार्यमते पक्षतावच्छेदकस्य न हेतुत्वमिति वाच्यम्॥ हेतुः साध्यसमानाधिकरण इ
ति ज्ञानेपि हेतुमान् साध्यवानिति बोधस्यानिष्पन्नत्वेन पक्षतावच्छेदकत्वेपि हेतुत्वादविरोधाद्व्यतिरेकव्याप्तेर्गमकतायाः स्फुटतरत्वात्॥ अणुत्वस्य द्व्यणुकेपि सत्त्वादाह॥ परमाणुरूपे
ति॥ बोद्धः शंकते॥ नन्विति॥ नन्वयं घट इत्यादिप्रतीतिरेव तत्र प्रमाणं भविष्यतीत्यत आह॥ परमाणुपुंजैरेवेति॥ विलक्षणसंस्थानविशिष्टैः परमाणुभिरेवेत्यर्थः॥ उपपन्नेरिति॥

…रूपदुग्धध्वंस …स्वीकारात्=४
द्व्यणुकरूपदुग्धोपादानपरमाणु=४
दुग्धपरमाणोर्दुग्धत्वजातिस्वीकारे=५
पृथिवीत्वजातिमत्त्वं पृथिवीत्वमिति लक्षणपरित्यागः=६
…गंधवत्त्वाभावस्तत्र …ष्टीत्वाभावः=

गंधवत्त्वं पृथिवीत्वव्याप्यं=३

15 A

अयं घट इत्यादिप्रतीतेरित्यर्थः ॥ तत्सम्महत्त्व ॥ परमाणुसमहत्त्व ॥ तत्र दृष्टान्तमाह ॥ यथेति ॥ वत्सम्महत्त्व ॥ केशसमहत्त्व ॥ अनुपपत्तेरिति ॥ परमाणूनामनेकत्वादणुत्वाच्चेति भावः ॥ इति
वदुपपत्तेरिति ॥ तत्र यथा धान्यसमहत्त्वैकत्वादेक इति प्रतीतिरेवं संयोगविशेषस्यैव महत्त्वरूपतया महानिति प्रतीतिस्तथा परमाणुपुञ्जेष्वपीति भावः ॥ प्रत्यक्षत्वायोगादिति ॥ तथा च स्वभा
वतोऽयोग्यानां परमाणूनां परस्परसंयोगमात्रेण योग्यत्वेन संभवतीति भावः ॥ दूरस्थकेशस्य स्वभावतो नानीन्द्रियत्वेन दृष्टान्तस्य वैषम्यमित्याह ॥ दूरस्थकेशेति ॥ तस्यैवेति ॥ तस्य
दूरस्थकेशस्य ॥ एवकारश्च तद्वृत्ताक्तेन सन्निधानपदेनान्वेति ॥ तथा च सन्निधानेन तु एव तस्य प्रत्यक्षत्वादित्यर्थः ॥ तथा च दूरत्वस्य प्रतिबन्धकत्वान्न दशायामप्रत्यक्षत्वमात्रेण तस्य महत्त्व दूरत्वदशायां=
स्वाभाविकमप्रत्यक्षत्वमिति भावः ॥ उत्पन्नत्वात् ॥ क्षणिकभगवादिनां तेषां मते परमाणूनामुत्पत्तिस्वीकारादिति भावः ॥ अन्यथा ॥ अदृश्यस्य दृश्योत्पादकत्वे ॥ तत्र ॥ नाशादृष्टनोत्पत्तिस्थ
ले ॥ तदन्तःपातिभिरिति ॥ अनित्यमतैरन्तःपातिभिः ॥ स्वभावात् ॥ कारणनैरपेक्ष्यात् ॥ उद्भूतरूपादीति ॥ आदिना लोकपरिग्रहः ॥ तदभावे ॥ महत्त्वोद्भूतरूपाद्यभावे ॥ तदभावादीति ॥ महत्त्वा
भावादित्यर्थः ॥ अत्र नास्तिकमतानुयायिनः ॥ परस्परविभक्तपरमाणूनां महत्त्वाभावादप्रत्यक्षत्वेऽपि परस्परसंयुक्तानां घटात्मकानां तेषां प्रत्यक्षे बाधकाभावः ॥ न च महत्त्वाभाव एव बा
धकः ॥ परस्परविलक्षणसंयोगस्यैव महत्त्वरूपस्य प्रत्यक्षजनकत्वात् ॥ न च परमाणूनां नित्यत्वाद्घटादावुत्पत्तिनाशयोः प्रतीत्यनुपपत्तिरिति वाच्यम् ॥ तन्मते परमाणू[illegible]स्य क्ष नास्तिकमते=
णिकतया परमाणूनामप्युत्पत्तिनाशयोः स्वीकारात् ॥ न च परमाणुपुञ्जे घटत्वाङ्गीकारे कपालाद्घट इति प्रतीत्यनुपपत्तिः परमाणूनां कपालजन्यत्वाभावादिति वाच्यम् ॥ तन्मते कपालस्या नास्तिकमते=
पि परमाणुपुञ्जरूपतया घटरूपपरमाणुपुञ्जे कपालरूपपरमाणुपुञ्जजन्यत्वस्वीकारात् ॥ पुञ्जात्पुञ्जोत्पत्तिरिति तेषां सिद्धान्तादित्याशङ्क्याह ॥ घट इत्यादिप्रतीतिविषयतया अनेक
परमाणुकल्पने गौरवादित्यतिरिक्तावयविसिद्धिरिति दिक् ॥ मेरुसर्षपयोरिति ॥ अपि शब्दः साम्यप्रसंग इत्युत्तरं संबध्यते ॥ तेन घणुकस्य सावयवत्वे मेरुत्वापत्तिः समुच्चीयते ॥ साम्यं
परिमाणतारतम्याभावः ॥ परिमाणकारणीभूतायाः अवयवसंख्याया उभयत्र साम्यादिति भावः ॥ न च मेरोरवयवानां सर्षपतुल्यपरिमाणवत्त्वेन सर्षपावयवानां सर्षपतुल्य
परिमाणवत्त्वमित्यवयवपरिमाणविशेषाद्विशेष इति वाच्यम् ॥ ~~प्रचयविशेषस्यापि संख्याविशेषनियम्यत्वेन संख्याविशेषाभावे तद्विशेषे~~ मेरोरवयवसर्षपावयवयोरप्यनंतावयव
भावत्वे वत्त्वेन तत्परिमाणतारतम्यस्याप्यापादनीयत्वात् ॥ न च मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेषात्तद्विशेष इति वाच्यम् ॥ प्रचयविशेषस्यापि संख्याविशेषनियम्यत्वेन
प्रचयाख्यसंयोगविशेषे= संख्याविशेषाभावे तद्विशेषानुपपत्तेरिति ॥ ननु तथापि विश्रामाश्रयस्यापि नित्यत्वे मानाभाव इत्यत आह ॥ यत्र त्विति ॥ असमवेतकार्योत्पत्तिप्रसंगादिति ॥ असमवेतभावकार्योत्पत्तिप्र
संग इत्यर्थः ॥ ननु तस्य नित्यत्वसिद्धावप्यणुत्वे किं मानमित्यत आह ॥ महत्परिमाणेति ॥ चाक्षुषद्रव्यत्वादिति ॥ आत्मनि व्यभिचारवारणाय चाक्षुषपदम् ॥ घटाभावे व्यभिचारवार
णाय द्रव्यपदम् ॥ तदवयवसिद्धाविति ॥ त्रसरेणोरवयवसिद्धावित्यर्थः ॥ तदसिद्धेरिति ॥ अवयवधारायाः असिद्धेरित्यर्थः ॥ अत्र न्यायः ॥ त्रसरेणोरवयवाः सावयवा इत्याद्यनुमानयोः तत्प्रयो
रप्रयोजकत्वेन त्र्यणुकावेव विश्रामः ॥ न च चाक्षुषप्रत्यक्षं प्रति महत्त्वं कारणं तथा च त्रुटौ महत्त्वमावश्यकं तदवयवसंख्याजन्यमित्यवयवं विना नोत्पद्यत इत्यनुकूलतर्कसत्त्वान्नाप्रयो

महत्त्वे=१ चाक्षुषप्रत्यक्षे=१

द्रव्यत्व त्रसरेणु संयोगः
स्वसमवायिसमवायित्वसंबंधेन=३ भिन्नेषु=१ त्रसरेणुषु=२ अणुपरिमाण=१

16

मा·मु·टी·

१६

नकत्वं द्व्यणुकसाधकानुमानस्येति वाच्यम्॥ त्रसरेणुमहत्त्वस्यानित्यत्वस्वीकारेणोक्ततर्कानवतारात्॥ न चाणुव्यवहारस्याणुपरिमाणनिबंधनतया तदाश्रयद्रव्यसिद्धिरावश्यकीति वाच्यम्॥ त
स्यापकृष्टपरिमाणनिबंधनत्वात् महत्यपि महदन्तरमादायाणुव्यवहारात्॥ न चैवं त्रसरेणव एवावयवीति वाच्यम्॥ विशकलितेष्वपि तेषु घट इत्यादिप्रत्ययप्रसंगात्॥ न च तेषां संयोगदशायामेव घटत्वं
घटो द्रव्यमित्यादिप्रतीतौ च परंपरया तेषां भानमिति वाच्यम्॥ संभवति साक्षात्संबंधविषयत्वे परंपरासंबंधविषयकत्वकल्पने गौरवादित्याहुः॥ ननु परमाणुद्वयेन कुतो न द्रव्यांतरोत्पत्तिः प
रमाणुद्वयेन द्व्यणुकवदेवं द्व्यणुकद्वयेन द्रव्यांतरोत्पत्तिस्त्रिभिर्द्व्यणुकैस्त्र्यणुकवदिति चेन्न॥ प्रमाणाभावेन तादृशद्रव्यासिद्धेः परमाणुद्वये द्व्यणुकद्वये च द्रव्यारंभकसंयोगाकल्पनात्॥ परमाणूनां=५
अत्रेदं चिंत्यम्॥ त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु परमाणुभ्यामनारंभकत्वसिद्धांतिनां द्व्यणुकाभ्यामनारंभस्वभावाभावात्॥ फलवत्त्वेन त्रयाणामेव युगपद् द्रव्यारंभकसंयोगकल्पना
वश्यकतो गवाक्षरंध्रे दृश्यमानानां द्व्यणुकत्वमेव युक्तम् अणुद्वयारब्धत्वे लाघवादिति॥ स्थूलस्य देहमिंद्रियं विषयस्तथैव तत्स्वनैव विधेयहेतुपरत्वं सूचयितुमर्थमाह॥ सा कार्यरूपेति॥ यो
निजं शुक्रशोणितपरस्परमेलनजन्यम्॥ तद्भिन्नमयोनिजम्॥ जरायुजमिति॥ गर्भवेष्टनचर्मपुटकं जरायुः॥ मानुषादीनामित्यादिना पशुमृगाणां परिग्रहः॥ सर्पादीनामित्यादिना विहग
परिग्रहः॥ स्वेदजमुदाहरति॥ कृमिदंशाद्या इति॥ सर्वशरीराणामन्यत्वे धर्मविशेषसहितेभ्योऽणुभ्य एव स्वीकारादिति भावः॥ उद्भिज्जादिकमित्यादिना देवादिशरीरपरिग्रहः॥ तच्छरीराणा
मप्यन्येऽधर्मविशेषसहितेभ्योऽणुभ्य एव स्वीकारादिति भावः॥ तेषामयोनिजत्वे चागम एव प्रमाणम् ब्रह्मणो मानसा मन्वादयः पुत्रा इत्यादिप्रमाणम्॥ योनिं विना नरशरीरमित्येवं विधागमेऽयोनि
पदं कारणपरम्॥ शरीरपदं वा मनुष्यदेहपरम्॥ गंधादीत्यादिना भुक्तेतररूपपरिग्रहः॥ क्लेदोष्मादेरित्यादिना व्यूहावकाशपरिग्रहः॥ क्लेदः सरणं स्वेद इति यावत्॥ ऊष्मा पाकः॥ ऊष्ममिति प्रा
वत्॥ तेषां शरीरसंबंधेन पृथ्व्यादिरूपपराद्भूत्यानुमीयते॥ अनुष्णाशीतस्पर्शत्वेन॥ व्यूहः क्रिया॥ अवकाशोऽसत्त्वाद्वायवादिगत्यप्रतिबंधकः॥ ननु कथं तर्हि शरीरे पांचभौतिकत्वव्यवहार इत्यत आह
तेनेति॥ शरीरस्य पार्थिवत्वसाधनेनेत्यर्थः॥ एवं च शरीरे यः पांचभौतिकत्वव्यवहारो न पंचभूतोपादानकत्वनिबंधनः किंतु पंचभूतजन्यत्वनिबंधनः॥ तत्राप्येकैकस्योपादानत्वे चतुर्णां निमि
त्तत्वमिति विवेकः॥ किंतु चेष्टेति॥ चेष्टात्वं जातिविशेषश्चेष्टत इति प्रत्ययसिद्धः॥ न च शरीरत्वमेव पृथिवीत्वादिव्याप्यजातिश्चेष्टात्वं तु क्रियात्वमिति वाच्यम्॥ पृथिवीत्वादिना सं
करेण पृथिवीत्वादिव्याप्यानेकशरीरत्वकल्पने गौरवात्॥ आध्यात्मिकेति॥ आध्यात्मिकवायुः प्राणाख्यः॥ शंकते॥ न चैवेति॥ भग्नक्षतेति॥ भग्नक्षतयोर्विभागविशेषविशिष्टावयव
योः संरोहणम्॥ आदिना वृद्धिसंग्रहः॥ वृद्धिश्चावयवोपचयः॥ तदुत्पन्नादिति॥ आध्यात्मिकवायुसंबंधानुमितेः॥ ननु भग्नक्षतसंरोहणादिहेतुवायोः प्राणत्वे मानाभाव इति चेन्न
र्मदातीरसंजाताः सरलार्जुनपादपाः॥ नर्मदातोयसंस्पर्शात्ते यांति परमां गतिम्॥ गुरुं हुंकृत्य तुंकृत्य विप्रं निर्जित्य वादतः॥ श्मशाने जायते वृक्षः कंकगृध्रोपसेवित इत्यागमस्यैव तत्र प्र
माणत्वात्॥ अंत्यावयवित्वेनेति॥ द्रव्यानारंभकद्रव्यत्वेनेत्यर्थः॥ मृतशरीरे चेष्टाया अभावेनाव्याप्तेराह॥ अथवेति॥ घटत्वमादाय घटेऽतिव्याप्तिवारणाय [illegible] चेष्टावदिति॥ हस्तादा
वतिव्याप्तिवारणायांत्यावयवीति॥ न च हस्तत्वादिकं न जातिः॥ पृथिवीत्वादिव्याप्यनानाहस्तत्वांगीकारात्॥ पृथिवीत्वरूपतादृशजातिमत्ति घटादावतिव्याप्तेर्लक्षणांतरमाह॥ अथ

पृथिवीत्वादिना संकरादिति वाच्यम्॥ १

१६

16A

स्यावयवीति ॥ अंत्यावयविमात्रवृत्तीत्यनेन द्रव्यत्वजातिव्युदासः ॥ चैत्रशवद्वृत्तीत्यनेन घटादिव्युदासः ॥ चैत्रशवदिताहितप्राप्तिपरिहारार्था क्रियाश्रयत्वानवस्थं द्रमाद्रम ॥ घटादावपिस
त्वात् ॥ ननु देवत्वादिरूपजातिमादाय लक्षणसमन्वयः इत्यत आह ॥ जलीयेति ॥ देवत्वस्यापीति ॥ अपिनान्तसिंहत्वपरिग्रहः ॥ जातित्वाभावादिति ॥ जातिसांकर्यादितिभावः ॥
जातिसांकर्यस्यादोषत्वे जलत्वशरीरत्वादेर्मीनादिजातित्वांगीकारे वा देवत्वशरीरत्वजातिमादायैव लक्षणसमन्वयः इति ध्येयम् ॥ रूपादिषु मध्य इति ॥ रसगंधस्पर्शश्रादिपदार्थाः
नवशरावगंधव्यंजकजले मनसि च व्यभिचारवारणायैवकारः ॥ तथा च सक्तुरसस्यापि व्यंजकत्वान्न दोषः ॥ घ्राणेंद्रिये गंधत्वाभिव्यंजकत्वाद्धेत्वप्रसिद्धिवारणाय हेतौ मध्यांत
तम् ॥ न चासिद्धिवारकं विशेषणं निरर्थकमिति वाच्यम् ॥ व्यभिचारज्ञानदशायां हेत्वप्रसिद्धावपि व्याप्तिज्ञानाभावेन व्याप्तिग्रहौपयिकाप्रसिद्धिवारकविशेषणोपादानस्य सर्वसि उपायस्त=५
द्धत्वात् ॥ नत्वर्थत्वात् ॥ हेतुवाक्यघटकमध्यांतसमभिव्याहारेनैवकारार्थत्वात् ॥ तथा च दृष्टांते स्वीयरूपादिव्यंजके घृतादावसिद्धिवारणाय परकीयत्वं रूपादौ विशेषणं देयमिति
भावः ॥ तस्येति ॥ नवशरावगंधव्यंजकजलस्येत्यर्थः ॥ न च नवशरावगंधव्यंजकजलेन येन सक्तुरसो नाभिव्यंजितस्तत्र जलविशेषेनैकांतिक इति वाच्यम् ॥ परकीयरूपादिविषयक
साक्षात्कारस्वरूपायोग्यत्वस्य विवक्षितत्वान्नवशरावगंधव्यंजकजलेपि रसव्यंजकतावच्छेदकजलत्वस्य सत्त्वादिति ॥ परकीयेति विशेषणप्रवेशे लाघवादाह ॥ यद्वेति ॥ तद्दा
दानेह दृष्टांतमाह ॥ वायूपनीतेति ॥ इदमत्र बोध्यम् ॥ रूपाद्यव्यंजकत्वे सतीत्यस्य हेतौ तत्र येनात्ययम् ॥ शब्दाव्यंजकत्वे सति गंधव्यंजकत्वस्य नवशरावगंधव्यंजकोदके व्यभिचारेण तत्र ग्रथ
कत्वस्यान्यथाभावाद्वा ॥ नन्वेतेषु पिर स्पर्शानां परकीयत्वं विशेषणम् ॥ न च श्यमहेतौ नवशरावगंधव्यंजके दृश्ये भिचारेण जले व्यभिचारः ॥ लवणाक्षरमसीनीलरूपव्यंजकत्वा
त् ॥ न च तृतीयहेतौ तत्र व्यभिचारः ॥ एतदस्वरसेनापि यद्वेति कल्पान्तरप्रणयनात् ॥ तत्रापि परकीयत्वविशेषणाघटितं हेतुत्रयमिति ॥ तत्र ॥ घ्राणेंद्रियसन्निकर्षे ॥ इंद्रियत्वं न जातिस्तेज(पत्तां तेषि:
स्त्वादिना सांकर्यात् ॥ किं त्वशब्देतरेत्यादिना वक्ष्यमाणं बोध्यम् ॥ नन्वविषयत्वेन जातिः सामान्यादौ सत्त्वादतस्तल्लक्षणमाह ॥ उपभोगेति ॥ यद्यपि साक्षाद्भोगसाधनत्वं घ्राणादावव्याप्तं साक्षात्प
रंपरासाधारणभोगसाधनत्वं परमाणावपीति घ्राणादिब्रह्मांडांतमितिग्रंथविरोधस्तथापि साक्षात्परंपरासाधारणभोगसाधनत्वं विवक्षितम् ॥ परमाणुरपि विषयएव ॥ कार्यरू
पशरीरव्याएव त्रिप्रकारेण विभजनात्कार्यपृथिवीविषयेघ्राणकेत्यादिना प्रदर्शित इति न ग्रंथविरोधः ॥ अतएव चोक्तं तदुपभोगं साक्षात्परंपरया वा जनयत्येवेति ॥ कार्यत्वात्तेन्यत्र ज्ञा
नपदं संपातायातम् ॥ अदृष्टाधीनमिति ॥ अत्र च कार्यमात्रं प्रत्यदृष्टस्य हेतुता न समवायसंबंधेन घटाद्यधिकरणकपालादौ समवायेन तदभावाद्व्यभिचारात् ॥ यत्र स्वसमवायिसंयोगे कार्यतानेन:
नादृष्टं कार्यमात्रे हेतुरिति तन्न ॥ शब्दरूपकार्याधिकरणे गगने दृष्टसमवाय्यात्मसंयोगाभावेन व्यभिचारात् ॥ परं तु स्वसमवायिसंयुक्तसंयोगेन तस्य हेतुता बोध्या ॥ इदं तु बोध्यम् ॥ अदृष्ट
स्य कार्यमात्रं प्रति हेतुता न साक्षात् ॥ नहि सामग्रीसमवधाने दृष्टविलंबेन कार्यविलंबो दृष्टो येन तत्साक्षाद्धेतुः स्यात् ॥ परं तु सामग्रीसम्पादकतया प्रायः परंपरयैव तदुपयोगः
क्वचित्तु मेघसंचारादौ साक्षाद्देवत्वच्छेदकं त्वन्यथा सामग्रीसंपादकत्वस्यैवानुपपत्तेः ॥ एतदर्थमेव साक्षात्परंपरासाधारणजन्यत्वबोधकमधीनपदमुपात्तम् ॥ यददृष्टाधीनम् ॥ (

सद्यो वृत्तिः पदे+

रसव्यंजकत्वे सति गंधव्यंजकत्वात्। रूपाव्यंजकत्वे सति शरी... गंधव्यंजकत्वे सति गंधव्यं... जकत्वात् नवशरावगंधव्यंजकजलेनः

एव+

अविवादाधिकेषितं सर्व ... वनिर्वाहः

अदृष्टस्य साक्षाद्धेतु
ताकारे=१

जन्यतुल्यजनकत्वा
भावात्=६

तेहकारणतावच्छेदकतयाजलत्वंजातिः=४

16 ना.मु.दी.

पस्कृष्टीयादृष्टाधीनम्॥ तत्कार्यमित्यर्थः॥ तदुपभोगसाधनम्॥ तत्सुखदुःखोपभोगसाधनम्॥ नेन॥ घ्राणकादिकार्यस्य तत्तत्सुखदुःखोपभोगसाधनत्वेन॥ नन्वेवं सर्वस्यैव विषयत्वेन शरीरेन्द्रि
यभेदेन पृथिव्यास्त्रैविध्येन सिद्धेरत आह॥ शरीरेन्द्रियेति॥ इति पृथिवीग्रंथः॥ जलत्वजातौ प्रमाणमाह॥ स्नेहेति॥ कारणतावच्छेदकतया धर्मसिद्धौ बाधकाभावात्तस्य जातित्वमि
ति भावः॥ नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदकत्वेन संभवतीति शंकते॥ यद्यपीति॥ तथा कार्यतावच्छेदकम्॥ वृत्ततत्त्वं नित्यसाधारणधर्मस्य कार्य
तावच्छेदकत्वे दोषाभावात्तत्पदं न देयमेव॥ न च यथारण्यस्थदंडत्वे फलानुपधायके कारणतावच्छेदकतया दंडत्वादिकं जातिस्तथा तत्रापि भविष्यतीत्यत आह॥ तस्येति॥ दंडादेःस्व
रूपयोग्यतायां न कापि क्षतिः॥ तस्य नित्यत्वेन फलोपधायकत्वाभावादिति भावः॥ जन्यजलत्वजातेः॥ जन्यजलमात्रवृत्तिजातेः॥ तदवच्छिन्नेति॥ जन्यजलत्वजात्यवच्छिन्नेत्य
र्थः॥ न चैवं जलत्वं तावद्यावन्निजलत्वे न स्यादिति वाच्यम्॥ जलस्य त्यावयव्यनुपगमात्॥ नन्वु जलत्वावच्छिन्नं प्रति समवायसंबंधेन स्नेहस्यैव कारणत्वम् अतिरिक्तजातिकल्प
नापेक्षया लाघवादिति चेन्न॥ जलत्वावच्छिन्नं प्रति स्नेहत्वेन वा कारणत्वं शीतस्पर्शत्वेनेत्यत्र विनिगमनाविरहादतिरिक्तजातिसिद्धेः॥ अत्र भूतत्वमादाय कल्पनीयेन विनिगमनाविरहाभा
वादिति॥ केचित्तु धर्मादिकं प्रत्यार्द्रेन्धनादेः कारणत्वं निर्विवादम्॥ आर्द्रत्वं च जलसंयुक्तत्वम्॥ तथा च जलसंयुक्तेन्धनत्वेनेन्धनसंयुक्तजलत्वेन कारणतेत्यत्र विनिगमनाविरहाज्ज
लत्वेन्धनत्वयोः पार्थक्येन कारणतावच्छेदकतया जलत्वजातिसिद्धिरित्याहुः॥ परे तु स्थूलजलवृत्तिप्रत्यक्षसिद्धजलत्वरूपजात्यवच्छिन्नसमवायिकारणतावच्छेदकतया परमाणु
जातिसिद्धिः॥ कार्यतावच्छेदककारणतावच्छेदकयोरैक्ये सत्यभावान्नित्यसाधारणधर्मस्य व्याप्यवायुत्वरूपजातिमादाय वायावपि कार्यतावच्छेदकत्वे दोषाभावात्तत्स्यादिति॥ न
त्विति॥ पृथिव्यामतिव्याप्तेरिति शेषः॥ शुक्लरूपस्य लक्षणत्वेनेत्युक्तिरित्यभिप्रेत्याह॥ अथवेति॥ द्रव्यत्वव्याप्यवायुत्वरूपजातिमतिवायावतिप्रसंगाद्रूपवद्वृत्तीति॥ य
था च वायुत्वं जातिस्तथाग्रे वक्ष्यते॥ पृथिवीत्वादिजातिमादाय पृथिव्यामतिप्रसंगवारणाय नैमित्तिकद्रवत्ववदवृत्तीति॥ साक्षादितिपरत्वादिवारणाय॥ द्रव्यत्वसाक्षाद्व्याप्य
त्वं च द्रव्यत्वव्याप्यव्याप्यत्वमात्रे न तद्द्रव्यत्वव्याप्यस्यापि तत्रांतर्भावः॥ रूपवद्वृत्तित्वविशेषणेनैव रूपत्वादीनां वारणात्॥ तन्निवेशप्रयोजनाभावात्॥ यद्यप्येवं शेषपादृ
श्यं क द्रवत्वस्यैव रूपस्यानेपुक्तः॥ तेनापि वायुत्वादेर्वारणात्॥ एवं च द्रवत्ववद्वृत्तित्वाभावादेव घटत्वादीनां वारणसंभवे द्रव्यत्वसाक्षाद्व्याप्येत्यपि न देयमिति लाघवं तथापि शुक्ले
तरः शुक्लेतरत्वादि रूपघटितलक्षणस्येवोक्तत्वान्न रवघटितलक्षणपरिष्कारे मूलविरोधः स्यादिति तथानुक्तमिति ध्येयम्॥ भूतत्वं जात्यनभ्युपगमे न चेदम्॥ तेन जलत्वस्य द्रव्यत्व
व्याप्यभूतत्वव्याप्यत्वेपि न क्षतिः॥ जलघटान्यतरत्वमादाय घटादावतिव्याप्तिवारणाय जातीति॥ क्वचिच्छुक्लरूपवद्वृत्तीति पाठः॥ तत्र शुक्लपदं रूपपदं व्यासंपातायातम्॥ एवमेव वृ
त्यावृत्ति रभास्वरशुक्लेतररूपेत्यत्र रूपवद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यपरयोर्वोध्या॥ पृथिवीत्वमादाय पृथिव्यामतिव्याप्तिवारणायाभास्वरशुक्लेतररूपासमानाधिकरणेति॥ जल
त्वस्य शुक्लरूपसमानाधिकरणत्वात् संभव इति शुक्लेतरेति॥ तेजस्त्वमादाय तेजस्यतिव्याप्तिवारणायाभास्वरेति॥ शीतस्पर्शवति॥ यद्यपि शीतं गुणाद्विकोशात्वक्षीवतैवोचितातथा

जलत्वस्य=१

स्नेहत्वरूपपात्तजात्या=

साधारण

द्रवत्वजातं=

प्रवेशो५

स्वसमवायिसंयोगसंबंधप्रमाः

17A

पिविशेष्यस्यशीशाद्स्य पुल्लिंगत्वात्सुल्लिंगतया निर्देशः ॥ शुक्लंरूपमित्यादौ शुक्लपदस्य क्लीवतयैवेति ॥ द्रव्यत्वव्याप्यायाः पृथिवीत्वरूपाजातिस्तामादाय पृथिव्यामतिव्याप्तिवार
णायनित्ताहृत्तीति ॥ तेजस्त्वादिमादायतेजआदावतिव्याप्तिवारणायस्[illegible]फरहृत्तीति ॥ शेषंदर्शितदिशावसेयम् ॥ शीतेतरेति ॥ द्रव्यत्वरूपजातिमादायातिप्रसंगवारणाय शीते
तरस्पर्शवदिति ॥ आत्मत्वादिकमादायात्मादावतिव्याप्तिवारणायस्पर्शवद्वृत्तीति ॥ शेषंपूर्ववत् ॥ ननु जलेनीलरूपाभावेकथंनीलरूपप्रतीतिरत आह ॥ कालिंदीजलेति ॥ स्वसमवा
जलेन= यिसंयोगसंबंधेनउपष्टंभकपार्थिवभागगतनीलरूपप्रतीतिः कालिंदीजलादाविति भावः ॥ अतएवेति ॥ उपदर्शितसंबंधस्यजलेनीलमितिनियामकत्वादेवेत्यर्थः ॥ विष प्रतीति=४
तत्र= तीति ॥ उपदर्शितसंबंधघटकसंयोगस्यनाशादिति भावः ॥ तत्र ॥ जले ॥ माधुर्यस्य ॥ अन्यथा ॥ आश्रयोपाधिकत्वाभावे ॥ व्यंजकत्वादित्युत्तरं हरीतकीभक्षणोत्तरं प्रत्यक्षेण
माधुर्योपलंभादिति निरूपणीयम् ॥ कल्पनागौरवादिति ॥ अवयवरसाजन्यस्यपृथिवीरसस्याग्निसंयोगसाध्यत्वादेतदनुरोधमात्रेण जलसंयोगस्यापि पृथिवीरसोत्पादकत्वस्वी
कारेऽतिरिक्तकार्यकारणभावस्य हरीतक्यांमधुररसस्य च कल्पनेगौरवादिति भावः ॥ नन्वस्तु जलेमधुरोरसस्तथापि जंबीरजलादौ प्रत्यक्षसिद्धस्याम्लरसस्यापि स्वीकारेबाधका
भावादत आह ॥ पृथिवीत्वस्येति ॥ अम्लादिजनकतावच्छेदकत्वादिति ॥ यद्यपि पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्ववन्मधुरजनकतावच्छेदकत्वमप्यस्तीति तुल्यं तथापि हरीत
कीभक्षणोत्तरं जलेपिमधुरोपलब्धेस्तत्रैव मधुरस्वीकारस्यावश्यकत्वात् जलत्वेनापि मधुरं प्रतिहेतुत्वंकल्प्यतइति भावः ॥ ननु जंबीरसलिलादावम्लप्रत्यक्षात् जलत्वेनाम्लादिरसो
पिकल्प्यतइत्यतआह ॥ जंबीररसादाविति ॥ स्वसमवायिसंयोगेन जंबीरगताम्लरसप्रतीतिस्तत्र जलइत्यर्थः ॥ अधिकेपि जंबीरेऽम्लप्रतीतेस्तत्राम्लरसावश्यकत्वेनस्यैवतेज पृथिवी=
पर्यन्वधारा= नजलेप्रतीतिः ॥ हरीतक्यांमधुररसस्याभावात् हरीतकीगतमाधुर्यस्यजलेप्रतीतिरिति भावः ॥ कर्कटीभक्षणोत्तरंजलपानेति ॥ तिक्तरसस्यानुभवात्तिक्तरसोपि जलेस्यादिति तन्न
कर्कटीय= जलपानात्सर्वमपि कर्कट्यांतिक्तरसोपलब्धेः ॥ कर्कटीभक्षणेन रसनायावत्तिक्तपित्तत्तोभेतदीयतिक्तोपलब्धेर्वैदिकसिद्धत्वाच ॥ वस्तुतोनिर्दोषपीतनिर्मलगंगाजलमाधुर्यस्यानुभवसिद्धस्या
जलत्वमपर्करसंस्वीकारे= पलापासंभवान्मधुरएवेतियुक्तम् ॥ एतेनेहरीतक्यादौ नजलेसंयोगेनमाधुर्यमुत्पद्यते येन कल्पनागौरवम् ॥ परन्तु हरीतक्यांकषायवन्मधुररसोपि स्वीक्रियते ॥ तेनतद्व्यंजकश्च जलसंयोगः ॥ नत हरीतकीगतमधुररस=
तेऽनंतरसांतरस्य फलवल्लादिषु चित्ररूपवच्चित्ररसेमानाभावाद्गुणविरोधेननीरसैवहरीतकी ॥ सम्प्रतीतिस्तु अवयवेषुरसमत्त्वात् परंपरयेत्युच्यते तदाप्रि जलसंयोगोहरीतक्यवयवगतमाधुर्ये स्वसमवायिसमवेतत्वसंबंधेन=
स्यैवव्यंजकइत्यपास्तम् ॥ जलत्वतातावन्मानांतरंप्रमाणमाह ॥ एवमिति ॥ ननु जलत्वाभावेपि घृतचंदनादौ शैत्यस्य व्यभिचारेणकथंजन्यजलत्वेनतत्रहेतुत्वमत आह ॥ घृतेति ॥ पूर्वंशीत न्यायः शीतस्पर्श=४
तत्वस्पर्शस्तुक्तंतत्साधयति ॥ तेजःसंयोगादिति ॥ तत्र ॥ जले ॥ विवेचयिष्यतिचपाकासंभवमुपरिष्टात् ॥ घृतादावित्यादिपदेनतैलादिपरिग्रहः ॥ जलस्यैवस्नेहइत्यनंतरं स्वाश्रयसंयोगेनप्रती स्नेह=जल=घृतादि=
यतइतिशेषः ॥ तेन ॥ घृतादौसमवायेनस्नेहनिरासेन जलएवेति स्नेहस्यावांतरविशेषाभावात्तेनोक्तीर्तितः ॥ तदवच्छिन्नजनकतावच्छेदकं ॥ द्रवत्वव्याप्यावच्छिन्नजनकतावच्छेदकं ॥ तदेव ॥ जन्य
जलत्वमेव ॥ तदवच्छिन्नजनकतावच्छेदकजलत्वमितिभावः ॥ अथैवंरीत्यापरमाणव्यावृत्तमांद्याएकंजलत्वमेकंपरमाणुसाधारणंद्वितीयमितिजलत्वयोर्भेदेभेदाग्रहः कृत इति चेत्समान

अवांतरविशेषः=२ पूर्वंदर्शितो=४

अव्यत्तानधिकवृत्तित्वात्=१

न्या॰मु॰ 18

एते जलीय=४ द्रवत्वं येन तैलादि=

यतेयोग्यवृत्तित्वादिति ॥ एवमग्रेपि ॥ तैलादावित्यत्रादिपदेन क्षीरपरिग्रहः ॥ ननु घृतस्य तत्र नैमित्तिकद्रवत्वस्य समवायेनैव सत्वात् ॥ द्रवत्वमित्यनंतरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः
ननु तैले जलसत्वे तैलस्य दाहानुकूल्यं न स्यात् जलस्य दहनप्रतिकूलत्वादत आह ॥ स्नेहप्रकर्षेणेति ॥ प्रकृष्टस्नेहस्य जलस्य दहनानुकूल्यमेव ॥ अपकृष्टस्नेहस्यैव तस्य दहनप्राति जलस्य=२
कूल्यत्वादिति भावः ॥ वक्ष्यतीति ॥ स्नेहनिरूपणावसर इति शेषः ॥ प्रथमवदिति षष्ठीसमर्थाद्वतिरित्यभिप्रायेणाह ॥ पृथिव्यादिवदित्यर्थ इति ॥ एवमग्रेपि ॥ जलीयं शारीरमिति ॥ तत्र च
पार्थिवावयवैरुपष्टंभो बोध्यम् ॥ तेन जलमात्रेण तत्पाटादिव्यवस्थाया असंभवेपि न क्षतिः ॥ ननु तादृशशरीरे मानाभावोऽनुपलंभादित्यत आह ॥ वरुणलोक इति ॥ तत्र च श्रु
तिरेव प्रमाणमिति भावः ॥ गंधेति ॥ रसव्यंजके मनसि व्यभिचारवारणाय गंधाव्यंजकत्व इति ॥ कासारः सरः ॥ करकादिरित्यादिपदात्कूपादिपरिग्रहः ॥ कठिनत्वादिति ॥ कठिनस्प
र्शवत्वादित्यर्थः ॥ विलीनस्य तस्येति सप्तम्यर्थे षष्ठी ॥ क्वचिद्विलीनयोरिति पाठः स तत्रत्तरेव ॥ विलीनताया द्रवत्वरूपाया जलत्वव्यंजकत्वादिति भावः ॥ ~~गन्धेति रसव्यंजके मनसि व्यभिचारवारणा~~
~~य गंधाव्यंजकत्व इति~~ ननु विलीनत्वे नैमित्तिकद्रवत्वमेव न तु सांसिद्धिकमिति तत्र तस्मिन्न जलत्वव्यंजकम् यदि च विलीने तस्मिन्नित्यस्य तस्मिन्नष्टे सतीत्यर्थः तथापि करकादिनाशोत्तरं द्रव्यां
तरोत्पादात्तत्र द्रवत्वजलत्वयोः प्रत्यक्षं न करकायां नष्टत्वादत आह ॥ यद्द्रव्यमिति ॥ तथा च करकादिनाशोत्पन्नद्रव्यांतरे जलत्वस्य प्रत्यक्षसिद्धत्वादुक्तव्याप्त्या करकादिषु जलत्वसिद्धिरि यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्त्या=
ति भावः ॥ ननु हिमकरकयोः पार्थिवत्वाभावे कथं काठिन्यप्रत्यय इत्यत आह ॥ अदृष्टविशेषेणेति ॥ इति जलग्रंथः ॥ इत्थं चेति ॥ उष्णत्वजातिसिद्धौ चेत्यर्थः ॥ ननु कथं तर्हि जन्योष्ण
स्पर्शसमवायिकारणाभिन्नेषु परमाणुषु तेजस्त्वजातिसिद्धिरित्यत आह ॥ तस्येति ॥ तेजस्त्वस्येत्यर्थः ॥ जलत्वस्येवेति ॥ यथा जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलपरमाणौ जल
त्वजातिसिद्धिः तथा जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतया तेजःपरमाणावपि तेजस्त्वरूपजातिसिद्धिरित्यर्थः ॥ इदमुपलक्षणं समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रति समवाये
न तेजःसंयोगत्वेन हेतुत्वात्तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यम् ॥ चंद्रकिरणादावित्यादिना रत्नकिरणादेः संग्रहः ॥ तत्रापि ॥ चंद्रकिरणादावपि ॥ ननु तेषूष्णप्रतीतिः कुतो नेत्यत आह ॥ ना+
किं त्विति ॥ तदंतःपातिजलस्पर्शेनेति ॥ चंद्रकिरणांतर्गतजलभागशीतस्पर्शेनेत्यर्थः ॥ ननु चक्षुरादिनिष्ठस्य उष्णस्पर्शस्य केनाप्यभिभूतत्वाभावात्प्रत्यक्षापत्तिरत आह ॥ चक्षुरादौ चेति ॥ मर
कतकिरणादावित्यादिना सुवर्णस्य परिग्रहः ॥ रूपं शुक्लं भास्वरमिति मूलम् ॥ तत्र शुक्लेति स्वरूपकथनम् ॥ भास्वररूपमात्रस्य लक्षणत्वेति प्रसंगाभावात् ॥ भास्वरत्वं जातिविशेषः
स च तेजोरूपमात्रवृत्तिः ॥ शुक्लत्वव्याप्यश्चेति ॥ ननु रूपाविषयकद्रव्यप्रत्यक्षस्याभावाद्वैश्वानरादेश्चाक्षुषत्वापत्तिरिति शंकते ॥ तद्रूपाग्रह इति ॥ वैश्वानरादेश्चाक्षुषत्वे तद्गतसंख्या ना+
दिगुणानामपि चाक्षुषत्वं न स्यात् योग्यमात्रवृत्तित्वाभावादित्यपि नानुचितम् ॥ अन्यदीयरूपेणेति ॥ पार्थिवरूपेणेत्यर्थः ॥ मतांतरमाह ॥ वह्नेस्त्विति ॥ सुवर्णरूपेणेति तेजसि तत्स
त्वादिति ॥ तेन नासंभव इति भावः ॥ पृथिव्यवृत्तीति ॥ नैमित्तिकद्रवत्ववद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यद्रव्यत्वरूपजातिमादाय पृथिव्यादावतिव्याप्तिवारणाय पृथिव्यवृत्तीति ॥ पृथिवी
व्यवृत्तिद्रव्यत्वव्याप्य जलत्वजातिमादाय जले पृथिव्यवृत्तिवायुत्वादिकमादाय वाय्वादावतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति ॥ वायुतेजोन्यतरत्वमादाय वाय्वावतिव्याप्ति त्व+

वाग्याले । कविचक्षुर्धोऽप्याद्ग्रंगीकार्यदि=१

18A

२९ वारणायमानीति ॥ परकीयस्यशींदीति ॥ गंधाव्यंजकत्वादिघटितहेत्वंतरस्यरचनायादिपटेनगंधादिपरिग्रहः ॥ चक्षुषःपरकीयरूपादिव्यंजकत्वादसिद्धिवारणायस्पर्शपदम् ॥ इहकेचिद्
हः चक्षुर्विषयासंबद्धमेवग्राहकंयदिप्राप्यकारिस्यात्तदारसनादिवदधिष्ठानसंबद्धंगृह्णीयात् ॥ नचैवंगोलकासंबद्धग्रहणात् ॥ किंचयदिचक्षुःप्राप्यगृह्णीयात्स्वतोधिकपरिमाणवन्नगृ
ह्णीयात् ॥ नखलुनखदंजनैकापरश्चब्बंधंछिनत्ति ॥ शाखाचंद्रमसोस्तुल्यकालग्रहणानापत्तिश्च ॥ गतिक्रमेणप्राप्यग्रहणेहिक्रमेणग्रहणंस्यात् ॥ नतुतुल्यकालमुपलंभः ॥ अत्रभवतिस्र
स्नीरूपयन्नेवनयनेशाखांशीतमयूखंच ॥ एवंचप्राप्यकारित्वानुरोधेनगोलकातिरिक्तंचक्षुःपरैरंगीक्रियते ॥ गोलकस्यचंद्रादिप्राप्त्यसंभवात् ॥ अप्राप्यकारित्वेचगोलकमेवचक्षुस्तच्चन
दीपप्रभायाअधिष्ठानं दीपः=५ — तैजसमिति ॥ नदसत् ॥ अधिष्ठानासंबद्धार्थग्राहिण्याःप्रदीपप्रभायाइवचक्षुषोपिप्राप्यकारित्वसंभवात् ॥ इतरग्रहणस्यगोलकनिर्गतस्यमहतश्चक्षुषःश्रूयतेनप्रदीपप्रभायाइवोपपत्ते — मरुतरः
स्वाधिकपरिमाणद्रव्यग्राहिणीत्वगिंद्रियेणव्यभिचारात् ॥ तृतीयनियमेमानाभावाच्च ॥ तुल्यकालग्रहणंचासिद्धमेवतदभिमानस्यकालसंनिकर्षेणैवोपपत्ते ॥ अचिंत्योहितेजसोलाघ — नतुल्यकालाभिमानस्य=
वातिशयेनवेगातिशयोयत्प्राचीनाचलरत्नावलंबिन्येवभगवतिमयूखमालिनिभवनोदरेष्वालोकइत्यभिमानोलोकिनाम् ॥ यत्त्वाहुःशालिकाचार्याश्चक्षुर्बाह्यालोकाभ्यामारब्धे — का+
न चक्षुषातावदर्थसंश्लेषेनउपपन्नावदर्थग्रहणमितिशाखाचंद्रमसोस्तुल्यकालग्रहणमुपपद्यतएवेति ॥ तन्नशोभनम् ॥ चक्षुर्बाह्यालोकाभ्यामारब्धस्यचक्षुषःएकभागेपिसत्वात्स्व
भागस्थितपदार्थग्रहणापत्तेः ॥ इहदेशस्यबाह्यालोके अस्तुतत्यारंभानाभावइतिचेत्परदेशस्यबाह्यालोकेरपितेजस्त्यारंभानाभावः ॥ तदनभ्युपगमेपिचाक्षुषोपपादनस्यानुपदमुक्तत्वादिति — पद्मात्व=
लाघवादिदोष ॥ अथएवेति ॥ तैजसत्वेकिंमानमिति ॥ सुवर्णंपार्थिवंनैमित्तिकद्रवत्वादित्यनुमानस्यपार्थिवत्वसाधकस्यैवसत्वादित्याशयः ॥ समाधत्ते ॥ नेति ॥ सुवर्णमिति ॥ नचात्रपीतरूपवद्द्रव्यान्त
पक्षेसाध्याभावःबाध — कस्यसुवर्णस्यपक्षत्वेबाधः ॥ तैजससुवर्णस्यचानुमानात्सर्वमसिद्धापक्षाप्रसिद्धिर्धर्मशास्त्रेपीतद्रव्येपिसुवर्णपदप्रयोगेनतस्यापिसुवर्णपदवाच्यतयासुवर्णपदवाच्यत्वस्यपक्षतावच्छे — पीतद्रव्यस्यापि=
दकत्वेपिबाधतादवस्थ्यमितिवाच्यम् ॥ अत्यंतानलसंयोगेसत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वस्यैवपक्षतावच्छेदकत्वात् ॥ अवच्छेदकावच्छेदेनसाध्यसिद्धेरुद्देश्यतयाचपक्षतावच्छेदकभेदप्र — हे+
युक्तस्यसामानाधिकरण्येनसिद्धसाधनस्यादोषत्वात् ॥ असतिप्रतिबंधकइति ॥ जलमध्यस्थघृतादौव्यभिचारवारणायसतिप्रतिबंधकइति ॥ अग्निसंयोगानाश्यद्रवत्ववतिघृतादौव्यभि
अग्निसंयोगानाश्य= — चारवारणायसंयोगेत्यंतम् ॥ तोहिघृतद्रवत्वस्यसमानाधिकरणाग्निसंयोगासमानकालीनत्वान्नव्यभिचारः ॥ अनुच्छिद्यमानद्रवत्वादित्यस्यानुच्छिद्यमानद्रवत्वाधिकरणत्वादित्यर्थोनत
च्छिद्यमानद्रवत्वानधिकरणत्वादिति ॥ गगनादौव्यभिचारात् ॥ एवंपक्षेणाशंकितामप्रयोजकतांनिरस्यति ॥ नचेति ॥ अग्निसंयोगनाश्यत्वादिति ॥ एतच्चोपलक्षणम् ॥ अग्नेरपत्यंप्रथमंहिर
तर्के । — ण्यमित्याद्यागमान्यथानुपपत्तेरप्यनुकूलत्वादिति ॥ एतेनाश्रयनाशजन्यद्रवत्वनाशेव्यभिचारवारणायद्रवत्वेआश्रयनाशानाश्यद्रवत्वव्याप्यजातिविशेषंकल्पयित्वाविजाती
यद्रवत्वनाशंप्रत्यग्निसंयोगत्वेनहेतुतास्वीकार्या ॥ तच्चैवंजात्यंतरसुवर्णद्रवत्वव्याप्यत्वमपीतिदर्शितानुकूलतर्कोसंगतः ॥ सुवर्णस्यपृथिवीत्वेपितदीयद्रवत्वस्याग्निसंयोगनाश्यतावच्छेदकजाती — सुवर्णे=
कांततयात्यंताग्निसंयोगसत्वेपिनाशापत्तेरसंभवादित्यपास्तम् ॥ लोहादिरूपाश्रि ॥ तस्य ॥ पीतिमगुरुत्वाश्रयस्य ॥ प्रकारांतरेणतस्यतैजसत्वंसाधयतांमतमुपन्यस्यति ॥ अपरेत्वित्यादिना ॥ त

द्रवत्वं=घृतादि= आगमानुपपत्त्यो=२

पक्षत्यंतानलसंयोगेसत्य
नुच्छिद्यमानद्रवत्वाधिकरण
त्वंतत्रतैजसत्वइत्यनुकूलत
र्कोसंगतः=१

सुवर्णस्य=२

विजातीयद्रवत्व
त्वं=

19
न्या·मु·टी·
१४

प्रतिबंधकम्॥ रूपपरावृत्तिप्रतिबंधकम्॥ अग्निसंयोगस्यैतेजसस्कवर्णोपिसत्वाउक्तं पीतीति मेति॥ साध्ये विजातीयपदमुद्देश्यसिद्ध्यर्थम्॥ हेतौ सत्यंतमग्निसंयोगरहितेपूर्वरूपविजातीयरूपा
नाधारेघटे व्यभिचारवारणाय॥ अत्रहेतौ पृथिवीत्वंदेयम्॥ तेनजलपरमाणौ नव्यभिचारः॥ यथाकथंचिदग्निसंपृक्तघटेनद्वारणायात्यंतेति॥ नचाप्रयोजकम्॥ विरोधिद्रव्यसंबंधविना
पार्थिवाग्निसंयोगस्यपूर्वरूपविजातीयरूपजनकत्वादितिभावः॥ नुचद्रववद्रव्यान्तरस्यैवप्रतिबंधकंवाच्यम्॥ अदृष्टकल्पनापत्तेरिति॥ तस्यचेति॥ तस्यद्रवद्रव्यस्य॥ पृथिवीजलभिन्नस्येति
पृथिव्याः पक्षीकृतपीतिमाष्टयायाविजातीयत्वाभावाज्जलस्यतत्रासंभवादितिभावः॥ तेजस्त्वनियमादिति॥ बाधादेरूपाभावादितिभावः॥ नुचांधकारेपीतरूपाश्रयद्रव्यग्रहापत्तिः
स्कवर्णरूपालोकसंयोगसत्वादितिवाच्यम्॥ उद्भूतानभिभूतरूपालोकसंयोगस्यैवद्रव्यप्रत्यक्षेहेतुत्वात्स्कवर्णरूपस्यत्वभिभूतत्वात्॥ नचतैर्दानीपीतरूपस्याप्यग्रहात्सजातीयग्रहण
कृतमग्रहणंनतुस्कवर्णरूपस्येतिनतस्याभिभूतत्वमितिवाच्यम्॥ लघुतयासजातीयसंबंधस्यैवाभिभवपदार्थत्वात्॥ नचतथाप्यंधकारेस्कवर्णमासाक्षात्कारापत्तिः॥ तेजोभिन्नद्रव्यप्रत्यक्षंप्र
त्येवालोकसंयोगस्यहेतुत्वादितिवाच्यम्॥ स्कवर्णभिन्नंयत्तेजस्तद्भिन्नद्रव्यप्रत्यक्षेत्वेवतस्यहेतुत्वादिति॥ नवीनास्तुस्कवर्णपार्थिवमेवपीतरूपवत्तेनमितिसाक्षात्संबंधेनद्रवत्वप्रतीतेर्नभ
त्वायोगात्॥ उत्तंउतनहमितिप्रतीतेर्द्रवत्वस्याप्यत्यंतोच्छेदात्पृथिवीत्वस्यपीतरूपसमवायिकारणतावच्छेदकत्वोद्भूपनाशेतादात्म्येनस्वाश्रयस्यविरोधित्वाद्वपीतरूपनाशइति
वदंति॥ इति तेजः॥ वायोर्निरूपणं स्पर्शेत्यादि॥ अस्तेऽपाकजोनुष्णाशीतस्पर्शस्तु पवनेमतः इत्युक्तं तत्रापाकजादिपदानांक्रमेणव्यावृत्तिमाह॥ अत्र अशीतस्पर्शेति॥ उक्तमपाकजइति॥ यद्य
प्यपाकजानुष्णाशीतस्पर्शवत्त्वंपटादावतिव्याप्तं तथाप्यपाकजानुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वंपाकजानुष्णाशीतवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं
वातस्यार्थोविवक्षितः॥ एतेन॥ स्पर्शस्यानुष्णाशीतत्वकथनेन॥ तज्जनकतावच्छेदकमिति॥ तथाचविजातीयस्पर्शजनकंतया वायुत्वंजातिःसिध्यतीत्यर्थः॥ इदमुपलक्षणम्॥ शब्दविशे
षस्यवह्नित्वावच्छिन्नस्यवानिमित्तकारणतावच्छेदकतयावायुत्वजातिसिद्धिरित्यपिज्ञातव्यम्॥ स्पर्शादिलिंगकइति॥ स्पर्शादीनिलिंगानियस्यसतथा॥ शक्ताववस्थाधतीति॥ धृतिर्भ्र
गुरुणोद्रव्यस्यापतनम्॥ विजातीयस्पर्शेनेतितत्तीयांतचत्रकमनुमानादित्य ... दिनेनान्वितम्॥ अनुमितिप्रकारस्तुयोयंरूपवद्रव्यासमवेतस्पर्शःसक्वचिदाश्रितःस्पर्शत्वात्॥ पृ
थिवीसमवेतस्पर्शवत्॥ पृथिव्यादिस्पर्शेसिद्धसाधनवारणायरूपवद्रव्यासमवेतइतिपक्षविशेषणम्॥ एवमसतिरूपवद्रव्याभिघातेयोयंपर्णादिषुशब्दसंतानःसस्पर्शवद्वेगवद्द्रव्यसं
योगजन्यः॥ अविभज्यमानावयववद्रव्यसंबंधिशब्दसंतानत्वात्॥ दंडाभिहितभेरीशब्दसंतानवत्॥ पृथिव्याद्यभिघातजन्यत्वसिद्धसाधनवारणायासतीत्यादिपक्षविशेषणम्॥ विभागज
न्यनिशब्देव्यभिचारवारणायहेतावविभज्यमानेति॥ एवंनभसितृणतूलतनयित्वविमानादीनांधृतिःस्पर्शवद्वेगवद्द्रव्यसंयोगहेतुका॥ अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात्॥ नौकादिधृतिवत्
जलादिगतनृणादेरसिद्धसाधनवारणायनभसीति॥ प्रयत्नवदात्मसंयोगहेतुकधृत्यादेर्व्यभिचारवारणायास्मदादीति॥ एवंरूपवद्रव्याभिघातमंतरेणतृणोकर्मस्पर्शवद्रव्याभिघातजन्यम्॥
विजातीयकर्मत्वात्॥ नदीपूरान्तकाशादिकर्मवदिति॥ अग्रेवक्ष्यतेइति॥ अग्रे आत्मनिरूपणावसरइत्यर्थः॥ सर्वत्रपूर्ववन्नित्यताद्युक्तमिति॥ नित्यतादीत्यादिनाऽनित्यत्वपरिग्रहः॥ उक्तं वोध्य

पृथिवीवदिति जलवदित्यर्थः॥१८

व्यभिचारद्दर
आलोकसंयोगस्य=
नः
नावच्छेदक
यमालद्दय=
१६

19A

निषेधस्य=२

मित्यर्थः॥ एतदेवस्पष्टयति॥ मुक्तावस्थांभाषद्विविध इति॥ तत्र तेषुमध्ये योनिजमयोनिजमेवेत्यर्थः॥ पिशाचादीनामिति॥ मरुतां लोके प्रसिद्धमित्यर्थः॥ ननु वायोर्लात्वादिवाग्व्यापाराभावा
त्करचरणाद्यभावेन चाहरणविहरणाद्यभावात् कथंभोगायतनत्वमित्यत आह॥ परं त्विति॥ न लीयतैजसशरीरयोरप्यानेपस्य तुल्यत्वात्त्वकरणलाघवमभिप्रेत्यसाधारणेन समा
धानमाह॥ नलीयतैजसवायवीयेति॥ ननु कथं न हि जलीयत्वादिव्यपदेश इत्यत आह॥ न लादीनामिति॥ अत्र॥ त्वगिंद्रिये॥ योविशेषो धिशनादि॥ शरीरव्यापकमिति॥ न च नखर
लोमकेशादीनां त्वगिंद्रियानाधारत्वादसंभव इति वाच्यम्॥ तेषां संयोगिद्रव्यत्वेन शरीरत्वाभावात्॥ मूलस्यत्वगिंद्रियमित्यस्य त्वचि स्थितमिंद्रियमित्यर्थः॥ एतेन देहसहजावरणं त्व
गिंद्रियमुच्यते॥ नच पार्थिवं प्रत्यक्षसिद्धं चेति नेंद्रियं न च वायवीयमिति परास्तम्॥ त्वगिंद्रियस्य लक्षणमाह॥ स्पर्शेति॥ कार्यमात्रजनककालादावतिव्याप्तिवारणायेंद्रियमिति॥ चक्षु
रादावतिव्याप्तिवारणाय स्पर्शग्राहकमिति॥ त्वक्॥ त्वगिंद्रियमित्यर्थः॥ तद्धेति त्वगिंद्रियं चेत्यर्थः॥ पदेस्पर्शत्वाभिव्यंजकत्वादसिद्धिवारणाय रूपादिषु मध्ये इति॥ मनसिव्यभि
चारवारणायैवकारः॥ त्वगिंद्रियसन्निकर्षेव्यभिचारवारणाय द्रव्यत्वे सतीत्यपि बोध्यम्॥ अंगसंगिसलिलं॥ स्वेदः॥ आकरे॥ प्रथासर्पदेभाष्यादौ॥ प्राणत्वैकएवेति॥ कथं तर्हि पानादिव्यव
हार इत्यत आह॥ स्थानभेदादिति॥ हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः॥ उदानः कंठदेशस्थो व्यानः सर्वशरीरग इति स्थानभेदादित्यर्थः॥ क्रियाभेदाच्चेति॥ मुखनासिका
भ्यां निष्क्रमणप्रवेशनात्प्राणः॥ मलादीनामधोनयनादपानः॥ आहारेषु पाकार्थं वह्नेः समुन्नयनात्समानः॥ ऊर्ध्वनयनादुदानः॥ नाडीमुखेषु वितननाद्व्यान इति क्रियाभेदा
द्विपंचसंज्ञालभते न तु स्वं जात्याभेदेन संज्ञिभेद इति भावः॥ अनित्यवायुभेदः॥ आकाशेति॥ कालत्वदिक्त्वं न जातिरित्यग्रे वक्ष्यते न लाघवेनात्रैव प्रसंगात्कणपरमिदधाति॥ न जातिरिति॥ अनेक
समवेतत्वाभावादिति शेषः॥ एकव्यक्तित्वस्य जात्यभावे हेतुत्वे वैयधिकरण्यमिति प्रत्युक्तम्॥ किं त्विति॥ आश्रयता चात्र समवायेन विवक्षिता॥ तेन कालस्य जगदाधारत्वेन प्रागाश्रयत्वे
पि न क्षतिः॥ मूले वैशेषिकपदवैयर्थ्यमाशंक्याह॥ वैशेषिक इति॥ इत्थं [illegible] इति मूले सावधारणं ज्ञेयम्॥ एतेन॥ विशेषगुणत्वकथनेन॥ प्रमाणमित्यस्याकांक्षा शब्दादि॥ तत्र
शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः॥ अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादित्येवं रूपं बोध्यम्॥ दर्शितं॥ सूचितम्॥ अत्रानुमाने स्वरूपासिद्धिं परिहर्तुमाह॥ तथा हीति
घटादौ व्यभिचारवारणाय॥ चक्षुर्ग्रहणायोग्येति॥ आत्मनि व्यभिचारवारणाय बहिरिंद्रियग्राह्येति॥ रसत्वादौ व्यभिचारवारणाय जातिमदिति॥ एतेनास्मानुमानमयिमद्रव्यसमवेतत्वसाधकानुमानेस्व
रूपासिद्धिनिरासायेति बोध्यम्॥ गुणत्वादिति॥ एतदनुमानेनोक्तपरिशेषानुमाने हेतौ विशेष्यासिद्धिनिरस्ता॥ विशेषणासिद्धद्वारायाह॥ प्रत्यक्षेति॥ स्पर्शवद्विशेषगुण इति॥ मस्पर्श
वतो द्रव्यस्य पृथिव्यादिचतुष्टयस्य गुण इत्यर्थः॥ अकारणगुणपूर्वकप्रत्यक्षत्वादिति॥ अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वादित्यर्थः॥ हेतुसत्त्वं प्रतिपादयितुं पाकजेति॥ मूल
परमाणाविति॥ अनित्यानां पार्थिवरूपादीनां केषांचिदग्निसंयोगासमवायिकारणकत्वात्केषांचित्कारणगुणपूर्वकत्वात्तद्व्यपेक्षा॥ नरिक्कालेति॥ शब्द इत्यनुवर्तते॥ बहिरिंद्रि
येति॥ मनसोन्यादिंद्रियं बहिरिंद्रियम्॥ योग्यत्वात्॥ अन्यत्तत्वात्॥ एतेनात्मगुणायाः केंद्रियत्वं वा हेंद्रियत्वं तच्चमनस्यति प्रसक्तं तेनापि रूपादिग्रहणादिति निरस्तम्॥ इत्यपि च॥ अनेनप्र

अनेकसमवेतत्वाभावादिति हेतुकथनेन=
नातिव्याप्तिः=

त्वगिंद्रियस्य त्वचि स्थितत्वेन तत्त्वकत्वमिति लक्षणकरणेन=४

प्रमाणं=

शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः स्यादिके=

पश्चाद्बहिरिंद्रियलक्षणेन=१

पाकजगुणाः रूपादिकं य उक्तं मूले अनुमानम्=

पाकजो द्रव्यसमवेतरूपादिके=५

प्राप्तो न स्पर्शवद्विशेषगुणस्यारिके
म लौकिकानुमाने=४

२०
मा॰ मु॰ रो॰
२॰

कार्येण पृथिव्यादिष्टद्रव्यानाश्रितत्वसिद्धौ च सिध्यतीति ॥ एवौक्तपरिशेषानुमानेन सिद्धमितीत्यर्थः ॥ नन्वेतत्सर्वं न घटते यदि शब्दस्य विशेषगुणत्वे किंचित्प्रमाणं स्यात्तत्रैव वचमानं मपश्यामः
ति चेन्न ॥ शब्दो विशेषगुणः लौकिकप्रत्यक्षत्वे इंद्रियग्राह्यत्वे सति लौकिकप्रत्यक्षत्वादींद्रियग्रहणायोग्यतारहितत्वे च सति गुणत्वव्याप्यजातिमत्त्वादित्यनुमानस्यैव तत्र प्रमाण
त्वात् ॥ अभावत्वमादाय व्यभिचारवारणाय गुणत्वव्याप्येति ॥ गुरुत्वत्वमादाय व्यभिचारवारणाय प्रथमं सत्यंतम् ॥ संख्यात्वमादाय व्यभिचारवारणाय द्वितीयं सत्यंतम् ॥ सांसिद्धिकद्रवत्वस्नेहधर्माधर्म
भावनास्वप्रकृतहेतोरभावेपि तत्र हेत्वंतरेणैव विशेषगुणत्वं साधनीयमिति ॥ एवौक्तानुमानेबाधस्वरूपासिद्धिं चाशंकते ॥ नचेति ॥ वायाविति ॥ तथाच स्पर्शवद्विशेषगुणत्वस्य त
त्र सत्त्वात्तत्र भावसाधनेबाध इति भावः ॥ कारणगुणपूर्वकत्वकथनेन त्वकारणगुणपूर्वकत्वघटितहेतोरसिद्धिप्रदर्शनाय ॥ अयावद्द्रव्यभावित्वेनेति ॥ स्वाश्रयनाशाजन्यनाशप्रति
योगित्वे सति प्रत्यक्षत्वेनेत्यर्थः ॥ नन्वेतथाप्याकाशे प्रत्यक्षमेव प्रमाणं किमिति नोपन्यस्तमिति चेन्न ॥ चाक्षुषत्वे प्रयोजकस्य महत्त्वे सत्युद्भूतरूपवत्त्वस्याकाशेऽसंभवेन चाक्षु
षः प्रमाजनकत्वासंभवात् ॥ ननु यथाकाशेपि न चाक्षुषं तद्वत्स्पर्शनमपीति चाक्षुषाधिकरणत्वेन किं भासते इति चेत् ॥ आलोकस्येतिकल्प्य ॥ नन्वाकाशीयशरीरविषययोः प्रत्यक्ष
ने धर्मकर्णत्वस्यैवकल्पनमित्यर्थः ॥ यथा दर्शनमिंद्रियं तद्भवे श्रोत्रमित्यनेन ग्रंथेन क्रियते इत्याशंक्याह ॥ तत्र चेति ॥ आकाशे चेत्यर्थः ॥ कर्णशष्कुलीभेदादिति ॥ घटादिकर्णशष्कुल
त्यवच्छिन्नमाकाशं चैत्रादिश्रोत्रमिति भावः ॥ नव्यास्तु शब्दनिमित्तकारणत्वेन सत्त्वस्य स्वीश्वरस्यैव शब्दसमवायिकारणत्वम् ॥ न चेश्वरस्य शब्दसमवायिकारणत्वे जीवस्यैवेत्य त्रविनि
गमनाविरहः ॥ जीवस्य शब्दसमवायित्वे ज्ञानवच्छब्दस्यापि मानसत्वापत्तेः ॥ अदृष्टादिवत्प्रतिबंधकत्वकल्पने चातिगौरवम् ॥ न चैवं कर्णशष्कुलीविवरावच्छिन्नाकाशस्य कथं श्रो
त्रत्वोपपत्तिरिति वाच्यम् ॥ तथाविधस्येश्वरस्यैव श्रोत्रत्वोपपत्तेरित्याहुः ॥ स्वतंत्रास्तु संयोगादीनामेव गुणः शब्दः शब्दं प्रति मृदंगत्वादिना समवायिकारणतायाः स्वीकारात् ॥ प्राची
नैरपि मृदंगत्वादिना निमित्तकारणतायाः स्वीकारात् मृदंगे शब्द इत्यादिप्रतीतेश्च ॥ नच तत्रावच्छेदकत्वं विषयः मानाभावात् ॥ अन्यथा तत्रावच्छेदकतारूपस्वरूपसंबंधस्यान्यत्र सम
वायस्य कल्पने गौरवादिति वदंतीति ॥ इत्याकाशग्रंथः ॥ सत्ये जन्यानां जनक इति ॥ कार्यत्वावच्छिन्नं प्रति निमित्तकारणमित्यर्थः ॥ अत्र कालिकसंबंधावच्छिन्नकार्यत्वावच्छिन्नं
प्रतितानिरूपितमधिकरणतया निमित्तत्वं कालस्य लक्षणम् ॥ कालिकसंबंधावच्छिन्नेति करणादिष्वधिकरणेतिकरणादौ दिगीश्वरयोर्नीतिव्याप्तिः ॥ ननु कार्यमात्रं प्रति कालस्य
निमित्तकारणत्वे किं मानमिति चेदत्राहुः ॥ अद्य घटो भविष्यतीत्यादिप्रत्ययेन तत्कार्योत्पत्त्यधिकरणत्वेन कालो विषयीक्रियते तदुत्पत्त्यधिकरणत्वेन विषय
त्वस्य तदुत्पत्तिहेतुत्वनियमात् ॥ तदुत्पत्तिहेतुत्वस्य तद्धेतुत्वव्याप्यत्वात् ॥ एवं च तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वे सिद्धे यद्विशेषयोरिति व्याप्त्या कार्यमात्रे कालस्य
हेतुतासिद्धिरिति ॥ सा च हेतुता निमित्तकारणत्वेन ॥ नच कार्यमात्रे कालस्य हेतुत्वं न संभवति ॥ स्वसमवेते हि त्वचि हि एव त्वक्संयोगविभागौ प्रति कालस्य समवायिकारणत्वेन तद्भिन्न
त्वघटितस्य निमित्तकारणत्वस्य तत्राभावादित्याचार्योक्तं शंक्यम् ॥ समवायसंबंधेन द्वित्वादिकं प्रति तस्य समवायिकारणत्वेपि कालिकसंबंधेन द्वित्वादिकं प्रति निमित्तकारण

स्पर्शवद्विशेषगुणत्वा
प्रत्यक्षत्वे=५
अयावद्द्रव्यभावित्वे
अयावद्द्रव्यभावित्वेन=

कर्णशष्कुली विवरावच्छि
न्ने

घटे

शब्दस्य विशेषगुणत्वे

ईश्वरस्य शब्दसमवायि
कारणत्वे=
दश

मृदंगे=मृदंगावच्छेदेन शब्द
उत्पद्यते=

व्यवहारे

समवायिकारणत्वे=१

२॰

काले=

निमित्त२

काल=कालघटो द्वौ=घटपटौ
पृथक=२ कालस्य=१

मृदंगादौ शब्दसमवायित्वास्वीकारे=१
परस्परासमस्य२१

२०७

साधतेर

त्वस्यानपायात् ॥ एवमेवकार्यमात्रेदिशोपिनिमित्तकारणत्वंबोध्यम् ॥ उक्तावल्यांतत्रेति ॥ तत्रकाले ॥ जगतामाश्रयोमतइति ॥ कालःसर्ववानितिप्रतीत्यासर्वाधिकरणत्वेनका
लसिद्धिरितिभावः ॥ नन्वेतादृशप्रतीतिर्दिग्विषयिण्येवास्तु ॥ अतिरिक्तकालकल्पनेगौरवादतोनकेवलमनयाप्रतीत्याकालःसिद्ध्यति ॥ परंतुप्रमाणांतरेणकालेसिद्धेप्रकृतिवि
लात्सर्वाधारत्वंकल्प्यतइत्याह ॥ इदानीमित्यादिना ॥ सूर्यपरिस्पंदादिकमिति ॥ नचेदानींतदानीमितिप्रतीतिर्महाकालंविषयीकरोतीतिवाच्यम् ॥ तथासतिइदानींघटोनतदा
नीमितिप्रत्ययानुपपत्तेः ॥ नचतत्तत्क्रियाविशिष्टमहाकालएवेदानीमित्यादिप्रत्ययविषयस्तथाचेदानींघटोनतदानीमितिप्रत्ययस्यैतत्क्रियाविशिष्टमहाकालेघटोन क्रियाविशिष्टम
हाकालेघटोनतत्क्रियाविशिष्टमहाकालइत्यर्थइतिवाच्यम् ॥ तथासतितत्क्रियाविशिष्टमहाकालापेक्षयालाघवेनतत्क्रियायाएवतादृशप्रतीतिविषयत्वस्योचितत्वात् ॥ इतिप्र
तीत्यनंतरंस्वाश्रयतपनसंयोगिसंयोगएवसंबंधोवाच्यस्तत्रेतिशेषः ॥ नचाकाशमेवसंबंधघटकमास्तामितिवाच्यम् ॥ आकाशादिगात्मनांविनिगमनाविरहेणातिरिक्तैककालस्यतथा
त्वात् ॥ इत्थंचेति ॥ अतिरिक्तकालसिद्धौचेत्यर्थः ॥ सम्यगिति ॥ कालःसर्ववानितिप्रतीतेरतिरिक्तकालविषयकत्वोचितत्वादितिभावः ॥ परत्वापरत्वबुद्धेरिति ॥ ज्येष्ठेपरत्वप्रत्ययःक
निष्ठेऽपरत्वप्रत्ययः ॥ सचपरत्वापरत्वगुणविशेषाधीनः ॥ परत्वापरत्वेचसासमवायिकारणकेभावकार्यत्वात् ॥ असमवायिकारणंचैतयोःकालपिंडसंयोगएवेति ॥ परत्वापरत्व
योरसमवायिकारणसंयोगाश्रयतयाकालसिद्धिरितिभावः ॥ परत्वापरत्वयोरित्यस्यैववक्ष्यचिंतत्वेपितद्बुद्धिपूर्वत्वानुधावनंकालिकपरत्वापरत्वयोःप्रमाणंप्रदर्शयितुम् ॥ नचपि
डगतरूपादेरेवपरत्वापरत्वासमवायिकारणत्वमस्त्वितिवाच्यम् ॥ कालिकपरत्वापरत्वयोर्वीयावृत्त्यव्यभिचारात् ॥ अतएवपृथिवीपिंडसंयोगस्यनतत्रकारणत्वम् ॥ पृथिव्य
संबद्धपदार्थेपिपरत्वापरत्वयोरुत्पादेनव्यभिचारात् ॥ ननुतथाप्याकाशदिगात्ममनोभिःपिंडसंयोगस्यतथात्वंस्यात्किंकालकल्पनयेत्यतआह ॥ लाघवादिति ॥ आकाशदिग्भ्यां
पिंडसंयोगस्यतथात्वेजीवात्मभिःप्रत्येकंविनिगमनाविरहादात्ममनसोस्त्वनंतत्वात्तत्तथात्वंकिंतुलाघवादतिरिक्तःकालएवतथात्वेनकल्प्यतइतिभावः ॥ ननुयदिकालएकएव
तदाक्षणलवकाष्ठादिनानाव्यवहारस्तत्रनस्यात् ॥ नचैकस्मिन्नेवघटेघटःकलशःकुंभइतिव्यवहारवदत्रापिक्षणादिनानाव्यवहारेबाधकाभावइतिवाच्यम् ॥ एकस्मिन्विरुद्धनाना
व्यवहारायोगात् ॥ नहिघटत्वकलशत्वादिकंमिथोविरुद्धम् ॥ क्षणत्वदिनत्वादिकंतुविरुद्धमेव ॥ नहिक्षणोदिनमितिप्रतीतिरस्तीत्याशंक्याह ॥ नन्वेकस्येति ॥ समयभेदः समयभेदव्य
वहारः ॥ विभिन्नव्यवहारविषयइतियावत् ॥ एकस्मिन्विरुद्धनानाव्यवहारविषयत्वाभावादितिभावः ॥ उपाधिभेदादिति ॥ तथाचैकस्यकालस्यकिंचिद्धर्मविशिष्टस्यक्षणत्वं किंचिद्ध
र्मविशिष्टस्यक्षणत्वं किंचिद्धर्मविशिष्टस्यदिनत्वंनतुकेवलस्येतिभावः ॥ इदमुपलक्षणम् ॥ तादृशोपाधीनामेवक्षणत्वादिव्यवहारविषयत्वंनतुमहाकालस्येतिद्रष्टव्यम् ॥ स्वजन्ये
ति ॥ स्वंक्रिया ॥ घटगतैकक्रियानाशोत्तरोत्पन्नतत्कृतक्रियांतरजन्यविभागप्रागभावविशिष्टस्यप्रथमकर्मणःक्षणचतुष्टयावस्थायिनःक्षणत्वापत्तिरतःस्वजन्येति ॥ नन्वेवंप्रथ
मक्षणेक्षणव्यवहारोपपादनेपिद्वितीयक्षणेकथंतदुपपादनंतत्रक्रियाजन्यविभागोत्पत्त्याविभागप्रागभावाभावात् ॥ नचद्वितीयक्षणोत्पन्नक्रियांतरस्यैवनिरुक्तविशिष्टस्यत

क्षणव्यवहारोपपादनं=१ द्वितीयक्षणे=१

क्रिया=सर्व=काल= घटादि=

त्वं+

तिप्रती

संबंधघटकत्वात्=

ध्वंसेतिया·वा·भावेति आत्मासावतिध्या·वा· कार्येति=

व्यभिचारादेव=

परत्वापरत्वयोः समवायिकारणत्वे=

पिंडसंयोगाश्रयत्वे=

क्षणादिनोपाधीनां=

विनाशप्रागभावविशिष्टस्य=१

स्वाद्देनमहाप्रलयाधिकरणकालो विवक्षितः=८

स्वजन्येति पूर्वेक्यथनेन=२ क्षणव्यवहारोपपादकमुपाधिं=६ महाप्रलयेपि=१ द्वित्रिक्षणवृत्तित्वेपि=२ क्षणव्यवहाराभावे=१

त्वक्षणत्वमितिवाच्यम्॥ प्रतिक्षणं क्रियोत्पत्तौ मानाभावात्॥ अतस्तत्रापि क्षणव्यवहारोपपादकमुपाधिमाह॥ पूर्वसंयोगेति॥ स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वजन्यविभागस्य
र्थः॥ तेन स्वजन्यविभागस्य यत्किंचित्पूर्वसंयोगविशिष्टस्य द्वित्रिक्षणवृत्तित्वेपि यत्किंचिद्विभागस्य स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्य तथात्वेपि न क्षतिः॥ तृतीयक्षणोत्पत्तौ उपपा
दकमुपाधिमाह॥ पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वेति॥ स्वजन्यविभागजन्यपूर्वसंयोगनाशावच्छिन्नस्वजन्योत्तरसंयोगप्रागभाव इत्यर्थो नातिप्रसंगः॥ कचित्पुस्तके पूर्वसं
योगनाशावच्छिन्नविभागो वेति पाठः॥ स च प्रामादिकः॥ प्रथमद्वितीयचतुर्थक्षणेष्वेकैकोपाधेरेवाभिहिततया तृतीयक्षणे उपाधिद्वयाभिधाने संदर्भविरोधापत्तेः॥ उत्तरसंयोगस्योत्तरवि
भागनाशकतया सिद्धान्तसिद्धतया निरुक्तोपाधेः क्षणद्वयावस्थायिनः क्षणत्वायोगाच्च॥ यदि च तत्पाठप्रामाण्याग्रहस्तदा पूर्वसंयोगनाशस्यैव विभागनाशकत्वाभिप्रायेणासंयो
जनीयः॥ चतुर्थक्षणे तमाह॥ उत्तरसंयोगेति॥ स्वनाशकोत्तरसंयोगेत्यर्थः॥ तेन सर्वसंयोगस्योत्तरसंयोगतया तद्विशिष्टकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिर्निरस्ता॥ नन्वेतादृशक्ष
णालक्षणे महाप्रलयात्मके क्षणे व्याप्तं तत्र तादृशकर्मत्वाभावात्॥ न च महाप्रलयस्य क्षणत्वाभाव इष्ट एवेति वाच्यम्॥ तत्रापि क्षणव्यवहारस्य सत्त्वात्॥ अन्यथा महाप्रलयोत्पत्तौ उत्प
त्तिलक्षणस्यानेधिकरणक्षणवृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयावृत्तित्वरूपस्याव्याप्त्यापत्तेः॥ तत्र महाप्रलयाधिकरणक्षणाप्रसिद्धेरत आह॥ महाप्रलय इति॥ महाप्रलये क्षण
व्यवहारो नास्त्येव॥ उत्पत्तिलक्षणस्य क्षणाघटितस्यैव स्ववृत्तिध्वंसप्रतियोगिकालावृत्तित्वविशिष्टस्ववृत्तित्वरूपस्य तदुत्पत्तौ संभवादित्यभिप्रेत्योक्तं॥ यद्वेति॥ ध्वंसेनैवेति॥ स्ववृत्तिध्वंसप्रति
योगिताकयावद्ध्वंसविशिष्टसमयस्यैव तत्र क्षणव्यवहारविषयत्वादिति भावः॥ इति का[illegible]बीजं॥ प्रयोजकम्॥ कथं दिशस्तत्प्रयोजकत्वं तद्दर्शयति॥ दैशिकपरत्वापरत्वयोरिति॥ परत्वा
परत्वबुद्धिं प्रति परत्वापरत्वे निमित्ते॥ तत्र दिक्पिंडसंयोगस्तत्र दिगिति क्रमेण परंपरया दिशस्तद्बुद्धौ निमित्तत्वं बोध्यम्॥ अत्रापि बुद्धिपर्यंततानुधावनं दैशिकपरत्वापरत्वयोः प्रमाणं दर्शयि
तुम्॥ तादृशपरत्वापरत्वाभ्यामेव तदनुमितेः संभवादिति॥ प्रतीच्यादीत्यादिनोदीच्यादिपरिग्रहः॥ उपाधीति॥ वस्तुतो दिश एकत्वेपि तत्तदुपाधिभेदेन प्राच्यादिसंज्ञाभेद इति भावः॥ प्राच्यादिसंज्ञा
कनिमित्तभूतानुपाधीनाह॥ यस्तु रूपस्येति॥ पुरुषस्येति पदार्थमात्रोपलक्षणम्॥ पंचम्यर्थे षष्ठी॥ दिक्॥ स्त्रीत्वम्॥ एवमग्रेपि॥ तथा च यदपेक्षयोदयगिरिसन्निहितत्वं यन्मूर्त्ते सा ततः प्राचीत्य
र्थः॥ तदपेक्षयोदयगिरिसन्निहितत्वं च तन्निष्ठोदयगिरिसंयुक्तसंयोगापेक्षयाल्पतरोदयगिरिसंयुक्तसंयोगवत्त्वम्॥ इत्थं च मथुरायाः प्राच्यां प्रयाग इत्यत्र मथुरानिष्ठोदयगिरिसंयुक्तसंयो
गपर्याप्तसंख्याव्याप्यसंख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तवृत्तिः प्रयाग इत्यन्वयबोधः॥ एवं काशीतः प्रतीच्यां प्रयाग इत्यत्र काशीनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्या
व्यापकपर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तिः प्रयागः॥ एवमन्यत्रापि बोधा ऊहनीयाः॥ तन्निष्ठोदयाचलसंयुक्तसंयोगपरंपराघटकं यन्मूर्त्तं तेन प्राचीत्यपि वदंति॥ दी
धितिकृतस्तु दिक्कालौ नेश्वरादतिरिच्येते॥ ईश्वरस्य दिक्कालरूपत्वे जीवस्यैवेत्यत्र विनिगमनाविरहेणातिरिक्तयोस्तयोः स्वीकारः॥ न च तत्र जीवस्य जगज्जनकत्वं परत्वापरत्वज
नकत्वं च कल्प्यमीश्वरस्य तु क्लृप्तमिति लाघवमिति वाच्यम्॥ संबंधघटकयोर्दिक्कालयोर्जगज्जनकत्वाद्दिक्कालोपाधीनामेव जगज्जनकत्वकल्पनात्॥ परत्वापरत्व
मानाभावात्॥ तन्नत्कालोपाधिदिगुपाधिविशि
ष्टेश्वरादेव तत्तादिनप्राचीप्रतीच्यादिव्यव
हारोपपत्तेरित्याहुः॥ [illegible] ३१॥

क्रियाक्रियातो विभागः ततः पूर्वसंयोगनाशः ततउत्तरसंयोगोत्पत्तिस्तत विभागनाशः =४

महाप्रलये=

महाप्रलय=

महाप्रलयाधिकरणकाल=

पुरुष=

संख्या=

क्षणव्यवहार=२

रचना=

क्रियाततः विभागः ततः पूर्वसंयोगनाशः ततः विभागनाशः तत उत्तरसंयोगोत्पत्तिः एवं योजनीयः=५

महाप्रलये=

महाप्रलयाधिकरणका ल[illegible]ध्वंस[illegible]

कालदिशो=

सुखदुःखादिसमवायिकारणतावच्छेदकंविशेषो विभिन्नात्मकारणतावच्छेदकत्रिका रणतावदित्यनुमानम्=३

एतादृशकार्यकारणभावकल्पने न=८

21A

योऽस्य गुणत्वएवानुमानाभावः॥ संनिकृष्टत्वविप्रकृष्टत्वाभ्यामेव परापरव्यवहारोपपत्तेरिति वदंति॥ इतिदिग्ग्रंथः॥ सुखदुःखादीति॥ आदिना ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मपरिग्रहः॥
यद्यप्यात्मत्वस्यात्मेत्यप्रत्यक्षत्वेपि स्वात्मनि स्वरूपतो मानसप्रत्यक्षविषयत्वमस्त्येव तथापि सकलात्मसाधारणानुगतप्रत्यक्षासंभवेन जातिरूपं तत्र सिद्ध्यत्यनेकसमवेतद्व्यतिज्ञातित्वग्रहे आत्मत्वे=२
ऽनेकव्यक्तिग्रहहेतुत्वस्य सर्वसिद्धत्वादित्यनुमानमेव तत्र प्रमाणमित्यभिप्रायेण सुखादिकारणतावच्छेदकतया तत्सिद्धिः प्रदर्शिता॥ अथ सुखत्वाद्यवच्छिन्नं प्रत्यात्मत्वेन कारणत्वेमा
नाभावः॥ सुखदुःखद्वेषभावनाधर्माधर्मा अतियथाक्रमं धर्माधर्मौ निःश्रेयससाधनत्वादिज्ञानात्तं भवविहितकर्मनिषिद्धकर्मणां समवायसंबंधेन निमित्तकारणत्वावश्यकतया तत्प्रसंग
भावाज्ज्ञानवकार्याणां समवायिकारणकत्वनियमस्य तद्द्रव्यत्वेन तत्र द्रव्यं क्षिसमवेतं प्रति तत्रद्रव्यक्षित्वेन समवायिकारणत्वमादायैवोपपन्नत्वादिति चेदत्र प्राचः॥ कार्यमात्रवृत्तिजातेः स
सुखत्वाद्यवच्छिन्नं प्रत्यात्मत्वेन कारणत्वं=
मवायिकारणकार्यतावच्छेदकत्वनियमेन तादृशकार्यकारणभावस्यावश्यकत्वात्॥ न च तावता सुखत्वाद्यवच्छिन्नं प्रति सत्त्वेन द्रव्यत्वेन वा कारणत्वमस्तु॥ अदृष्टादेर्निमित्तकारण
त्वादेवातिप्रसंगविरहादिति वाच्यम्॥ व्याप्यतया फलतद्धर्मे कारणतावच्छेदके संभवति व्यापकधर्मेण कारणत्वकल्पनाया अन्याय्यत्वादित्याहुः॥ वस्तुतस्तु मनसि ज्ञानोत्पत्तिवारणाय ज्ञानत्वा
वच्छिन्नं प्रत्यात्मत्वेन हेतुत्वमावश्यकमिति॥ ननु तथाप्यात्मत्वज्ञाने भगवदात्मसाधारणप्रमाणाभाव इत्यत आह॥ [illegible] ईश्वर इति॥ आत्मा द्विविध इत्या
दिश्रुतावात्मपदव्यवहारादिति भावः॥ ननु तर्हि ईश्वरे सुखाद्युत्पत्तिः कुतो न भवतीत्यत आह॥ अदृष्टेति॥ आदिना शरीरपरिग्रहः॥ ननु तथापि नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावा कारणतावच्छेदकधर्मेत्व
इति नियमेनेश्वरस्य स्वरूपयोग्यत्वे फलोपधानापत्तिरित्यत आह॥ नित्यस्येति॥ अप्रयोजकत्वादिति॥ जलपरमाणौ स्नेहानुत्पत्त्या तादृशनियमे मानाभावादिति भावः॥ नन्वीश्वरे दुः
खं कुतो नोत्पद्यत इति चेन्न॥ मिथ्याज्ञानरूपकारणाभावात्॥ मिथ्याज्ञानस्याहेतुत्वे च मुक्तात्मन्यदृष्टोत्पत्तिप्रसंगः॥ वेदस्यात्मपदादेर्ज्ञानादिमति लक्षणावृत्तिरित्यस्वरस आह इत्येत
स्रचितः॥ इंद्रियाद्यधिष्ठितेति सत्त्वमात्मप्रमाणपरतया व्याचष्टे॥ इंद्रियाणामिति॥ आदिपदसंग्राह्यमाह॥ शरीरस्येति॥ परंपरया॥ जनकतासंबंधेनावच्छेदकतासंबंधेन वा॥ चैतन्यम्॥ ज्ञा
नवत्त्वम्॥ एतेनात्मनि प्रमाणमुपदर्शितम्॥ अचेतनं चेतनाधिष्ठितं यक्रोतीति व्याप्तेः॥ अहं सुखीत्यादिनाहं जानामि करोमीत्यादिपरिग्रहः॥ न चात्मा तावत्र प्रत्यक्ष इति सूत्रभाष्य
विरोध इति वाच्यम्॥ आत्मतत्त्वविवेके परात्माभिप्रायेण भाष्यव्याख्यानस्य प्रदर्शितत्वात्॥ विप्रतिपन्नप्रतीतीति॥ अहमिति प्रतीतेः शरीरात्मविषयकत्वे [illegible] विप्रतिपन्नप्रतीत्य
र्थः॥ मतांतर॥ णि॥ नैयायिकमते यथा मुक्तात्मनां ज्ञानाभावे न ज्ञानाधिकरणत्वरूपं चैतन्यं तथा ममापि मते मृतशरीरस्य न चैतन्यमिति शरीरमेवात्मेति चार्वाकः शंकते॥ चै
तन्यमिति॥ ज्ञानादिकं ज्ञानाद्यधिकरणत्वं॥ तदभावे॥ ज्ञानाद्यभावे॥ ननु त्वन्मते मृतशरीरे चैतन्याभावः किंनिबंधनः॥ मन्मते तु प्राणविशिष्टात्मनो विरह एव तत्र प्रयोजक इ चैतन्याभावे=
त्यत आह॥ प्राणाभावेनेति॥ तथा च लाघवात् प्राणाभाव एव चैतन्यविरहे प्रयोजक इति भावः॥ चार्वाकमतं परिहरति॥ नेति॥ स्मरणानुपपत्तेरिति॥ अनुभवाश्रयस्य बाल्यशरीर
स्य तदानीमभावादिति भावः॥ ननु बाल्यशरीरं तदा स्त्येवेत्यत आह॥ शरीराणामिति॥ संस्कार उत्पद्यत इति॥ तथा च स्वप्रयोज्यसंस्कारवत्त्वसंबंधेन बाल्यशरीरसमवेतानुभव
स्थविरशरीरकाले=१

न्यपार स्वमतेर

स्यस्य विरशरीरे सत्वात्स्मरणानुपपत्तिरिति भावः ॥ गौरवस्य फलमुखत्वाद्दूषणांतरमाह ॥ एवमिति ॥ नस्यादित्यत्र हेतुमाह ॥ इष्टेति ॥ तद्धेतुत्वात् ॥ प्रवृत्तिहेतुत्वात् तदानीं स्तन्यपान
प्रवृत्त्यव्यवहितपूर्वकाले ॥ ननु प्रवृत्त्यनुपपत्तिस्तवापि समानेत्याशंक्य स्वसमवेतप्रवृत्त्यन्यथानुपपत्तिं परिहरति ॥ मा[illegible]त्विति ॥ अन्यदपीति ॥ इष्टसाधनत्वादन्यदपीत्यर्थः ॥
अत्रानु ॥ स्तन्यपानप्रवृत्त्यनुकूलेष्टस्मरणे तु ॥ आत्मनो नित्यत्वं साधयति ॥ इत्थं चेति ॥ स्तन्यपानप्रवृत्त्यनुकूलेष्टसाधनतास्मरणे च ॥ प्रागभावस्य नाशसंभवादाह ॥ भावस्येति
नाशासंभवादिति ॥ नाशं प्रति जन्यभावत्वेन हेतुत्वादात्मनो नादित्वेन जन्यभावत्वरूपहेतोरभावेन नाशासंभवादित्यर्थः ॥ इति चार्वाकमतखंडनम् ॥ ननु च स्मरादीनामेव
ज्ञानादिकं प्रति करणत्वं कर्तृत्वं चास्त्विति ॥ करणत्वं व्यापारवत्वे सति कारणत्वम् ॥ भवति हि चक्षुरादेश्चक्षुःसंयोगादिरूपव्यापारवति चाक्षुषज्ञानाव्यवहितपूर्वकालवृत्तित्वं फलोपहितत्वं ज्ञान
सत्येन स्वाराज्यकामो यजेतेत्यादौ यागादिनिष्ठकरणत्वादावप्रसंगात् ॥ करणत्वकारणत्वयोरविशेषप्रसंगाच्च ॥ कर्तृत्वं च यद्यपि क्रियानुकूलकृतिमत्वं न संभवत्यचेतने चक्षुरादौ तथापि पूर्व
याप्तिगणातिरिक्तस्यात्मनः कृत्यादीनामात्मसमवेतत्वस्य चानंगीकरणात्कृत्याश्रयत्वमपि चक्षुरादीनामस्त्वित्यर्थः ॥ नन्वेकस्यैव कर्तृत्वे करणत्वे कर्तृकरणादिव्यवहारभेदोनुपपन्न इत्यत आ
ह ॥ विरोध इति ॥ विरोधे ॥ विभिन्नाधिकरणवृत्तित्वे ॥ तथा च कर्तृत्वकरणत्वलक्षणोपाधिभेदात्कर्तृकरणादिव्यवहारोपपत्तिरित्याशयः ॥ न चैतन्यमित्यत्र विशेष्यतयोपस्थितस्याभावस्य तच्छेदे
न परामर्शसंभवाच्चाचष्टे ॥ तथात्वे ॥ चैतन्यमिति ॥ उपघातपदस्य लोकेऽवयवनाश एव प्रयोगादाह ॥ नाश इति ॥ मूले उपघाते कथं स्मृतिरित्युक्तं तत्रोपघातः केषामित्याकांक्षायाः स
त्वादाह ॥ अर्थादिति ॥ तथा चैकमेवेंद्रियाणामिति पदमाकांक्षावशाल्लभ्यते तत्र संबध्यत इत्याशयः ॥ कथं स्मृतिरिति मूले नेंद्रियाणां चैतन्यपक्षे चक्षुरभावे स्मृत्यभाव आपादितस्तत्र हेतोरव
कैः स्वयं हेतुं पूरयन्नर्थमाह ॥ पूर्ववस्त्विति ॥ नन्विंद्रियांतरेणैव स्मृतिर्भविष्यतीत्यत आह ॥ अन्येनानुभूतस्येति ॥ अत्र हेतुमाह ॥ अननुभवेति ॥ यद्यपि व्यधिकरणयोः कार्यकारणभावविरहा
त्सामानाधिकरण्येनेत्युक्तिर्विफला तथापि यत्र विषयतासंबंधेन स्मृतिस्तत्र विषयतासंबंधेनानुभव इतींद्रियविषयत्वघटितसामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावस्यावश्यकः ॥ एप+
आत्मनिष्ठसामानाधिकरण्यघटितकार्यकारणभावे घटाद्यनुभवोत्तरं पटादौ विषयतासंबंधेन स्मृत्यापत्तेर्वारणादिति ॥ वक्तृकर्तृकानुभवस्य घटे सत्वादिंद्रियांतरकर्तृकस्मरणे तत्वा
नानुपपन्नमित्याशंकानिराकरणाय तत्र योक्तिः ॥ समवायघटितसामानाधिकरण्यप्रत्यासत्त्येति तदर्थः ॥ चैत्रस्य घटानुभवकाले मैत्रस्य घटस्मरणवारणाय तत्पुरुषीयत्वनिवेशे पुरु
षभेदेनानंतकार्यकारणभावकल्पने गौरवात्समवायघटितसामानाधिकरण्यप्रत्यासत्त्या तयोर्हेतुहेतुमद्भावस्वीकारादिति भावः इति ध्येयम् ॥ इतींद्रियवादिमतखंडनम् ॥ इंद्रिया
णां चैतन्यपक्षे यो दोषः सोत्र कल्पे नास्तीति सूचयितुं नित्यस्येति ॥ न तथेत्यत्र मूले तच्छब्देन पूर्वोपस्थितचैतन्यस्यैव परामर्शः स्यात्तथा चासंगतिरत आह ॥ न तथा न चेतनमिति ॥ अनध्य
क्षं तदा भवेदिति मूले न मनसश्चैतन्ये ज्ञानादेरप्रत्यक्षत्वमुक्तं तत्र हेतुं प्रदर्शयन्नर्थमाह ॥ मनस इति ॥ तत्प्रत्यक्षे चेति ॥ ज्ञानादिप्रत्यक्षानुपपत्तेरित्यर्थः ॥ ननु मनसोऽणुत्वमेवासिद्धमत आह ॥ यथा
चेति ॥ अग्रे वक्ष्यत इति ॥ अयोगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यत इति ग्रंथेन मनसोऽणुत्वं साधयिष्यत इत्यर्थः ॥ इति मनोवादिमतखण्डनम् ॥ विज्ञानवादी शंकते ॥ नन्विति ॥ विज्ञानमे

वेति । आत्मनिरूपणस्य प्रक्रान्तत्वात्मेत्युक्तम् । वस्तुमात्रस्यैव तन्मते विज्ञानरूपत्वादिति बोध्यम् । अत्र ज्ञानत्वं प्रमेयत्वस्य सत्त्वस्य वा व्यापकं न वेति विप्रतिपत्तिः । तत्र विधिकोटिर्योगाचा नास्तिकस्य २

र्यस्य निषेधकोटिर्नैयायिकस्येति बोध्यम् । द्विविधं विज्ञानं प्रवृत्तिविज्ञानमालयविज्ञानं चेति । तत्राद्यं घट इत्यादि प्रवृत्तिविज्ञानं । अहं ज्ञानमित्यालयविज्ञानं तदेवात्मा । तस्य विज्ञानस्य

ननु क्षणत्वादात्मा न सिद्ध्येत् सर्वोत्पन्नविज्ञानस्य क्षणिकत्वेन नाशाद्विज्ञानान्तरस्य तदानीमुत्पादकाभावादत आह । पूर्वपूर्वेति । ननु विज्ञानस्य क्षणिकत्वे तदाश्रितसंस्कारस्यापि क्ष

णिकत्वात्कालान्तरे स्मरणं न स्यादित्याशंकां परिहरति । स्मरणमदेति । विज्ञानस्य जगद्विषयत्वं यत्किंचिद्विषयत्वं वाभिप्रेतमिति विकल्प्याद्ये दूषणमाह । तस्येति । विज्ञानस्य । द्विती वि+

येत्वाह । यत्किंचिदिति । आत्मस्वरूपविज्ञानस्य सविषयकत्वे दूषणमाह । स्वप्नाविति । शंकते । तदानीं । निराकारा । निर्विषया । चित्संततिः । विज्ञानसंततिः । प्रकाशत्वे । ज्ञानत्वे । ज्ञा

नत्वस्य विषयिताव्याप्यत्वादिति भावः । अन्यथा । प्रमाणाभावेपि तत्र ज्ञानत्वस्वीकारे । आकारस्य विज्ञानातिरिक्तत्वमनतिरिक्तत्वं वेति विकल्प्याद्ये दूषणमाह । तर्हि समायातमि

ति । द्वितीये त्वाह । समूहालंबन इति । नीलपीते इति समूहालंबन इत्यर्थः । स्यादिति । तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादिति भावः । एतद्दोषमापादयति । स्वरूपं विज्ञानस्येति तो+

पं:४ विज्ञानस्वरूपस्येत्यर्थः । अविशेषादेकत्वात् । ननु नीलाकारः पीताकारश्चाभिन्न एव भेदप्रतीतिस्तु तद्धर्मयोर्नीलत्वपीतत्वयोर्भेदात्तच्च तयोरपि विज्ञानस्वरूपत्वादभेदः । नीलत्वा धर्मयोः

देरपारमार्थिकस्यापारमार्थिकविज्ञानेनाभेदासंभवादित्यभिप्रायवान् शंकते । अपोहरूपेति । अनीलव्यावृत्तिरूप इत्यर्थः । इतरथा । विरुद्धनीलत्वादीनामेकत्र समावेशे । ननु समूहालं

बनेन न नीलाकारो न वा पीताकारोऽभ्युपेयते । परं तु चित्राकार एवेति नोक्तदोष इति सर्वोक्तवासनासंक्रमं मुख्यतया दूषयति । नवेति । मातृपुत्रयोरिति । मात्रानुभूतस्य गर्भस्थेन तनयेन

स्मरणप्रसंगादिति भावः । उपादानेनानुभूतेनुपादेयेन स्मर्यत इत्यपि निरस्यति । न चेति । शंकते । उत्तरस्मिन्निति । तदुत्पादकेति । वासनोत्पादकेत्यर्थः । चितामेवेति । ज्ञानानामेव संस्का

रोत्पादकत्वे ज्ञानानंत्यात्संस्कारानंत्यापत्तिरित्यर्थः । शंकते । क्षणिकेति । अतिशयविशेषः । शक्तिविशेषः । उत्तरोत्तरज्ञानानुकूलतयेति शेषः । गौरवादिति । सरणवायमित्यापामरप्र

त्यभिज्ञानात्क्षणिकानंतशक्तितत्प्रागभावध्वंसकल्पने गौरवादित्यर्थः । ननु क्षेत्रस्थवीजादंकुरोत्पत्तिर्न कुसूलस्थवीजादतोंकुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेन हेतुत्वमंगीक्रियते । कुर्व

जातिविशेषः द्रूपत्वं चांकुरजनकतावच्छेदकतया सिद्धो जातिविशेषः । स च फलोपधायकक्षणिकसमर्थवीजमात्रवृत्तिर्वीजत्वव्याप्यः कल्प्यते । एवमत्रापि कुर्वद्रूपत्वेनैव क्षणिकशरीरेश्वरोत्त

रशरीरनिष्ठवासनोत्पादकत्वं वाच्यमत आह । वीजादावपीति । उपपत्तेः । कस्माच्चिद्वीजादंकुरोत्पत्तिः कस्माच्च नेति नियमोपपत्तेः । कुर्वद्रूपत्वाकल्पनादिति । कुसूलस्थवीजादपि धरणि

सलिलसंयोगादिरूपसहकार्यभावादेवांकुरानुत्पत्तेः कुर्वद्रूपत्वं तद्रूपेण जनकत्वं च न कल्प्यते प्रमाणाभावादिति भावः । अत्र वदंति । यत्सत्तत्क्षणिकमिति व्याप्त्या जगतः क्षणिकत्वा

त्तदनुरोधेन च कुर्वद्रूपेण कार्यप्रतिहेतुत्वं चावश्यकम् । न च तादृशव्याप्तौ मानाभावः । तादृशव्याप्त्यस्वीकारे कुसूलस्थवीजादंकुरोत्पत्तिवारणाय धरणिसलिलसंयोगादीनां सहकारित्वक

ल्पने गौरवात् । तादृशव्याप्तिस्वीकारे तु कुर्वद्रूपत्वेन हेतुत्वकल्पनात्कुसूलस्थवीजे कुर्वद्रूपत्वाभावादेवांकुरानुत्पत्तेर्न सहकारितकारणांतराणामिति लाघवात् । न

एवादीनां क्षणिकत्वनिरासेन = ५

पश्चाऽत्र =

च क्षणिकत्वमते पिवीजस्य धरणिसलिलसंयोगादेर्वा कुर्वद्रूपत्वेन हेतुत्वमित्यत्र विनिगमनाविरहेण सर्वेषां सहकारिणां कारणत्वकल्पनमावश्यकमिति वाच्यम् ॥ अस्मन्मतेऽङ्कुरं
प्रति वीजानां धरणिसलिलसंयोगादिसहकारिणां च कुर्वद्रूपत्वेनैव हेतुत्वकल्पनात् कुर्वत्त्वानंगीकारे वीजत्वधरणिसलिलसंयोगत्वादिना नाहेतुत्वकल्पने गौरवादिति ॥ तदर रूपा
मत ॥ ईदृशगौरवाये त्वया क्षणिकानंतपदार्थकल्पने तिगौरवात् ॥ न च लाघवात्कुर्वद्रूपत्वेन तेषामेकहेतुतासिद्धावीदृशगौरवं न दोषाय फलमुखत्वादिति वाच्यम् ॥ फलमु
खगौरवस्यापि दोषत्वात् ॥ किं च जगतः क्षणिकत्वे स एवायं घट इति प्रत्यभिज्ञानपपत्तिः ॥ पूर्वकालीनघटाभेदस्यैतत्कालीनघटेऽभावात् ॥ न च तज्जातीयाभेद एव तादृशप्रती सुप्रवायंघटइति =
तेर्विषयः ॥ त्वन्मतेऽपि क्षणिकत्वेन पूर्वकालीनघटवृत्तिघटत्वस्यैतत्कालीनघटेऽभावात् ॥ एतेन जगतः क्षणिकत्वे नाशत्वावच्छिन्नं प्रति सत्त्वेनैकमेव हेतुत्वमिति लाघवमित्यप्या
पास्तम् ॥ यदपि स्थिरपदार्थांगीकारे एकस्मिन्पदार्थे सामर्थ्यमसामर्थ्यं च विरुद्धमतस्तद्भेद इति ॥ तदपि न ॥ एकस्मिन्नेव पदार्थे एककालावच्छेदेन सामर्थ्यतदभावयोरेव विरुद्धत्वा स्मि
प्राक्कालभेदेन तत्स्वीकारे वाधकाभावात् ॥ यत्तु पूर्वापरकालीनधर्मिणोरभेदे तद्धर्मयोः सामर्थ्यासामर्थ्ययोर्भेदोऽनुपपन्नस्तन्मते धर्मधर्मिणोरभेदादिति ॥ तन्न ॥ घटत्वेन घट इ
त्यादिप्रतीतीनां प्रामाण्यापत्त्या धर्मधर्मिणोरभेदस्य वक्तुमशक्यत्वादिति ॥ इति क्षणिकविज्ञानभंगखंडनम् ॥ वेदांती शंकते ॥ अस्त्वेतर्हीति ॥ क्षणिकविज्ञान इति ॥ आत्म
नः क्षणिकविज्ञानस्वरूपत्वपक्ष इत्यर्थः ॥ आत्ममात्रस्य नित्यविज्ञानरूपत्वमीश्वरस्यैवेति विकल्पाद्ये दूषणमाह ॥ तस्येति ॥ दर्शितत्वादिति ॥ तस्य जगद्विषयकत्व इत्यादिग्रंथे
दर्शितत्वादित्यर्थः ॥ तथा च जीवस्य तथात्वासंभवान्नात्ममात्रस्य नित्यविज्ञानरूपत्वमिति भावः ॥ ननु जीवस्य जगद्विषयकत्वं न वा नियतं यत्किंचिद्विषयकत्वं ब्रूमः ॥ परंतु यद्विष
यकत्वं यत्र जीवेनुभवसिद्धं तत्र तद्विषयकत्वमत आह ॥ सविषयकत्वस्येति ॥ नन्वसत्यं ज्ञानमिति श्रुतिरेव जीवस्य ज्ञानस्वरूपत्वे प्रमाणमत आह ॥ सत्यमिति ॥ ननु जीवब्रह्मणोरै
क्यान्नित्यविज्ञानरूपत्वं जीवस्य निरावाधमित्यतो जीवब्रह्मणोर्भेदं साधयति ॥ ज्ञानाज्ञानेति ॥ सुखित्वादीत्यादिना दुःखित्वपरिग्रहः ॥ सुतरामिति ॥ जीवात्मनो नानात्वसिद्धावीश्वर
स्यैकस्यानेकात्मकजीवात्मकत्वासंभवादेकत्वानेकत्वयोर्विरोधादिति भावः ॥ ईश्वरभेदः ॥ ईश्वरजीवात्मनोर्भेदः सिद्ध्यतीत्यर्थः ॥ अन्यथा ॥ ईश्वरस्य जीवात्मकत्वे ॥ बंधमोक्षेति
कश्चित्संसारी कश्चिन्मुक्त इति व्यवस्थानुपपन्ना स्यादित्यर्थः ॥ चैत्रमैत्रात्मनोरीश्वरस्वरूपयोरैक्यादिति भावः ॥ ननु कथं तर्हि तत्त्वमसीत्यादितद्वाक्यप्रतिपाद्यब्रह्मणा सह
रूप्रतिपाद्यजीवस्याभेदबोधको वेदः प्रमाणमित्यत आह ॥ योपीति ॥ मोक्षकाले जीवात्मनां ब्रह्मणा सहाभेद उत्पद्यत इति मतं निरस्यति ॥ मोक्षेति ॥ भेदस्यानित्यत्वमभ्युपेत्यापि निर्धर्मकइति =
मोक्षकाले जीवब्रह्मणोर्भेदं व्यवस्थापयति ॥ भेदनाशेपीति ॥ भेदसत्त्वे व्यक्तिद्वयं निर्विवादमेवेत्ययिनाश्रितम् ॥ नव ॥ वेदांतिनः ॥ निर्धर्मक इति ॥ इदं च सत्यत्वाभावेपीत्यत्र हे
तुतयोक्तम् ॥ ननु निर्धर्मकत्वं स्वभिन्नधर्मशून्यत्वं मिथ्यात्वाभावरूपसत्यत्वस्य ब्रह्मरूपत्वात् भावस्य चाधिकरणात्मकत्वान्नानुपपन्नमित्यभिप्रायेण शंकते ॥ मिथ्यात्वा
भाव इति ॥ ननु कथमेकत्वाधिकरणे तदभावरूपद्वित्वमत आह ॥ प्रत्येकमिति ॥ ननु ब्रह्म विद्ब्रह्मैव भवतीति श्रुतेर्मोक्षे सामभेद उत्पद्यत इत्यर्थिकायाः का गतिरत आह ॥ योपि तत+

एकत्वा: या

मावो कुसूलस्थवीजेऽसा मर्थ्ये धरणिस्थेसाम र्थ्य=६ सामर्थ्यासाम र्थ्य=

नित्य विज्ञानरूपत्वा=ः

निपातानां विशेषणत्वाभावेन भेदेनान्वयस्या
व्युत्पन्नत्वात् = ५

23A तदानीमिति ॥ अत एव ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः साम्यप्रतिपादकत्वादेव ॥ निरंजनः ॥ निर्दुःखः ॥ द्वितीये दोषमाह ॥ ईश्वरोपीति ॥ विज्ञानपदेन ॥ नित्यमित्यादिश्रुत्यंतर्गतविज्ञानपदेनाधिकर
णात्युक्तेन विज्ञानपदेन विज्ञानाश्रयं बोधनादिति भावः ॥ आनंदवदित्यर्थ इति ॥ मत्वर्थीयाच्च प्रत्ययात्तेनानंदशब्देनानंदवतो बोधनात् ॥ अन्यथानंदमिति न पुंस्त्वकत्वानुपपत्तेरिति भावः ॥
नत्वानंदवदित्यर्थो न संगच्छते ॥ तव मते ईश्वरे आनंदाभावादत आह ॥ आनंदोपीति ॥ लक्षणाकल्पनमेव दोष इत्यत आह ॥ अत्र क्वेति ॥ अखंडमिति ॥ अखंडत्वाश्रयत्वं तत्त्वाद्यसमासाखंडभेद
बोधनादिति भावः ॥ कष्टकल्पनापत्तेरिति ॥ बहुव्रीहावन्यपदार्थलाभार्थं नञस्तत्र लक्षणापत्तेरित्यर्थः ॥ न च नञ्तत्पुरुषेपि नञो लक्षणावश्यकी ॥ अन्यथा नञर्थस्य नामार्थतया भेदेना
न्वयासंभवादिति वाच्यम् ॥ तस्य नामत्वेपि निपातत्वादिति ॥ ननु नञ्तत्पुरुषेपि नञः खंडपदयोरेकधर्मिबोधकत्वलक्षणं सामानाधिकरण्यमनुभवसिद्धम् ॥ अन्यथा तयोः समास सामानाधिकरण्याङ्गीकारे = ५
तवा+ वचनत्वानुपपत्तेरतस्तत्र बहुव्रीहावर्थे नञोभाववतिलक्षणावश्यकीत्यत आह ॥ प्रकरणेति ॥ प्रत्ययविरोधादिति ॥ आनंदशब्दस्य पुंल्लिंगत्वनियमेनानंदमिति रूपस्य मत्वर्थीयाच्च प्रत्ययं विना
नुपपत्तेरिति भावः ॥ इति वेदांतमतखंडनम् ॥ सांख्यमतं दूषयितुमुपन्यस्यति ॥ एतेनेति ॥ एवोक्तयुक्त्यात्मनि ज्ञानवत्त्वसाधनेन वक्ष्यमाणयुक्त्या चेत्यर्थः ॥ प्रकृतेरिति ॥ मूलप्रकृतिरित्यर्थे
कर्त्रीति ॥ कर्तृत्वं चात्र कर्तृभूतांतःकरणप्रकृतित्वम् ॥ अनवक्लृप्तिमत्त्वलक्षणकर्तृत्वस्यांतःकरणधर्मत्वादिति ध्येयम् ॥ पुष्करपलाशवदिति ॥ पद्मपत्रवदित्यर्थः ॥ तथा च यथा प
द्मपत्रमम्भसा लिप्तं न भवति तथा पुरुषः कर्तृत्वाद्याश्रयो न भवतीति भावः ॥ तथा च पुरुषः कर्तृत्वाभाववान् कारणत्वाभावादित्यनुमानं तत्र प्रमाणं बोध्यम् ॥ ननु कारणत्वस्य चात्र हेतुत्वमसिद्धि पुरुषस्य कर्तृत्वाद्यानाश्रयत्वे
रत आह ॥ कार्यकारणयोरिति ॥ तस्यादिति ॥ माभवत्वित्यर्थः ॥ तस्य ॥ पुरुषस्य ॥ नन्वेतादृशपुरुषसत्त्वे किं मानमत आह ॥ बुद्धिगतेति ॥ कश्चित्प्रसिद्धस्यैव चेतनस्य बुद्धावारोपसंभवादिति भावः ॥
प्रकृतेरिति ॥ मूलप्रकृतेरित्यर्थः ॥ ननु पुरुषस्य कर्तृत्वाभावे तत्र धर्माधर्मयोरुत्पत्त्यभावात्तदधीनसुखदुःखयोरप्यनुत्पत्तेर्दुःखध्वंसरूपमोक्षः पुरुषस्य न स्यादत आह ॥ तत्सत्त्वासत्त्वा
भ्यामिति ॥ बुद्धिसत्त्वासत्त्वाभ्यामित्यर्थः ॥ बुद्धिसत्त्वे इंद्रियप्रणालिकया तत्परिणामेनायं घट इत्यादिज्ञानेन संबद्धो घटादिविषयः स्वाकारज्ञानपरिणामि बुद्ध्या गृहीता संसर्गिकत्वसंबंधेन पु
रुषनिष्ठः पुरुषस्वरूपतिरोधानेन पुरुषस्य संसारसंपादकः ॥ बुद्धिनाशे तु तत्परिणामस्यायं घट इत्यादिज्ञानरूपस्याभावाद्विषयावच्छेदाभावात्कैवल्यावस्थानं पुंसो मोक्षः ॥ दुःखसंबंधस्तु संस
योः संसारमोक्षौ तु न पुंसः किं तु बुद्धेरेवेति भावः ॥ न तु पुरुषे साक्षात्संबद्ध एव विषयोस्तु स एव तस्मिन् संसारव्यवहारनियामकोस्तु ॥ किमुक्तबुद्धिघटितपरंपरासंबंधेनेत्यत आह ॥ तस्या एवेति ॥ तथा
च विषये बुद्धेरेव संबंधः ॥ पुरुषसंबंधस्तु बुद्धिपुरुषयोरसंसर्गिभावात् ॥ न तु पुरुषे साक्षात्तत्त्वेन विषयसंबंधोस्ति मानाभावात् ॥ न च विषयप्रकाशार्थं साक्षात्संबंध एव स्वीकार्यः किमुक्तपरं
विषयसंबंधस्य परयेति वाच्यम् ॥ तस्य पुरुषस्वभावनिबंधनत्वे पुरुषस्य नित्यत्वेन तत्स्वभावाधीनविषयसंबंधस्य सर्वदा सत्त्वान्मोक्षाभावप्रसंगात् ॥ घटप्रकाशकालेपि पटादिरूपविषयस्वभावाधीनस्य घटा
दिरूपविषये तस्य संबंधस्य सत्त्वात्पटादेरपि प्रकाशापत्तेरिति ॥ यद्वा बुद्धितो ज्ञानस्य भेदमाह ॥ तस्या एवेति ॥ तथा च बुद्धेः परिणतिर्ज्ञानं न तु बुद्धिरेवेति भावः ॥ भेदाग्रहादिति ॥ बुद्धिपुरुषयो
दि र्भेदाग्रहादित्यर्थः ॥ इदानीं बुद्धितदुपलब्ध्योर्भेदप्रदर्शनाय बुद्धेरंशत्रयं प्रदर्शयति ॥ ममेदमित्यादिना ॥ पुरुषोपरागः ॥ पुरुषसंबंधः ॥ दर्पणस्य यथा मुखसंबंधः प्रतिबिंबमात्रात्मतात्त्विकस्तथा
बुद्धिपुरुषयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपराग इत्यर्थः ॥ इंद्रियप्रणालिकया ॥ इंद्रियद्वारा ॥ परिणतिभेदः ॥ अयं घट इत्यादिज्ञानरूपः परिणाम एव विषयेण घटादिना बुद्धेः संबंधः

२५

न्या॰कु॰टी॰ २५

इत्यर्थः ॥ तस्य यौक्तिकत्वे निम्नामाभिहितं दर्पणस्य मलिनं माहरपोतः ॥ कर्तव्यमिती ति ॥ एवोक्तपुरुषोपरागविषयोपरागाभ्यां कर्तव्यस्य घटादेरेवभासस्तेन कर्तव्यमित्यध्यवसायो व्या

पारावेश इत्यर्थः ॥ ज्ञानेन पुरुषस्यातात्विकः संबंध इति ॥ अत्र ज्ञानेन पुरुषस्य योतात्विकः संबंधः स उपलब्धिरुच्यत इत्यन्वयः ॥ अतात्विके दृष्टांतो दर्पणमलिनमेव मुखस्य संबंध इ

ति ॥ तथा च ज्ञानेन स चेतनोहं ... जानामीत्याकारो बुद्ध्यावारोपितस्य यः संबंधोऽतात्विकः स उपलब्धिर्न तु बुद्धिरेवोपलब्धिरिति भावः ॥ कृति सामानाधिकरण्येति ॥ अहंत्वस्याती

न्द्रियत्वेपि धार्मिकोहं करोमीति न दृश्योऽयमीतभान ... तस्यात्यन्तं बोध्यम् ॥ परिणामित्वादिति ॥ अनित्यधर्माश्रयत्वादित्यर्थः ॥ कृत्यदृष्टभोगानामिवेति ॥ कृतिः स्वसमानाधिकरण

मेवादृष्टं जनयति तच्चादृष्टं स्वसमानाधिकरणमेव भोगं जनयतीति कृत्यदृष्टभोगादीनां परस्परसामानाधिकरण्यप्रमितिवच्चेतनोहं करोमीति सामानाधिकरण्यप्रतीतेरित्यर्थः ॥ तद्भि

न्ने ॥ कर्तृभिन्ने ॥ मानाभावादिति यस्य चैतन्य इत्यादि ॥ चः एवोक्तदूषणसमुच्चायकः ॥ कर्तृत्वाश्रयो न चेतनोऽन्यधर्माश्रयत्वाद्घटवदिति बाधकसत्वाच्चेतनोहं करोमीति प्रतीतिर्भ्रमेत्यो

रोभ्रम इत्याशंकते ॥ परिणामित्वादिति ॥ कृत्यंशेपीति ॥ बुद्धिः कर्तृत्वाभाववती जन्यधर्माश्रयत्वादिति बाधकस्य तत्रापि सत्वादिति भावः ॥ अन्यथेति ॥ कर्तृचैतन्यभेदांगीकार इत्यर्थः ॥

बुद्धेर्नित्यत्व इति ॥ कर्तृभिन्नस्य चेतनस्यांगीकारे तस्मिन्सुखदुःखाभावात्संसारमोक्षयोरनुपपत्त्या पूर्वोक्तरीत्या बुद्धिसत्वासत्वाभ्यामेव संसारापवर्गौ वाच्यौ ॥ तथा च बुद्धेर्नित्यत्वेन त

त्सत्वनिबंधनस्य संसारस्य सर्वदापत्त्या मोक्षाभाव एव स्यात् ॥ बुद्धेरनित्यत्वे तु तत्र जन्यत्वं स्वीकरणीयमजन्यस्य नाशासंभवात् ॥ तथा च तदुत्पत्तेः पूर्वं तत्सत्वनिबंधनः संसारो न स्यादित्य

र्थः ॥ तत्कृतस्यैतदित्यत्तेः पूर्वं तदाश्रितादृष्टादेरभावाद्बुद्धेरनुत्पत्त्या संसारः कदापि न स्यादित्यवधेयम् ॥ असिद्धेरिति ॥ बुद्धेः प्रकृतिकार्यत्वाभावादित्यर्थः ॥ ननु कर्तृत्वेन जन्यत्वानुमि

तिः परिशेषात्प्रकृतिजन्यत्वविषयिणी स्यादत आह ॥ कर्तुरिति ॥ कर्तृत्वस्य जन्यत्वव्याप्यत्वेनानुकूलतर्काभावादित्यर्थः ॥ प्रत्युत तद्विपरीतानादित्वग्राहकतर्कसत्वात्तदनादित्व

मेव कर्तुरित्याह ॥ वीतरागेति ॥ वीतरागाजन्मदर्शनादिति न्यायसूत्रम् ॥ सरागजन्मदर्शनादिति तदर्थः ॥ अनादित्वमिति ॥ स्तन्यपाने बालस्य प्रवृत्तिर्नेष्टसाधनताज्ञानमंतरेण ॥ न चानु

भवस्वरूपं बाधात् ॥ स्मरणस्य स्वसमानाधिकरणपूर्वानुभवसापेक्षतया पूर्वजन्मसत्वे पूर्वजन्मन्यपि प्रथमप्रवृत्त्यनुरोधेन तत्पूर्वस्येव जन्मनः सिद्धावनादित्वमात्मन इति भावः ॥

अनादेरित्यस्य भावस्येति शेषः ॥ जन्यभावत्वेन नाशहेतुत्वादिति भावः ॥ न च प्रकृतेरिति ॥ प्रकृतिर्मीमांसस्यां गुणाः सत्वरजस्तमोलक्षणाः क्रियमाणानि कर्माणि भवंति ॥ अहंकारवि

मूढात्मा कर्ताहमिति मन्यते इत्यर्थेन भगवद्वचनेनेत्यर्थः ॥ तेनात्मनः कर्तृत्वाभावप्रतिपादनादिति भावः ॥ अहमेवेति ॥ तथाह

भगवद्वचनेन=

च तेन स्वतंत्रकर्तृत्वाभाव एवात्मनि प्रतिपद्यते न तु कर्तृत्वसामान्याभाव इति भावः ॥ प्रकृतीकृतीयमिति ॥ अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ॥ विविधाश्च पृथक्चेष्टा दैवं चात्र पंच

ममित्यनेन पंचानामपि कर्तृत्वं प्रतिपाद्यते तत्रैवं सतीत्यादिना पि स्वतंत्रकर्तृत्वस्यैवात्मनो निषिद्धत्वादिति भावः ॥ एवं पुरुषस्यैव कर्तृत्वमस्तु ॥ न च कारणत्वाभावेन कर्तृत्वाभावस्तत्र साधनीय

कारणत्वाभाव=

इति वाच्यम् ॥ स्वरूपासिद्धेः कार्यकारणयोर्भेदात्कार्येनाशे कार्यरूपतया नाशो न स्यादित्यकारणत्वं पुरुषस्यैवापि न सत् ॥ कार्यकारणयोरभेदस्यैवासिद्धत्वादित्यादि विस्तरभियानोक्तमि

त्यभिप्रायवानाह ॥ संक्षेप इति ॥ इति सांख्यमतखंडनम् ॥ नद्याश्रयत्वे ॥ धर्मीधर्म्याश्रयत्वे ॥ अन्यथा ॥ विशेषणगुणसंबंधाद्धते ॥ इत्यादिप्रतीतेरिति ॥ इत्यादौ ज्ञानादिसंबंधप्रकारेणैवात्मनः प्रत्यक्ष

त्वानुभवसिद्धत्वादित्यर्थः ॥ परकीयप्रत्यक्षादेरतींद्रियत्वेन हेतुज्ञानासंभवात्स्वरूपासिद्धेश्चाह ॥ प्रवृत्तिरचेति ॥ प्रकृतायत्वादिति ॥ शरीरस्य न चैतन्यमित्यनेनोक्तत्वादित्यर्थः ॥ इच्छादीनामभावस्येकैकत्वेनानुक्तेः प्र

भगवद्वचनेन=

गोतमीयाः=२
मीमांसैकदेशिनः=२
भाट्टाचार्यानुसारिणः मीमांसकाः=३
संभवो नामखार्यां द्रोणाढक संभावनोपनायकं मानम्=२
शरीरवादिनः=

२५A

श्रीगणेशाय नमः ॥ मूले बुद्धिस्तु द्विविधा मता ॥ अनुभूतिः स्मृतिश्च स्यादिति ॥ तत्रानुभूतिः प्रत्यक्षात्मिकैवेति चार्वाकाः ॥ अनुमितिरपीति कणादसुग-
तौ ॥ उपमितिरपीति केचन न्यायैकदेशिनः ॥ अर्थापत्तिरपीति प्राभाकराः ॥ अनुपलब्धिरपीति भाट्टा वेदान्तिनश्च ॥ संभवैतिह्यरूपापीति पौराणिकाः ॥ तत्सर्वम्
उपक्रमिति संसूचयितुमनुभूतेश्चातुर्विध्यमाह ॥ अनुभूतिश्चतुर्विधेति ॥ अनुमिनोम्युपमिनोमि शाब्दयामीति प्रतीतिसिद्धानामनुमित्यादीनां उर्वोरतया चार्वाकोदितम्
प्रक्रमं ॥ अर्थापत्तेश्चानुमितावंतर्भावो व्यतिरेकिग्रंथे व्यक्तीभविष्यति ॥ अनुपलब्धेस्त्वभावे एवांतर्भावः ॥ अन्यासां च यथायथमनुमित्यादावंतर्भाव इति भावः ॥ उद्दिष्टा-
सु प्रमासु प्रथमोपस्थितत्वात्प्रत्यक्षं लक्षयति ॥ चक्षुरादिज्ञानमिंद्रियजन्यमिति ॥ इंद्रियजन्यत्वमिंद्रियचक्षुरादावप्यस्त्यतो ज्ञानमिति ॥ अनुमित्यादावतिव्याप्तिवारणायें-
द्रियजन्यमिति ॥ इंद्रियजन्यत्वविशेषणोपादानेप्यनुमित्यादावतिव्याप्तिस्तदवस्थेत्याशंकते यद्यपीति ॥ नन्विंद्रियजन्यत्वाभावादीश्वरप्रत्यक्षेऽव्याप्तिरत आह ॥ ईश्वरप्र-
त्यक्षं त्विति ॥ तथा च जन्यप्रत्यक्षमेव लक्ष्यमिति भावः ॥ ननु तस्यैव लक्ष्यत्वे किं मानमत आह ॥ इंद्रियार्थेति ॥ इंद्रियार्थसन्निकर्षोत्पन्नमित्यनेनेश्वरप्रत्यक्षमनुमित्यादिव्य-
वावर्तिते ॥ भ्रमवारणायाह ॥ अव्यभिचारीति ॥ भ्रमभिन्नमित्यर्थः ॥ एतावता प्रत्यक्षप्रमाया लक्षणमुक्तम् ॥ तद्विभागमाह ॥ अव्यपदेश्यमिति ॥ निर्विकल्पकमित्यर्थः ॥
न चाव्यपदेश्यपदेन कथं निर्विकल्पकमिति वाच्यम् ॥ व्यपदेशः पदवाच्यत्वं तद्विषयकमित्यर्थो ॥ हि विशिष्टज्ञाने तत्तत्पदवाच्यत्वमनुपनीतं भासत इति प्राचीनमतानुसारि-
त्वात् ॥ अत एव कणादं कणादनामानं मुनिमित्यादितत्र तत्रोक्तं संगच्छते ॥ यद्वा व्यपदेशः शब्दप्रयोगः स च विशिष्टज्ञानादेवेत्यव्यपदेश्यत्वेन व्यपदेशानर्हत्वेन निर्वि-
कल्पकलाभः ॥ व्यवसायात्मकमिति ॥ विशिष्टव्यवसायात्मकमिति ॥ विशिष्टज्ञानात्मकमिति यावत् ॥ एवं च सूत्रे इंद्रियार्थसन्निकर्षोत्पन्नमव्यभिचारि अव्यपदेश्यं व्य-
वसायात्मकमिति योजना बोध्या ॥ अन्यथा लक्षणवाक्ये विभागबोधकपदेन व्यवधानादसंगतेरिति ॥ तथैवोक्तत्वादिति ॥ ईश्वरप्रत्यक्षालक्ष्यत्वस्यैवाभिप्रेतत्वादि-
त्यर्थः ॥ ईश्वरप्रत्यक्षस्य लक्ष्यत्वमभिप्रेत्याह ॥ अथवेति ॥ ज्ञानाकरणकमिति ॥ ज्ञानाजन्यमित्युक्तौ चाव्याप्तिः ॥ विशिष्टज्ञानमात्रस्य विशेषणज्ञानजन्यत्वादतो ज्ञा-
नाकरणकमिति ॥ ज्ञानाजन्यमित्युक्तौ चाव्याप्तिः ॥ विशिष्टज्ञानमात्रस्य विशेषणज्ञानजन्यत्वादतो ज्ञानाकरणकमिति ॥ अनुमित्यादौ व्याप्त्यादिज्ञानस्य करण-
त्वमस्त्येवेति नानुमित्यादावतिव्याप्तिः ॥ अकरणत्वादेव चेश्वरज्ञानसंग्रहः ॥ अथ निदिध्यासनद्वारा मननादिज्ञानकरणके योगिप्रत्यक्षे लक्षणमिदमव्यापकमि-
ति चेन्न ॥ ज्ञानाकरणकपदेन ज्ञानत्वगर्भधर्मावच्छिन्नकरणकत्वाभावस्य विवक्षितत्वात् ॥ न चेदं योगिप्रत्यक्षाव्यापकं श्रवणादिप्रतिपत्तीनां शाब्दत्वादिनैव जनकत्वे-
न विशिष्टाभावसत्त्वादिति ॥ अथवा ज्ञानकरणकत्वाव्यभिचारिजातिशून्यज्ञानत्वमिह विवक्षितम् ॥ तादृशी च जातिरनुमितित्वादिरेवेति ॥ एतेनानुमित्यादौ व्याप्ति-
ज्ञानादेर्ज्ञानत्वेन करणतानये ज्ञानत्वघटितकरणतावच्छेदकधर्माप्रसिद्ध्याऽसंभवोपि प्रत्युक्त इति ॥ व्याप्तिज्ञानस्येति ॥ षष्ठ्यंतं चेदं तृतीयस्य करणत्वादित्यनेनान्व-
यः ॥ न च स्मरणात्मकपरामर्शस्थले व्याप्तिज्ञानस्य करणत्वासंभव इति वाच्यम् ॥ तत्र व्याप्तिज्ञानस्य संस्कारद्वारा हेतुत्वात् ॥ न च ज्ञानपदस्य सविषयकपरत्वमेवास्तां ॥

५+
त्वाभ+
विशिष्टज्ञाने तत्तत्पदवाच्यत्वभासनादेव=
इत्यन्वयेन जाने=
व्याप्तिज्ञानत्वादि=
ज्ञानत्वगर्भधर्मावच्छिन्नकरणकत्वाभावसत्त्वादित्यर्थः=३

क्षणिकविज्ञानवादिनः=१
प्रत्यक्षप्रमा=
अलौकिके=
इत्यर्थे ज्ञाते सति=
अव्यपदेश्यपदेन=
म+

ज्ञानत्वं गर्भे मध्ये यस्य एतादृशो यो धर्मः तेन अवच्छिन्नं करणं यस्य स ज्ञानत्वगर्भधर्मावच्छिन्नकरणकः तस्य भावः तत्त्वं तस्याभावस्य=४
व्याप्तिज्ञानत्वादिरेव धर्मः=
स्मरणात्मकपरामर्शस्थले=१
द्वारा+
तथा च व्याप्तिज्ञानपदेन केवलं तस्य व्यग्रहणं व्याप्तिविषयकपदेन च संस्कारादेरपि संग्रह इति भावः=१

कार्यवैजात्यौपपत्तेः=११ स्मरणात्मकपरामर्शस्थले=१ व्याप्तिविशिष्टपक्षधर्मताज्ञान=६ आदिशब्देनकृतेःपरिग्रहः=१ विशेषणेयद्विशेषणंतद्विशेषणतावच्छेदकंउच्यते=४

किंव्याप्तिज्ञानस्यसंस्कारद्वारातत्रहेतुत्वकल्पनेनेतिवाच्यम्॥ रक्षादितःसंस्काराद्वानुमितेरनुत्पत्त्यासविषयकत्वस्यातिप्रसक्तत्वात्॥ साध्यज्ञानस्य॥ साध्य
ष्यप्रकारकज्ञानस्य॥ तत्र॥ अनुमित्यादौ॥ अनुमितिंलक्षयति॥ परामर्शेति॥ परामर्शत्वंचव्याप्तिविशिष्टपक्षधर्मताज्ञानत्वम्॥ तथाचव्याप्तिविशिष्टप
अनुमितौ=४ क्षधर्मताज्ञानजन्यंज्ञानमनुमितिरितिफलितं॥ भवतिहिवह्निव्याप्यधूमवानयंपर्वतइतिज्ञानंव्याप्तिविशिष्टपक्षधर्मताज्ञानंतज्जन्यंपर्वतोवह्निमानिति
ज्ञानमितितत्रलक्षणसमन्वयः॥ यद्यपीत्यादि॥ प्रत्यक्षादिकमित्यादिनाविशेषणतावच्छेदकप्रकारकनिश्चयविधयापरामर्शजन्यस्यविशिष्टवैशिष्ट्यबोध व्याप्तिविशिष्टहेतुमत्त्वेनधूमवान्पर्वतादिरित्याकारकोबोधः
परामर्शप्रत्यक्षे विशिष्टवैशिष्ट्यबोधे=५ स्यपरिग्रहः॥ परामर्शजन्यमिति॥ विषयविधयातत्रपरामर्शस्यहेतुत्वादितिभावः॥ कादाचित्केति॥ धूमवान्पर्वतोवह्निमानित्यनुमितौपक्षतावच्छेदकविर
अनुभवत्वव्याप्यैत्यर्थः= धयाधूमस्यभानादितिभावः॥ तादृशेति॥ कथितेनिश्चयजन्यहेतुत्वविषयकेत्यर्थः॥ सन्नामादायातिव्याप्तिरतोनुभवत्वव्याप्येति॥ अनुभवत्वन्यूनवृत्तित्व
तद्दृष्टेः॥ तेननानुभवत्वजातिमादायप्रत्यक्षादावतिव्याप्तिः॥ जातिमत्त्वंचसमवायेनविवक्षितम्॥ तेनकालिकसंबंधेनजातिमतिकालेनातिव्याप्तिः॥ पक्षधर्म अनुमितित्व=७
तायाअप्रवेशेनलाघवाल्लक्षणांतरमाह॥ अथवेति॥ अत्रापिसाध्यतावच्छेदकधर्मसाध्यतावच्छेदकसंबंधहेतुतावच्छेदकधर्महेतुतावच्छेदकसंबंधानामन
नुगमादेकव्याप्युपादानेऽन्यानुमितावव्याप्तेरेकोव्याप्तिमुपादायतज्ज्ञानकरणकत्वत्वस्यानुभवत्वव्याप्यजातिमत्त्वंविवक्षणीयम्॥ नन्वनुमितिंप्रत्यक्षमपिनव्याप्
प्तिज्ञानत्वेनकरणत्वंकिंतुज्ञानत्वेनमनस्त्वेनैववा॥ एवमुपमित्यादावपिमनस्त्वेनैवकरणत्वम्॥ नचकार्यवैजात्यंनस्यादितिवाच्यम्॥ सामग्रीवैलक्षण्य
[illegible]=११ दैवतदुपपत्तेः॥ नचप्रमाणविभागानुपपत्तिः॥ क्रियाविशेषात्तदुपपत्तेरतःपूर्वोक्तानुमित्यादिलक्षणानामसंभवइत्यतआह॥ वस्तुतइति॥ घटेऽतिव्याप्तिवा प्रमाणविभागोपपत्तेः=११
रणायवृत्त्यंतम्॥ वृत्तित्वंसमवायेनविवक्षितम्॥ तेनानुमितौकालिकेनघटत्वस्यवृत्तित्वेपिनातिव्याप्तिः॥ ज्ञानत्वानुभवत्वादिकमादायप्रत्यक्षादावति
व्याप्तिवारणायविशेष्यदलम्॥ ननुमनसःकरणतापक्षेज्ञानाकरणकत्वंप्रत्यक्षलक्षणमनुमित्यादावतिव्याप्तमतआह॥ एवमिति॥ प्रत्यक्षत्वादिकमिति प्रत्यक्षस्यलक्षणांतरं+
यत्किंचिदुपमितिव्यक्तिमादायतद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातिमत्त्वमुपमितित्वम्॥ यत्किंचिच्छाब्दबोधव्यक्तिमादायतद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातिम
त्त्वंशाब्दबोधत्वंनिर्वाच्यमित्यर्थः॥ शब्दभेदेनानुमित्यादीनांलक्षणकथनमनुभवत्वनात्वंगीकारेण तदनंगीकारेतद्व्यक्तिसमवेतस्मरणासमवेतधर्मसमवा सत्तावारणायस्मरणासमवेतेति=५
यित्वरूपस्यलक्षणस्यचतदुपस्थित्यैकशब्देनवक्तुमशक्यत्वादितिध्येयम्॥ उक्तसूत्रेति॥ इंद्रियार्थसन्निकर्षोत्पन्नमित्या द्युपदर्शितसूत्रानुसारादित्यर्थः॥ घ्राण
य॰ स्यनिर्विषयकत्वादाह॥ ग्राह्यइति॥ करभित्वादौत्यादिनाऽकरभित्वपरिग्रहः॥ तद्वृत्तीति॥ गंधवृत्तीत्यर्थः॥ उद्भूतेति॥ उद्भूतपदस्यकृत्यमाह॥ ग्रीष्मेति॥ ऊष्मादावि
त्यादिनाचक्षुःप्रविशतेजःपरिग्रहः॥ ननतत्प्रत्यक्षम्॥ नोष्मादिगतरूपप्रत्यक्षम्॥ न्यूनतापरिहर्तुमाह॥ पृथक्त्वादिकमपीति॥ आलोकसंयोगेति॥ एतस्यच आलोकसंयोगस्य=
कारणत्वमंधकारेचाक्षुषापत्तिवारणाय॥ उद्भूतरूपस्यतुपिशाचादीनांप्रत्यक्षवारणायेत्यवधेयम्॥ तयोः॥ उद्भूतरूपालोकसंयोगयोः॥ रूपभिन्नस्पर

रूपस्य कारणतावच्छेदक=१

वहिरिंद्रियजन्यप्रत्यक्षे=३

रूपत्व=३

25A प

पत्वादेस्त्वगिंद्रियेणाग्रहणादाह॥रूपत्वादिभिन्नमिति॥आदिनानीलत्वादिपरिग्रहः॥ ... यकलादिकमपीति आलोकसंयोगेति द्रव्याध्यक्षइति
श्चाक्षुषेपिनलन्तरान्व यीतिबोधयितुं रूपत्रापिकारणतेद्रव्याध्यक्षइत्यंतेप्रतीकधारणं॥शंकते॥वहिरिंद्रियेति॥ननुकार्याभावेकारणाभावस्यप्रयोजकतयागगना
नादौवहिरिंद्रियजन्यप्रत्यक्षाभावेरूपाभावस्यप्रयोजकत्वकल्पनेगौरवात्तत्रापिप्रत्यक्षेरूपत्वेनहेतुताकल्पयित्वातद्वच्छिन्नाभावत्वेनैवतादृशप्रत्य
क्षाभावेप्रयोजकत्वमुचितमित्यतआह॥आत्मावृत्तीति॥आत्मनोवहिरिंद्रियजन्यप्रत्यक्षवारणायात्मावृत्तीति॥आकाशस्यवहिरिंद्रियजन्यप्रत्यक्षवारणायद्रव्यभिन्ने
ति॥कालादेस्तुवारणायविशेषेति॥शंकते॥रूपस्येति॥पुनःशंकते॥इषेति॥प्रतिवंद्यासरयति॥उद्भूतेति॥उपसंहरति॥तस्मादिति॥ननुत्रुटेःस्पार्शनानंगीकारात्तत्स्पार्शनवार
णायस्पर्शान्यद्रव्यसमवेतस्पार्शनंप्रतित्वकसंयुक्तस्पार्शनवद्द्रव्यसमवायत्वेनहेतुत्वस्यवाच्यतयावायोःस्पार्शनांगीकारोनोचितः॥अन्यथावायुगतसंख्यापरिमा
णयोस्त्वचाग्रहणप्रसंगादित्यतआह॥वायुप्रभयोरिति॥प्रभोयादृशानंदृष्टतायेम॥स्यतेएवेति॥तथाचवायुगतसंख्यादिग्रहेइष्टापत्त्यावायोःस्पार्शनांगीकारेवा
धकाभावइतिभावः॥कचिदिति॥सजातीयसंवलनाभावइत्यर्थः॥आदिपदात्परिमाणग्रहः॥तत्रमहत्त्वमवयवावच्छेदेनत्वगिंद्रियसन्निकर्षस्यलेवोध्यः॥न
वैसजातीयसंवलनादित्रुटिदोषादित्यर्थः॥आहरित्यनेनास्वरसबीजंतुवायोःप्रत्यक्षतासंदेहेनलाघवान्मूर्तप्रत्यक्षत्वावच्छिन्नप्रतिरूपत्वेनैवकारणत्वमुचित
म्॥नचवायुप्रत्यक्षतासंदेहाधीनव्यभिचारसंदेहस्यप्रतिवंधकस्यसत्त्वात्कथंकारणतायहइतिवाच्यम्॥लाघवतर्काभावविशिष्टस्यैवव्यभिचारसंदेहस्यप्रतिवंध
कतयाप्रकृतेचक्षुर्वोक्तलाघवतर्कस्यसत्त्वेनव्यभिचारसंदेहस्यसत्त्वात॥यच्चोक्तंप्रभायाअप्रत्यक्षत्वंविशेषतत्रिरे वकिंनस्यादितितद्दयिन॥उपरिदेशेविहंगमइत्यत्र
प्रभामंडलस्यैवोपरिदेशतयातत्प्रत्यक्षंविनोपरिदेशेविहंगमइतिप्रत्यक्षानुपपत्तेरित्यादिकमिति॥ज्ञानसामान्ये॥जन्यज्ञानसामान्ये॥ज्ञानाजननमिति॥प्रमाणमित्यनुष
ज्यते॥चक्षुरादिनेत्यादिनात्वगादिपरिग्रहः॥तदभावादेव॥चक्षुरादिनामनोयोगाभावादेव॥ज्ञानादेरभावादेवनमानसमिति॥अत्रज्ञानादेर्नमानसमित्यन्वयः
अभावादित्यत्रापिज्ञानादेरित्यस्यान्वयोवोध्यः॥नप्रत्यक्षमिति॥योग्यगुणसंवंधेनैवात्मनःप्रत्यक्षस्वीकाराद्योग्यविशेषगुणप्रत्यक्षसामग्र्यंतर्गतस्यज्ञा
नादेरभावादेवनात्मप्रत्यक्षमित्यर्थः॥उद्बोधकाभावादिति॥उद्बोधकस्यफलवलकल्प्यत्वादितिभावः॥इन्द्रियव्यक्तेरिति॥इच्छापाआदिरितिव्युत्पत्त्याज्ञानमात्रावि
वक्षितम्॥तदतींद्रियत्वे॥ज्ञानातींद्रियत्वे॥ननुसुषुप्तिप्राक्कालीनज्ञानस्यनिर्विकल्पकरूपत्वात्तदतींद्रियत्वमुभयवादिसिद्धमेवेत्यतआह॥सुषुप्तिप्राक्कालेति
ति॥त्वङ्मनःसंयोगस्यचेति॥तदस्वीकारेचाक्षुषमपिनस्यादितिभावः॥ननुचाक्षुषादिसामग्र्याःस्पार्शनंप्रतिप्रतिवंधकत्वादेवनस्पार्शनंतत्रेत्याह॥परस्प
रेति॥अनुभवानुरोधादिति॥अनुभवस्यत्वयापिस्वीकृतत्वादित्यर्थः॥इष्टापत्त्याइन्द्रियसंयोगेनत्वङ्मनोयंत्रेरसंगतत्वापातादितिभावः॥मिश्रमतमाह॥अन्येत्वित्यादि
ना॥सुषुप्त्यनुरोधेन॥सुषुप्तौज्ञानानुत्पादानुरोधेन॥इत्थंचचाक्षुषादिकालेपूर्वोक्तस्पार्शनापत्तिरपिनभवतीत्याह॥चाक्षुषादीति॥अत्रनव्याः॥स्पा

त्वङ्मनःसंयोगस्य कारणत्वास्वीकारे=३ तदभावविशि+१ चर्ममनःसंयोगस्यज्ञान कारणत्वे=२ अंगीकृतत्वात्=२

वहिरिंद्रियजन्यप्रत्यक्षवारणाय=५

रूपत्व=३

त्रुटिः=

वायोः स्पार्शनप्रत्यक्षांगीकारे=

आस्वरसबीजं=

भावत्...

ज्ञानप्रत्यक्षापत्तिभिया=१ ज्ञानोत्पत्तिः=२

षुप्त्यव्यवहितप्राक्काले ज्ञानोत्पत्तिर्यदि स्यात्स्यादपि तत्प्रत्यक्षापत्तिभियात्वङ्मनोयोगस्य चर्ममनोयोगस्य वा हेतुत्वं सेयं तन्नयुक्तिसिद्धा ॥ तथाहि ॥ सुषुप्त्यनुकूलमनःक्रि-
यया मनसात्मनो विभागस्ततश्चात्ममनःसंयोगनाशस्ततः पुरीततिस्थयोगरदेशेन मनसा संयोगस्ततः सुषुप्तिरुत्पद्यते ॥ एवं च सुषुप्त्यव्यवहितपूर्वक्षणे आत्ममनःसं-
योगद्वयासमवायिकारणनाशात्तत्क्षणे ज्ञानोत्पत्तेरभावात् ॥ असमवायिकारणस्य कार्यसहभावेन हेतुत्वात् ॥ यदि च कार्यनाशजनकनाशप्रतियोगिन एवाऽस-
मवायिकारणस्य कार्यसहभावेन हेतुत्वमिति मन्यते तथापि न सुषुप्त्यव्यवहितप्राक्कालोत्पन्नज्ञानव्यक्तेः सुषुप्तिकाले प्रत्यक्षापत्तिभियात्वङ्मनःसंयोगादेर्हेतु-
त्वम् ॥ विजातीयात्ममनःसंयोगस्य हेतुत्वेनैव तत्प्रत्यक्षवारणात् ॥ त ॥ स्वैवैजात्यं परमात्ममनःसंयोगपुरीतत्यवच्छिन्नात्ममनःसंयोगपर ॥ त्ममनःसंयोगव्यावृत्त-
मेषितव्यमिति भावः ॥ न चैवं तात्पर्येनात्ममनःसंयोगस्य त्वङ्मनःसंयोगस्य वा हेतुत्वमित्यत्र विनिगमकाभावः ॥ त्वङ्मनःसंयोगादेरवच्छेदकतासंबंधेन हेतुत्वापेक्षया स-
मवायेनात्ममनःसंयोगस्य तत्त्वे लाघवात् ॥ त्वङ्मनःसंयोगहेतुत्वे चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबंधकत्वकल्पनागौरवाच्च ॥ एतेन यत्र मनःक्रियया न पुरीत-
तिसंयोगस्तत्र सुषुप्तिः किं तु पुरीततिक्रियये वात्मसंयुक्तेन मनसा पुरीततिसंयोगस्ततः सुषुप्तिः ॥ ततः एवोक्तायुक्तिवारणाय त्वङ्मनःसंयोगादेर्हेतुत्वमित्यपास्तम् ॥
पुरीततिक्रियाजन्यमनःपुरीततिसंयोगस्य सुषुप्तित्वाभावाच्च ॥ अत एव यदात्वत्वं त्यक्त्वा मनःपुरीततिमनुविशतीति यं प्रकाराणां लेखः संगच्छते इति वदंति ॥ मनो-
याद्यत्वस्य सार्वत्रिकत्वादाह ॥ मनोजन्येति ॥ मनोमात्रजन्येत्यर्थः ॥ न्यूनतां परिहरति ॥ एवमिति ॥ निर्विकल्पके प्रमाणं दर्शयति ॥ चक्षुःसंयोगादिति ॥ विशेषज्ञानस्य
स्य कारणत्वादिति ॥ कदाचित् घट इत्याद्याकारकं स्वरूपतो घटत्वप्रकारकं कदाचिच्च जातिमानिति जातित्वेन घटत्वप्रकारकं ज्ञानं जायते इत्यनुभवसाक्षिकं तन्निर्वि-
वाहाय घटत्वांशेऽन्याप्रकारकघटत्वप्रकारकबुद्धेस्ताहृशघटत्वज्ञानत्वेन हेतुत्वात्सेऽजातित्वप्रकारकघटत्वविशिष्टबुद्धौ चताहृशघटत्वज्ञानत्वेन हेतुत्वस्यावश्य-
कत्वादिति भावः ॥ वैशिष्ट्यानवगाह्येवेति ॥ वैशिष्ट्यनिष्ठसांसर्गिकविषयताशून्यमेवेत्यर्थः ॥ वैशिष्ट्यसांसर्गिकविषयतानिरासेनैव घटघटत्वयोर्विशेष्यताप्रकार-
ताशून्यत्वं लभ्यं तयोर्वैशिष्ट्यसांसर्गिकविषयतानियतत्वात् ॥ न चैवं निर्विकल्पकस्य निर्विषयकत्वापत्तिस्तुरीयविषयताया एव तत्रांगीकारात् ॥ एतेन निर्विक-
ल्पकस्य घटघटत्वावगाहित्वे वैशिष्ट्यावगाहित्वमपि दुर्वारं घटेंद्रियसन्निकर्षकाले इंद्रियसंबद्धविशेषणतया तत्र वैशिष्ट्यसत्त्वादिति वैशिष्ट्यानवगाहित्वोक्ति-
रसंगतेत्यपास्तम् ॥ वैशिष्ट्यानवगाह्येवेत्येवकारेण कल्पनीयविशेषणज्ञानस्य वैशिष्ट्यावगाहित्वे तस्यापि विशिष्टबुद्धितया विशेषणज्ञानांतरसापेक्षता-
स्यादेवं तस्यापि वैशिष्ट्यावगाहित्वमित्यनवस्थाभिया प्राथमिकविशेषणज्ञानं वैशिष्ट्यानवगाह्येव स्वीकार्यमिति सूचितम् ॥ तदेव ॥ ताहृपा विषयतात्रयशून्य-
मेव ॥ निर्विकल्पकम् ॥ निर्विकल्पकस्वरूपं ॥ लक्षणं तु प्रकारताशून्यत्वादिकं प्रत्येकमिति ध्येयम् ॥ निर्विकल्पके मूलोक्तमतींद्रियत्वं साधयति ॥ तथाहि-
त्यादिना ॥ ज्ञानस्य प्रत्यक्षं विषयानवगाहि न भवतीत्यन्वयः ॥ इति प्रत्ययादिति ॥ इति ॥ घटाद्यवगाहित्वेनैव ज्ञानप्रत्यक्षस्यानुभवसिद्धत्वादित्यर्थः ॥ तत्र ॥ घटमहं

सुषुप्त्यव्यवहितपूर्वक्षणे=३

कारणत्वे=

पुरीततिक्रियाजन्यमनःपुरीततिसंयोगस्य सुषुप्तित्वाभावाच्च=६

घटत्वत्वेन रूपेण=

विशेष्यताप्रकारतयोः=

विशेषणज्ञानांतरस्य=

विजातीयात्ममनःसंयोगस्य ज्ञानकारणत्वेन=१

ण+

ज्ञानद्वय=

जातित्वेन=

नि+

विशेष्यताप्रकारतयोर्भ सांसर्गिकविषयतानियतत्वेन तुरीयविषयतांगीकारेणच=६

सांसर्गिकविषयता विशेष्यताविषयता प्रकारताविषयताशून्यत्वेसति=६ कल्पनीयविशेषणज्ञानस्य=४ घटघटत्वसंबंधे=५ निर्विकल्पके=६

सांसर्गिकविषयताशून्यत्वे विशेष्यताविषयताशून्यत्वे प्रकारताविषयताशून्यत्वे निर्विकल्पकस्य लक्षणं=२

३८

ज्ञानामीति प्रत्यये ॥ विशिष्टवैशिष्ट्यज्ञानं ज्ञानेन संभवतीति ॥ न च विशेष्ये विशेषणमिति रीत्यैव निर्विकल्पकानुव्यवसायोस्त्विति वाच्यम् ॥ रक्तः पटो घटो द्रव्यमिति समूहालंबनं त
तो रक्तं घटं जानामीति प्रतीत्यापत्त्या विशिष्टवैशिष्ट्यविषयताशून्यज्ञानानुव्यवसायानभ्युपगमादिति ॥ महत्त्वं षड्विध इति ॥ यद्यपि आवरणादौ महत्त्वस्य हेतुत्वे प्रयोजनाभा
वस्तथापि द्रव्यसमवेतप्रत्यक्षत्वादेर्जन्यतावच्छेदकस्य आवरणादिसाधारण्यात् आवरणाद्यन्यत्वनिवेशे गौरवात्प्रयोजनाभावाच्च षड्विध इत्युक्तमिति ध्येयम् ॥ आत्मादि
वारणायेति ॥ आत्मादौ योतिव्याप्तिरूपो दोषस्तद्वारणायेत्यर्थः ॥ सत्यन्तदाने च शब्दादितरेषु उद्भूतविशेषगुणाः रूपादयस्तदाश्रयत्वस्य वात्मनि सत्त्वान्नातिव्याप्तिरिति
भावः ॥ श्रोत्रे सत्त्वादिति ॥ तथा च तत्रातिव्याप्तिरिति भावः ॥ विशेषपदस्य प्रयोजनं वक्तुं भूमिकामाह ॥ उद्भूतत्वमिति ॥ जनकत्वानुपपत्तेरिति ॥ एकैकस्य कारणतावच्छेदक
त्वे व्यभिचारात्कूटस्यैकत्राप्रवृत्तितया कारणतानवच्छेदकत्वादिति भावः ॥ तदभावकूटस्योद्भूतत्वमिति ॥ तथा च तादृशकूटस्य कारणतावच्छेदकत्वमिति नोक्तदोष इति
भावः ॥ इंद्रियावयववारणायेति मनुः यदमित्यनेनान्वितम् ॥ नवीनमते मनः पदप्रयोजनमाह ॥ कालादाविति ॥ समवायेन घटाद्यभावादीनां कालेसत्त्वेपि न तत्प्रत्यक्षं यो
ग्यानुपलब्धेरभावादतो द्रव्याभावपर्यंतानुधावनम् ॥ तद्वारणायेति ॥ कालादेर्वारणायेत्यर्थः ॥ जन्यत्वघटितस्य व्यापारत्वस्य श्रोत्रसंबंधे समवायरूपेऽभावादाह ॥ व्यापारः सं
न्निकर्ष इति ॥ द्रव्यप्रत्यक्षमिति ॥ द्रव्यवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षमित्यर्थः ॥ द्रव्यसमवेतेति ॥ द्रव्यसमवेतवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षमित्यर्थः ॥ एवम
ग्रेपीति ॥ द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षमिंद्रियसंयुक्तसमवेतसमवायजन्यमित्यर्थः ॥ ननु द्रव्यप्रत्यक्षे इंद्रियसन्निकर्षत्वेन हेतुत्वे न त्वक्
प्रभासंयोगाच्चाक्षुषापत्तिरेवमंधकारे घटचक्षुःसंयोगात्स्पार्शनापत्तिश्चेत्यत आह ॥ वस्तुतस्त्विति ॥ नन्वेवमात्मप्रत्यक्षानुरोधेन मनःसंयोगस्य ज्ञानादिप्रत्यक्षानुरो
धेन मनःसंयुक्तसमवायस्य प्रत्यासत्तित्वेपि चक्षुरादिसंयोगतत्संयुक्तसमवाययोः प्रमाणाभावः ॥ चक्षुरादिसंयुक्तसमवायेनैवाणुकादेश्चाक्षुषाद्युपपत्तिरत आह ॥ प
रेत्विति ॥ परंपरया ॥ स्वाश्रयसमवेतसमवेतत्वादिसंबंधेन ॥ उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्येति ॥ अत्र चक्षुर्घटितचक्षुःसन्निकर्षाणुत्वादीनां
प्रत्यक्षवारणायोद्भूतेति ॥ उद्भूतरूपावच्छिन्नेति महत्त्वावच्छिन्नेति च चक्षुःसंयुक्तपदार्थैकदेशसंयोगेनान्वेति ॥ तथा च महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्य
त्रसरेणावभावान्नचाक्षुषानुपपत्तिरतः संयोगस्य प्रत्यासत्तित्वमावश्यकमिति भावः ॥ संयुक्तसमवेतसमवायेन समवायस्य नान्यथासिद्धिरत आह ॥ द्रव्यसमवेतेति
तादृशेति ॥ महत्त्वाद्यवच्छिन्नेत्यर्थः ॥ तथा च महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवेतसमवायस्य त्रसरेणुरूपेऽभावाच्चाक्षुषानुपपत्त्या संयुक्तसमवायस्य प्रत्यासत्ति
त्वमिति भावः ॥ एतत्प्रसंगेन सर्वं त्वयावच्छिन्नत्वमपेच्यालोकसंयोगावच्छिन्नत्वं च चक्षुःसंयोगे तत्प्रयोजनं चाभिहितमिति ध्येयम् ॥ स्पार्शनप्रत्यक्षे त्वक्संनिकर्षस्य कारण
त्वं प्रपंचयति ॥ एवमित्यादिना ॥ द्रव्यवदेवेति ॥ परमाणुघटितत्वक्संनिकर्षेण स्पर्शत्वस्य स्पार्शनवारणाय महत्त्वावच्छिन्नत्वं यभाघटितसंनिकर्षात्मभादिस्पार्शनवार
णाय स्पर्शावच्छिन्नत्वादि विशेषणं वोध्यमित्यर्थः ॥ श्रोत्रावच्छिन्नेति ॥ सकलपुरुषाणां सर्वशब्दप्रत्यक्षापत्तिरतः श्रोत्रावच्छिन्नेति ॥ इंद्रियसंबद्धेति ॥ यद्यपींद्रियसं

परमाणुत्वेष्टस्य शीत
त्रिष्टस्पर्शत्वे वा=२

महत्त्व=
समवायस्य=
चक्षुरादि=
उद्भूतरूपमहत्त्व=आ दिपदात्त्वाग्रपसम वेतग्रहः=१३
त्रसरेणु=
लंबनं+
अनुद्भूतत्वाभावकूट= घटाद्यभावप्रत्यक्षं=
समवेत+
चक्षुःपरमाणुसंयोग महत्त्वावच्छिन्नत्वा वात्=संयुक्त+
तं+

संयुक्तसमवायसंयुक्तसमवेतसमवायसमवायसमवेतसमवायानां चतुर्णामननुगमप्रसंगः=१

२७

न्या॰ मु॰ टी॰ २७

विशेषणता=

युक्तविशेषणतानाइंद्रियसंयुक्तसमवेतविशेषणतेत्यादिक्रमेण बाहुल्यमेव तथापि विशेषणतात्वेनैकरूपेण विभागः॥ न चैवं समवायत्वेन चतुर्णामननुगमप्रसंगः॥ परिभाषाया
अपर्यनुयोज्यत्वात्॥ समवायो न प्रत्यक्ष इति॥ संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वादिति भावः॥ ननु विशेषणतया तद्वृत्त्विसंगतं विशेषणताप्रत्यासत्तेरभावात्॥ न च त
तत्प्रत्यासत्तेरभ्युपगमे ऽभावप्रत्यक्षानुपपत्तिरिति वाच्यम्॥ इष्टापत्तेरनुपलंभस्यैव तत्प्रत्ययस्यापगमात्॥ न च समवायप्रत्यक्षानुरोधाद्विशेषणताप्रत्यासत्तिस्वीकारः स
मवायानंगीकारादेतदेवाभावप्रत्यक्षे इंद्रियं न करणं किं तु योग्यानुपलब्धिरेवेति भाट्टानामाक्षेपं दूषयितुं मूले यदि स्यादिति॥ तथा चेंद्रियेणाभावप्रत्यक्षे जननीये योग्या
नुपलब्धेः सहकारितामात्रेण निर्वाहे ऽतिरिक्तप्रमाणकल्पनमनुचितमिति भावः॥ तत्र योग्यानुपलब्धेरभावप्रत्यक्षहेतुत्वे युक्तिमाह॥ तथाहीति॥ घटादिज्ञाने घटा

अभावप्रत्यक्षं=

दिभ्रमे॥ न च घटादिभ्रमहेतुदोषस्यैव तत्प्रतिबंधकः॥ अन्यथा भ्रमोत्पत्तिकाले तदभावप्रत्यक्षापत्तिरिति वाच्यम्॥ विनश्यद्दशस्य दोषाद्यत्र भ्रमस्तत्र भ्रमोत्पत्तिका
ले प्रतिबंधकीभूतदोषाभावस्य सत्त्वादभावप्रत्यक्षापत्तेः॥ अभावोपलंभे॥ तदिंद्रियजन्यतत्संबंधावच्छिन्नतदभावलौकिकप्रत्यक्षे॥ प्रतियोग्युपलंभाभाव इति॥ तदिं

अनारोप्यः=

द्रियजन्यानाहार्यतत्संसर्गकतत्प्रकारकोपलंभाभाव इत्यर्थः॥ इंद्रियांतरजन्ये आनुमानिके च तदुपलंभे सत्यपि तदभावप्रत्यक्षात्तदिंद्रियजन्येति॥ अभावप्रत्यक्षे हेतुप्र
तियोग्यारोपसत्त्वे ऽप्यभावप्रत्यक्षानाहार्येति॥ तत्र प्रतियोग्युपलंभाभावे॥ अयेद्यितेति॥ तेन न जलपरमाणौ पृथिवीत्वाभावादेः प्रत्यक्षमिति भावः॥ मणिकृन्म भूतलादिकरण
तानुसारेण योग्यतां निर्वक्ति॥ सा चेति॥ प्रसंजितः॥ आपादितः॥ स उपलंभाभावः॥ अभावप्रत्यक्षे हेतुरिति॥ अत्र तदधिकरणविषयकाभावप्रत्यक्षे तदधिकरणक

घटः=

तदापादकापत्तियोग्यतदुपलंभस्य विषयतासंबंधावच्छिन्नप्रतियोगिताको भावो हेतुरित्यर्थः॥ उपलंभे॥ तदधिकरणकतदापत्तियोग्यत्वं च तत्प्रतियोगिसत्त्वनि

यत्र यत्र घटसत्त्वं तत्र तत्र घटस्योपलंभ इति व्याप्तिः=

ष्ठव्याप्तिनिरूपकत्वं॥ अत्र च तदापादकापत्तियत्रेनोक्त्वा तत्र तदभावप्रत्यक्षानुपपत्तिरिति योग्यत्वनिवेशः॥ न च प्रतियोगिसत्त्वस्योपलंभव्याप्यत्वेन निर्विशेषि
तस्य उपलंभसामान्येतरविरहे प्रतियोगिसत्त्वे ऽप्युपलंभाभावात् किं तु महत्त्वोद्भूतरूपावच्छिन्नस्यैव॥ एवं महत्त्वादिविशिष्टपृथिवीत्वस्योपलंभव्याप्यत्वाज्जलपरमा
णौ पृथिवीत्वाभावप्रत्यक्षापत्तिरिति वाच्यम्॥ तदधिकरणवृत्तिधर्मानवच्छिन्नत्वस्य योग्यताघटकीभूतव्याप्त्यंशे निवेशात्॥ महत्त्वस्य जलपरमाणववृत्तित्वेनैतादृशधर

नातिरूपव्याप्तेः= यत्र महत्त्वविशिष्टपृथिवीत्वं तत्र पृथिवीत्वोपलंभ इति व्याप्तेः

र्मानवच्छिन्नत्वाभावात्॥ न च गंधवदणुभिन्नत्वविशिष्टस्यापि पृथिवीत्वस्य तदुपलंभव्याप्यत्वाद्गंधवदणुभिन्नत्वस्य जलपरमाणुवृत्तित्वात् तद्दोषतादवस्थ्यमिति वा
च्यम्॥ योग्यताघटकव्याप्तौ प्रतियोगिग्राहकातिरिक्तधर्मानवच्छिन्नत्वस्यापि निवेशात्॥ गंधवदणुभिन्नत्वादेश्च प्रतियोगिग्राहकातिरिक्तत्वेन तादृशधर्मानवच्छिन्नत्व
स्योक्तव्याप्त्यभावात्॥ न च प्रतियोगिग्राहकत्वं प्रतियोगिग्रहजनकत्वं तच्च गंधवदणुभिन्नत्वे पृथिवीत्वोभयसमूहालंबनात्मकलौकिकप्रत्यक्षे विषयविधया
हेतुत्वात् गंधवदणुभिन्नत्वस्याप्यस्तमिति वाच्यम्॥ प्रतियोगिप्रकारतानिरूपितलौकिकविशेष्यताविरहप्रयोजकीभूताभावप्रतियोगित्वस्यैव प्रतियोगिग्रा
हकत्वपदार्थत्वात्॥ अथैवं पिशाचत्वप्रकारतानिरूपितलौकिकविशेष्यताप्रसिद्ध्यातघटितयोग्यानुपलंभविरहात्तदभावप्रत्यक्षं न स्यादिति चेन्न॥ नहि वयस

पृथिवीत्वं=   पृथिव्यां=१

२१

२७ ए

वेत्राभावप्रत्यक्षे निरुक्तयोग्यानुपलंभस्य हेतुत्वं भ्रमः ॥ किंतु योग्यस्याभावप्रत्यक्षे ऽयोग्यपिशाचत्वाद्यभावप्रत्यक्षे तु तदधिकरणीयत्वप्रसंजनप्रसंजितप्रतियोगिकस्तदधिकरणी
यत्वोपलंभस्य विषयतासंबंधावच्छिन्नाभाव एव प्रतियोगिनिषेधहेतुः ॥ अत्राप्यापादनस्य सर्वत्रासंभवेन तदधिकरणीयत्वप्रसंजनप्रसंजितत्वं तदधिकरणीयत्वनिष्ठव्याप्तिनि
रूपितत्वं जातित्वादिविशिष्टस्य स्तंभवृत्तित्वस्योपलंभव्याप्यत्वात् स्तंभे पिशाचत्वाभावप्रत्यक्षम् ॥ जातित्वादिविशिष्टस्य पिशाचवृत्तित्वस्योपलंभाव्याप्यत्वान्न पिशाचे स्तंभत्वा
अनुपलंभस्य= भावप्रत्यक्षम् ॥ एवं तादात्म्येन स्तंभवृत्तित्वपिशाचवृत्तित्वयोरुपलंभव्याप्यत्वाव्याप्यत्वाभ्यां स्तंभपिशाचयोः पिशाचभेदस्तंभभेदयोः प्रत्यक्षत्वाप्रत्यक्षत्वे उपपादनीये इति ॥ न चाद्य
प्रत्यक्षमिति ॥ अनुपलंभे विद्यमाने पि निरुक्तयोग्यताविशिष्टस्य तस्य तत्राभावादिति भावः ॥ आपादयितुं शक्यत्वादिति ॥ तथा च समानेंद्रियजन्योपलंभव्याप्यत्वे स्य योग्यताघ प्रतियोगिमत्त्वस्य=
टकत्वान्न तत्र चाक्षुषमिति भावः ॥ न तु जातित्वादिविशिष्टस्य तेजोवृत्तित्वस्योपलंभव्याप्यत्वात्तेजसि गुरुत्वाभावप्रत्यक्षापत्तिः ॥ एवं स्तंभे पिशाचत्वाभावप्रत्यक्षवत्
पिशाचाभावप्रत्यक्षापत्तिरत आह ॥ गुरुत्वादिकमिति ॥ आदिपदेन पिपासादिपरिग्रहः ॥ अयोग्यस्य पिशाचत्वादिजातेरभावस्य प्रत्यक्षत्वात् गुरुत्वादिकमित्युक्तम् ॥ न
योग्यः ॥ न प्रत्यक्षविषयः ॥ अशक्यत्वादिति ॥ निरुक्तयोग्यताघटकव्याप्तौ प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वस्य निवेशात्स्वकृते च जातित्वविशिष्टतेजोवृत्तित्वस्योपलंभव्याप्यत्वे पि
जातित्वस्य गुरुत्वावृत्तित्वेन तादृशव्याप्यत्वे प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वाभावादिति भावः ॥ न च तदधिकरणीयत्वप्रसंजनप्रसंजितप्रतियोगिकस्तदधिकरणीयत्वो घटे अत्र नाद्यधिकरणीयत्वोपलंभस्यैतत्=
स्यात्+ पलंभस्याभाव एवेंद्रियकघटाभावादिप्रत्यक्षे हेतुरास्तां किं सर्वोक्तयोग्यानुपलंभहेतुतयेति वाच्यम् ॥ तथा सति परमाण्वादौ महत्त्वाद्यभावप्रत्यक्षानुपपत्तेरिति ॥ वा पादु
द्भूतभाव इति ॥ रूपत्वावच्छिन्नाभावस्यातींद्रियानुद्भूतरूपप्रतियोगित्वेन प्रत्यक्षासंभवादुक्तमिति ॥ एवमादय इत्यादिना प्रभायामुद्भूतस्पर्शाभावपरिग्रहः ॥ प्रत्यक्षो विषयत्वे
न कारणत्वस्य लक्ष्मत्वान्मेनैव गुरुत्वाद्यतींद्रियाभावप्रत्यक्षवारणे तदनुरोधेन तदधिकरणीयत्वेत्यादि द्वितीययोग्यानुपलंभस्य हेतुता न स्वीकार्येत्यभिप्रायवान्संसर्गाभा
वे योग्यतामाह ॥ संसर्गीति ॥ प्रतियोगिनो योग्यत्वे तीति ॥ योग्यमात्रप्रतियोगिकत्वे सति योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वमित्यर्थः ॥ अत्र द्रव्यसामान्यावारणाय प्रमा
त्रेति ॥ गुरुत्ववद्घटात्यंताभाववारणाय विशेष्यदलेम ॥ रूपगुरुत्वावच्छिन्नाभाववारणाय विशेष्यदले मात्रेति ॥ अधिकरणयोग्यत्वमिति ॥ योग्याधिकरणवृत्तित्वमित्य
र्थः ॥ इदं चाभावग्राहकयोग्यसन्निकर्षप्रदर्शनार्थं तेन स्तंभस्ववाय्वादौ न पिशाचान्योन्याभावप्रत्यक्षमित्यर्थः ॥ अन्योन्याभावे योग्यता तु तादात्म्यावच्छिन्नप्रतियोगि
ताकत्वमात्यतिरिक्तयोग्यधर्मावच्छिन्नप्रतियोगिताकत्वान्यतरत्वेन ॥ ते न स्तंभे पिशाचान्योन्याभावपिशाचवदन्योन्याभावयोः प्रत्यक्षत्वाप्रत्यक्षत्वोपपत्तिरित्यन्यत्र वि पिशाचत्ववत्... पिशाचवत्... भावो...
स्तरः ॥ अलौकिकसन्निकर्षैः ॥ धूमत्वादिसामान्यलक्षणायाः इंद्रियजन्यत्वाभावाद्व्यापारत्वकथनमसंगतमत आह ॥ व्यापारः सन्निकर्ष इति ॥ यद्यपि धूमत्वादेरिंद्रियप्रति
योगिकत्वाभावात् सन्निकर्षत्वमप्युक्तं तथापि संयोगस्येंद्रियप्रतियोगिकत्वात्तद्घटितस्येन्द्रियसंयुक्तविशेष्यकज्ञानप्रकारीभूतधूमत्वादेः प्रत्यासत्तितानिर्वा
हः ॥ तच्च ॥ सामान्यरूपं च ॥ अत्रपदीति ॥ इंद्रियसंबद्धसामान्यं प्रत्यासत्तिरित्युच्यते तदेत्यर्थः ॥ ननु यत्र चक्षुःसन्निकर्षेण धूम इति ज्ञानं जनितं तत्र च चक्षुःसंयोगविगमे पितोरु धूमः=

स्वा+ प्रकारीभूतं+ संयोग=२ स्थलेन=

चक्षुःसंयोगविगमे=२ सामान्यलक्षणा=२ २१३ पूर्वं चक्षुःसंयोगविगमो=१

२४ चक्षुःसंयोगविगमे=
न्या.मु.टी.
२८

शा ज्ञानमादायेंद्रियसंबद्धविशेष्यकज्ञानप्रकारस्य धूमत्वादेर्धूमांतरे सत्त्वाद्धूमांतराणां सामान्यलक्षणया ज्ञानापत्तिः ॥ न च तदा धूमो नेंद्रियसंबद्धः ॥ ज्ञानलक्षणात्मकसन्निकर्षस्य धूमे
सत्त्वात् ॥ न च तत्रैकज्ञाने सामान्यलक्षणाजन्यज्ञानस्वीकारे क्षतिविरह इति वाच्यम् ॥ तन्मूलकज्ञानधारापत्तेर्दुर्वारत्वादित्यत आह ॥ लौकिको ग्राह्य इति ॥ अत्र लौकिकसन्निक
र्षस्य विशेषणविधया घटकत्वं बोध्यमन्यथा तत्र धूमे स्वकालीनचक्षुःसंयोगमादाय तद्दोषतादवस्थ्यमिति ध्येयम् ॥ इदमुपलक्षणम् ॥ यत्र चक्षुःसंयोगे विद्यमानेपि दोषवशात्त
धूमत्वाद्यक्षेपं किंतु धूमत्वप्रकारकं स्मरणम् ॥ तत्र धूमत्वसामान्यलक्षणाजन्यज्ञानापत्तिवारणाय सामान्यलक्षणाघटकज्ञाने तदिंद्रियजन्यत्वस्य वाच्यत्वात् ॥ नन्विंद्रि
यसंबद्धेत्यत्र लौकिकः संबंधः ज्ञानप्रकारेत्यत्र ज्ञानस्य तदिंद्रियजन्यत्वं चेद्विवक्षितं तदा गुणत्वेन यत्किंचिद्गुणोपस्थितौ गुणत्वसामान्यलक्षणया सकलगुणगोचरमानसबो
धो न स्यात्तदा गुणे मनसो लौकिकसंबंधस्य ज्ञाने मनोजन्यत्वस्य चाभावादत आह ॥ इदं चेति ॥ तथा च बहिरिंद्रियेण सामान्यलक्षणया ज्ञाने जननीये तद्विवक्षितं न तु मानसे
सामान्यलक्षणाजन्यज्ञाने इति नोक्तदोष इति भावः ॥ आसन्निराश्रयाणां त्वित्यादिमूलमवतारयितुं भूमिकां रचयति ॥ परं त्वित्यादिना ॥ भूतले इत्यस्य ज्ञात इत्यनेनान्वयः ॥
भूतलादीनामित्यादिना संयोगेन तद्घटाधिकरणद्रव्यांतरपरिग्रहः ॥ तत्रैवं बोध्यमिति ॥ ज्ञायमानमनित्यं सामान्यं तत्र प्रत्यासत्तिरिति बोध्यमित्यर्थः ॥ परंपरया प्रत्यासत्तेस्य घट
त्वादेरेव प्रत्यासत्तित्वसंभवात् किंत्वित्यादिना वक्ष्यमाणदोषासंगतिरत आह ॥ परं त्विति ॥ तथा च घटत्वस्य परंपरया कपालादावज्ञानाद्वक्ष्यमाणदोषसंगतिः ॥ तेन संबंधेनेति ॥ आश्र
याः समवायेन ज्ञानप्रकारीभूतघटत्वादिसामान्यप्रत्यासत्त्या कालादि ज्ञानापत्तेरिति भावः ॥ किंत्विति ॥ एवं चेत्यर्थः ॥ किं चेति ॥ कुतो न जन्यत इति ॥ इदमापाततः ॥ सामान्यलक्षणाप
दकीभूतलौकिकसन्निकर्षस्य विशेषणत्वविवक्षणेन कालांतरीयसंयोगमादायोक्तातिप्रसंगस्याभावादिति ॥ तस्मात्पूर्वोक्तदोष एवात्र कल्प्ये बोध्यः ॥ न च तत्र स्वसमवायि
समवायादिसंबंधेन घटत्वादेर्वासत्तितया पूर्वोक्तदोषोपि न संभवतीति वाच्यम् ॥ स्वसमवायिसमवायादिना घटत्वं कपालादौ यदा न ज्ञातं किंतु घट एव समवायादिना ज्ञातस्तदे
तरमपि न घटाश्रयकपालादीनां ज्ञानस्य सर्वानुभवसिद्धस्य घटत्वप्रत्यासत्त्या उपपादनासंभवात् ॥ एवं ज्ञायमानसामान्यस्य प्रत्यासत्तित्वे चैत्रीयज्ञानविषयसामान्यप्रत्या
सत्त्या मैत्रीयतद्घटाश्रयत्वप्रत्यक्षाभियानतद्रूपीयत्वनिवेशस्यावश्यकतया गौरवं ज्ञानस्य प्रत्यासत्तित्वे तु पुरुषनिष्ठप्रत्यासत्त्या हेतुत्वात्तत्तद्रूपीयत्वनिवेश इति लाघव
मित्यपि बोध्यम् ॥ तेन सामान्यविषयकं ज्ञानमिति ॥ इंद्रियसंबद्धविशेष्यकं सामान्यप्रकारकं ज्ञानमित्यर्थः यद्वा सामान्यविषयकं ज्ञानमात्रमित्यर्थः सामान्यविषय
कज्ञानत्वं प्रत्यासत्तितावच्छेदकमिति यावत् ॥ तथा चात्र कल्पे इंद्रियसंबद्धविशेष्यकत्वप्रकारकत्वतदिंद्रियजन्यत्वानि ज्ञानस्य विशेषणानि नोपादेयानीति ॥ एवमेतेन तदिंद्रियजन्य
त्वादेर्निवेशेनेंद्रियभेदेन कार्यकारणभावकल्पनेन च गौरवमिति भावः ॥ एतन्मते च निर्विकल्पकसाधारणं स्मरणसाधारणं च सामान्यज्ञानमात्रं प्रत्यासत्तिः ॥ तथा
च घटत्वप्रकारकप्रत्यासत्तेः कार्यतावच्छेदकं ॥ घटत्वज्ञानत्वं च कारणतावच्छेदकं ॥ स्वप्रकारीभूतघटत्वाश्रयत्वं च कार्यतावच्छेदकः संबंधः ॥
स्वविषयघटत्वाश्रयत्वं च कारणतावच्छेदकः संबंधः ॥ चक्षुःसंयोगादिस्तु तत्काले पूर्वोत्पादिप्रसक्तस्य वक्ष्यमाणतदिंद्रियजन्यादिकर

लौकिकेंद्रियसंबद्धविशेष्यकतदिंद्रियजन्यज्ञानप्रकारीभूतेन सामान्येन प्रत्यासत्तिः=

संयोगेन भूतलादीनां समवायेन कपालादीनां ज्ञाने=८

कस्य=स्वपदेन कपालत्वसमवायी घटस्तस्मिन्समवायः घटत्वस्य=

सामान्य=

28A

रणादितिध्येयम्॥ अणुत्वज्ञानमात्रेणैवसकलाणुगोचरबोधोदयादत्राह॥ वहिरिति॥ आलोकसंयोगादिकमित्यादिना दोषाभावपरिग्रहः॥ न जन्यत इति॥ अयमाशयः॥ पदार्थत्वसा
संनिकर्षादिघटिताचाक्षुषादिसामग्रीतउत्तरलोके घट इति चाक्षुषमेव सामान्यलक्षणातोऽतो लक्षणोसकलघटविषयकं ज्ञानं जन्यत इति॥ प्राचीनमते ज्ञानलक्षणाकविलम्बः कल्प्यते तत्र च
मानाभावः॥ यद्येवं घट इति चाक्षुषप्रत्यये तेन दैवसन्निकृष्टघटांशे लौकिकमन्यघटांशेऽलौकिकमित्यभ्युपगमात्तेन चाच सामान्यलक्षणाजन्यघटत्वप्रकारकचाक्षुषत्वस्य व्याप
कं घटत्वे लौकिकचाक्षुषत्वमिति फलितं॥ तथा च यत्र संनिकर्षादिशून्यकाले व्यापकधर्मावच्छिन्नजनकसामग्र्याः सहकारिणा विरहादेव न च ... सामान्यलक्षणा
याज्ञानमिति॥ यदि ज्ञानमपि विति॥ अत्रत्यो यदि शब्दः सामान्यलक्षणापीति योज्यः॥ सामान्यलक्षणास्वीकारबीजमाह॥ अत्रेति॥ अयमर्थः॥ अयमभिप्रायः॥ भानं॥ विषयतानसंभव
तीति प्रत्यक्षविषयतायाः संनिकर्षाश्रयत्वव्याप्यत्वादितिभावः॥ वाक्संबंधस्यगृहीतत्वादिति॥ तथा च प्रत्यक्षधर्मे व्याप्तिनिर्णयत्वान्न तद्विशेष्यको व्याप्यत्वसंशयः संभवतीतिभावः
अनुपस्थितत्वादिति॥ तथा च धर्मिज्ञानाभावान्न तद्विशेष्यकोऽपि व्याप्यत्वसंशयः संभवतीतिभावः॥ ज्ञानलक्षणास्वीकारबीजमाह॥ एवमित्यादिना॥ कथं स्यादिति॥ चंद
नखंडस्य चाक्षुषे जायमाने उपस्थितसौरभभानं न स्यात्सौरभांशे चक्षुःसंनिकर्षाभावादित्यर्थः॥ सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः सहकारिण्याः विरहेण सौरभ
त्वसामान्यलक्षणयापि सौरभभानं न संभवतीतिभावः॥ सुरभिचंदनमित्यादौ सौरभादेर्भानं सौरभत्वादिसामान्यलक्षणयैव संभवति सौरभत्वप्रकारकलौकिकप्रत्यक्ष
सौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्रीसहकारेणैव तस्याः फलजनकत्वांगीकारात्॥ प्रकृते च द्वितीयसामग्र्याः सहकारिण्याः सत्वादित्यभिप्रायेणाह॥ यद्यपीति
सौरभत्वस्य भानमिति॥ स्वरूपतः सौरभत्वस्य भानमित्यर्थः॥ ज्ञानलक्षणया॥ ज्ञानलक्षणयैव॥ न तदानीं सौरभत्वांशे धर्मीतरस्याग्रहीतत्वेन तया सामान्यलक्षणया तज्ज्ञाननि
र्वाहादितिभावः॥ ननु धर्मीतरस्य सौरभत्वांशेऽग्रहेऽपि सौरभत्वसामान्यलक्षणयैव सौरभत्वादेर्भानमस्तु सौरभत्वप्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्यतावच्छेदकत्वादिति
चेन्न सौरभत्वादिविषयताप्रयोजिकायाः स्वविषयसौरभत्वत्वादिमत्त्वरूपसामान्यलक्षणायाः संबंधस्य सौरभत्वेऽभावेन सामान्यलक्षणया तज्ज्ञाननिर्वाहात्॥ सौरभत्वसामा
न्यलक्षणायाः कार्यतावच्छेदके सौरभत्वप्रकारकत्वमिव विशेष्यप्रयोजनाभावाच्च॥ न च ज्ञानलक्षणायाः कारणत्वान्तरकल्पने गौरवमियेव सामान्यप्रकारकत्वस्य कार्यतावच्छेदके प्रवेश
इति शक्यम्॥ विशेषणज्ञानहेतुनयैव निर्वाहे ज्ञानलक्षणायाः कारणत्वान्तरविरहादिति मन्व विशेषणज्ञानजन्यतावच्छेदकविशिष्टबुद्धित्वं॥ ज्ञानलक्षणायास्तु विशिष्टप्रत्यक्ष
त्वमिति तत्सम्भवेन निर्वाहः॥ एवं यत्र ज्ञानलक्षणया स्वविषयमुख्यविशेष्यकं भानं तत्र विशेषज्ञानकारणतया न निर्वाह इत्यत आह॥ एवमिति॥ ज्ञानलक्षणया॥ ज्ञानलक्षणयैव॥ न त
द्धर्मत्वज्ञानरूपसामान्यलक्षणायाः स्वविषयधर्मत्वाश्रयत्वसंबंधेन धूलीपटलेऽभावेन सामान्यलक्षणयानुव्यवसाये धूलीपटलभानासंभवादितिभावः॥ सर्वदैवेति॥ ध्याद
नाद्यभावेपीत्यर्थः॥ ॥इतिप्रत्यक्षपरिच्छेदः॥ ॥ ॥ ॥अथानुमानम्॥ ॥

तज्जन्यत्वे सति+ परामर्शी+ अनुमितिकाले=१ परामर्शव्यापारत्वं=२

ओं॥ संगतिश्चात्र अत्यंतेरोपजीव्योपजीवकभावो बोध्यः॥ करणे निर्दिष्टे एव व्यापारे जिज्ञासोदयात् लेपषानिर्दिष्टमपि करणं प्रथमं दर्शयति॥ व्याप्तिज्ञानमिति॥ परामर्शो व्यापार इति॥ ननु व्या
पारत्वं तज्जन्यजनकत्वं तच्चेत्तस्मं भवति वह्निव्याप्यधूमवानयमिति परामर्शो व्याप्तिज्ञानजन्यत्वस्याभावात् महानसीयवह्निधूमव्याप्तिज्ञानस्य तदानीमभावेन व्यभिचारात् तत्राह उपपादयति॥ तथाहि
त्यादिना॥ पश्यतीति॥ धूमदर्शनस्य व्याप्तिस्मरणोद्बोधकविधया हेतुता इति प्रत्यर्थे यादृशविशेषणविशिष्टस्य धूमस्य व्याप्तिसंबंधितया ज्ञानं तादृशधूमदर्शनस्यैव व्याप्तिस्मृत्युद्बोधकत
त्वमित्यभिप्रायेणानवच्छिन्नत्वमुक्तम्॥ एवं च पूर्वं व्याप्तिस्मरणमिति॥ उद्बुद्धसंस्कारस्य पूर्वसत्त्वादिति भावः॥ स एव परामर्श इति॥ तथा च स्मरणात्मकव्याप्तिज्ञानस्य पूर्वसत्त्वान्न व्यभिचार इति भा
वः॥ न च तत्र धूमादिपदव्याप्तिपक्षपदार्थानां विशिष्टलोपस्थितिमूलको विशेष्ये विशेषणमिति रीत्या परामर्शस्तत्र व्याप्तिविशिष्टज्ञानस्य व्यभिचारो दुरुद्धर एवेति वाच्यम्॥ व्याप्यशेनि श्चयत्वा
निवेशप्रयुक्तलाघवेन विशिष्टस्य वैशिष्ट्यमिति रीत्या परामर्शस्यैवानुमितिहेतुत्वमित्यभिप्रायात्॥ स्मरणात्मकपरामर्शे व्याप्तिज्ञानस्य व्यभिचार इत्यपि न॥ संस्कारसंबंधेन पूर्वं व्याप्तिज्ञान
स्य सत्त्वात्॥ अत्र नव्याः॥ व्याप्तिज्ञानत्वस्य परामर्शत्वव्यापकतयानुमितिं प्रति हेतुत्वमेव नास्ति॥ कुतः करणत्वम्॥ अन्यथा कपालादेर्घटं प्रति द्रव्यत्वेन हेतुतापत्तिस्स्यादनुमितिं
प्रति मनस्त्वेनैव करणत्वमित्याहुः॥ लिंगमनुमितिकरणमिति॥ अनुमितौ परामर्शमात्रं न तु हेतुरपि तु लिंगपरामर्शः॥ तथा च विशिष्टस्य कारणताग्रहे विशेषणस्यापि कारणतायाम
हात्परामर्शप्रमाणलिंगस्यापि लिंगपरामर्शस्य वा हेतुतेत्यत्र विनिगमनाविरहादुभयोर्हेतुतासिद्धौ तत्रैव व्यापाराभावात् परामर्शस्य करणता लिंगस्यैवेत्याशयः॥ लिंगस्य तदानीमभावादिति॥
न च परामर्शरूपव्यापारसंबंधेन तदानीं लिंगमस्त्येवेति वाच्यम्॥ अतीतादिलिंगस्य परामर्शजनकतया परामर्शस्य तद्व्यापारत्वासंभवात्॥ इदमुपलक्षणम्॥ लिंगस्य हेतुत्वे चैत्रीयपरामर्शविषयीभू
तेन मैत्रस्यानुमितिप्रसंगः॥ न तु गुरुभूतीयत्वनिवेशे गौरवमस्मन्मते तु सामानाधिकरण्यप्रत्यासत्त्या हेतुहेतुमद्भावेनैवातिप्रसंगाभावात् ननु गुरुभूतीयत्वनिवेश इति लाघवमित्यपि बोध्यम्॥ तच्च॥ व्याप्यस्य
पक्षेण सह वैशिष्ट्यावगाहित्वान्न च॥ ननु यस्य यस्य व्यभिचार इत्यत आह॥ अनुमितित्वेति॥ कार्यतावच्छेदकस्य परस्परानुमितिव्याप्तत्वान्न व्यभिचार इति भावः॥ पक्षविशेष्यकत्वेनैव सर्वत्रानु
मितौ नियतमिति नवीनमतमाह॥ द्विविधादपीति॥ पक्षविशेष्यकव्याप्यविशेष्यकोभयपरामर्शादपीत्यर्थः॥ कारणतावच्छेदकं च परामर्शद्वयसाधारणं व्याप्यपक्षोभयवैशिष्ट्यावगाहित्वमि
त्यत्वमतो न व्यभिचारः॥ द्विविधयोरपि परामर्शयोः स्वस्वाव्यवहितोत्तरानुमितिं प्रति तादृप्येण हेतुत्वमित्यपि केचित्॥ वस्तुतोऽनुभवानुरोधात् पक्षविशेष्यकपरामर्शस्यैव हेतुत्वमत एव सर्वत्र वह्नि
व्याप्यधूमवान् पर्वत इत्याकारकः पक्षविशेष्यक एवोपनयः सर्वसंमत इति ध्येयम्॥ मीमांसकः शंकते॥ नन्विति॥ ज्ञानं विनापीत्यस्यानुमितेर्दर्शनादित्यनेनान्वयः॥ ज्ञानद्वयादेव॥ ज्ञानद्वयाद
पि॥ विशिष्टवैशिष्ट्यावगाहिज्ञानमिति भावप्रधानो निर्देशः॥ सर्वत्र न कारणमिति॥ अनुमितित्वावच्छिन्नं प्रति न कारणतावच्छेदकमित्यर्थः॥ आवश्यकत्वादिति॥ व्याप्यतावच्छेदकप्रकारकप
तत्धर्मताज्ञानत्वस्योभयमतसिद्धनियतपूर्ववर्तितावच्छेदकत्वादित्यर्थः॥ ननु ज्ञानद्वयस्थलेऽपि विशिष्टज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आह॥ विशिष्टज्ञानमिति॥ व्याप्यतावच्छेदकेति॥ अ
यमालोको धूमो वेति संदेहदशायां व्याप्यतावच्छेदकप्रकारकनिर्णयाभावेऽपीत्यर्थः॥ वह्निव्याप्यवानीति॥ वह्न्यभाववद्वृत्तिमानित्यर्थः॥ तत्तद्धूमसमानाधिकरणीत्यादिरूपव्याप्तिविशिष्टवानि

व्याप्तिज्ञानस्य परामर्शं प्रति हेतुतां गीकारेपि=

परामर्शप्रमाणलिंगस्य लिंगपरामर्शयोः=

अनागत दिलिंगस्य ... चैत्रीयानुमितिं प्रति चैत्रीयपरामर्शविषयो लिंगो हेतुरित्यादिकार्यकारणभावस्य गौरवमिति भावः=

नैयायिकमीमांसकमत=२

पर्वतधर्मदर्शनकाल=२

व्यापकधर्मस्य कारणतावच्छेदकत्वे= लिंगविशिष्टपरामर्शस्य=२ हेतु+

द्विविधा+

पक्षप्रकारकसाध्यज्ञानत्व॰ पक्षविशेष्यकसाध्यज्ञानत्व॰=

पक्षविशेष्यकपरामर्शाव्यवहितोत्तरानुमितिं प्रति पक्षविशेष्यकत्वरूपेण परामर्शः कारणं॰ व्याप्यविशेष्यकपरामर्शाव्यवहितोत्तरानुमितिं प्रति व्याप्यविशेष्यकत्वरूपेण परामर्शः कारणम्=४

व्याप्तौ= प्रत्ययेन=३ संदेहद्वयतायां=१ व्याप्तिग्रह=२

त्यर्थः ॥ तत्रैरूतावच्छेदकभानं नैयत्यात् ॥ अनुमित्युत्पत्तेरिति ॥ तथाच व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य तत्रैव्यभिचारान्नैनेन रूपेण हेतुत्वमिति भावः ॥ ननु तत्र फलेव लाघवात् व्याप्यताव-
च्छेदकप्रकारकं ज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आह ॥ लाघवाच्चेति ॥ व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वादित्यर्थः ॥ नन्वेवं सति तदवच्छेदकलाघवं
तथापि हर्षौक्तकल्पनालाघवमेव मीमांसकानां मूलयुक्तिर्भविष्यतीत्यत आह ॥ किं चेति ॥ न च गरुत्वमापातेति ॥ अत्र शान्तवादस्य वर्तमानतया अभिधानान्न कालान्तरीयता हृशाय
हृमादायदोषः ॥ व्याप्तिप्रकारकं ज्ञानमिति स्वतंत्रं कारणमित्यनेनान्वयि ॥ इत्युच्यत इति ॥ इत्थं च ननु तत्पुरुषीयत्वं निवेश्यते ॥ चैत्रस्य व्याप्तिग्रहकाले तत्रुन्यमैत्रस्यानुमित्यापत्तेरभावान्मैत्रा-
त्मनि स्वतंत्रहेतुभूतव्याप्तिज्ञानाभावादिति न गौरवमिति भावः ॥ ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताविषयकव्याप्तिप्रकारकज्ञानत्वेन वा हेतुतेत्यत्र विनिगमनाविरहेण हे-
[illegible]पीत्यत आह ॥ वह्निव्याप्य इति ॥ अनुमितिःस्यादिति ॥ व्याप्यतयेत्यव्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिज्ञानत्वेन हेतुत्वस्य विवक्षितत्वान्नातो-
दृशज्ञानान्नवाधूमो वह्निव्याप्यो धूमवान्पर्वत इति ज्ञानादनुमित्यापत्तिस्तत्र व्याप्तिप्रकारतानिरूपितधूमविशेष्यतायाः पर्वतविशेष्यतानिरूपितप्रकारतानात्मकत्वादिति भावः ॥ ननु ज्ञान-
द्वयस्थले विशिष्टज्ञानकल्पनागौरवं न्यायमते दूषणं भविष्यतीत्यत आह ॥ इत्थं चेति ॥ फलमुखगौरवस्येति ॥ फलं कार्यकारणभावग्रहस्तन्मुखं तदधीनं गौरवं गौरवज्ञानमित्यर्थः ॥ विशि-
ष्टज्ञानत्वावच्छेदेन कारणत्वग्रहे विशिष्टज्ञानत्वधर्मिकगौरवनिश्चयो विरोधी वाच्यः ॥ तच्च गौरवं प्रमाणान्तरासिद्धतत्तदनुमित्यव्यवहितपूर्ववर्तित्वाश्रयकत्वमेव ॥ तादृशगौरवनिश्चयो विशिष्टज्ञान-
त्वेन कारणत्वनिश्चयाधीनस्वघटकीभूततत्तदनुमित्यव्यवहितपूर्ववर्तित्वाश्रयनिर्णयं विना न संभवतीति कार्यकारणभावनिर्णयात्पूर्वं गौरवनिर्णयाभावान्न तादृशगौरवं दोष इति भावः ॥
फलेपरामर्शानन्तरं व्याप्तिनिरूपणे संगतिमुपोद्घातं निरूपयति ॥ व्याप्तो नामेति ॥ तत्रेति घटकत्वं सप्तम्यर्थः ॥ अ ॥ व्या ॥ प्ति ॥ अव्याप्तिप्रसंगादिति ॥ अव्याप्त्यभिधानमिदं येन केन चित्संबं-
धेन साध्यवत्त्वविवक्षणाभिप्रायेण ॥ यदि च संबंधसामान्येन विवक्षते तदा धूमवान्वह्नेरित्यादावतिव्याप्तिर्बोध्या ॥ अवृत्तित्वं नास्तीति ॥ विशिष्टाधेयताया अनतिरिक्तत्वादिति भावः ॥ फलि-
तोर्थ इति ॥ तथा च तन्निष्ठाधिकरणतानिरूपितावच्छेदकस्यैव निरूपितावच्छेदकस्यैव तन्निरूपिताधेयतावच्छेदकत्वनियमेन विशिष्टसत्तात्वस्य गुणाधेयतानवच्छेदकत्वान्नाव्याप्तिरि-
ति भावः ॥ अथ वेत्यादि लक्षणमवतारयितुमत्र लक्षणे दोषमाह ॥ नन्विति ॥ ननु केवलान्वयित्वज्ञानकाले पक्षताघटकसंशयाभावान्नैवानुमितिः ॥ तद्भिन्नकाले भ्रमात्मकव्याप्तिज्ञानादनु-
मितिर्भवत्येवेत्यत आह ॥ किं चेति ॥ इत्यादावित्यादिना संयोगेन हेतुतायां गुणवान्घटादित्यादेः संग्रहः ॥ ननु स्वाधिकरणवृत्तिसाध्यवदन्योन्याभावकत्वं लक्षणार्थः ॥ तथा च येन व्याप्ति-
रितिवेन्न ॥ वह्निमान्धूमादित्यादौ धूमाधिकरणे वह्निमदन्योन्याभावस्य कालिकसंबंधेन वृत्तेरव्याप्त्यापत्तेः ॥ साध्यवत्ताग्रहविरोधितानियामकसंबंधेनावृत्तित्वस्यावश्यं विवक्षणीयत-
या सत्ताभाववान्जात्यभावादित्यादावव्याप्तेः ॥ जा ॥ त्यभावाधिकरणे साध्यवत्ताग्रहविरोधितानियामकसमवायेन वृत्तेरप्रसिद्धेः ॥ न च सत्ताभाववान्जातेरित्यादौ स्वाधिकरणेत्यादिव्याप्तिज्ञानं
कारणं सत्ताभाववान्जात्यभावादित्यादौ तु साध्यवदन्येत्यादिव्याप्तिज्ञानं कारणमिति वाच्यम् ॥ तथापि संयोगसंबंधावच्छिन्नघटाभावे साध्ये विषयित्वे हेतौ घटे लक्षणद्वयस्याप्यव्याप्तेः

स्वपरंहेतुपरं=४

३०

न्या॰मु॰टी॰ ३१

इदमुपलक्षणं विशिष्टाभावमादायाव्याप्तिरित्यपि बोध्यम् ॥ नन्वेवं विशिष्ट
व्याप्तत्वस्य व्याप्तिधर्मेण विच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणत्वाव्या
प्तिरित्यत आह गुणवानिति ॥ २

साध्यतावच्छेदक=

तथाभूतसंयोगेन ॥ १

साध्यतावच्छेदकतावच्छेदकधर्मिकप्रतियोगितावच्छेदकतानवच्छेदकत्वप्रकारकतावच्छेदक=६ प्रकारकज्ञानत्वे ॥

स्वरूपेण जातित्वं तत्र आश्रयत्वं ज्ञातौ सा समवायेन ... =१

नत्र विषयितया हेत्वधिकरणे ज्ञाने साध्यवत्ताग्रहविरोधितानियामकसंयोगेन घटाधिकरणे हेतुतावच्छेदकविषयितया चन्द्रत्वेर प्रसिद्धेः ॥ नन्वतिरिक्तोभयाभावे मानाभाव इत्यत
आह ॥ एकसत्त्वेपीति ॥ अत्र हेतोरेकव्यक्तितया समानाधिकरणयोरेव व्याप्तिरित्युक्तावपि न निस्तार इति भावः ॥ एतद्रूपवानेन द्रव्यसाध्यादौ लक्षणसत्त्वादसम्भवासम्भवा
दाह ॥ गुणवानिति ॥ अव्याप्तिरितीति ॥ इति वाच्यमिति ॥ गुणत्वस्य द्रव्यत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वान्नाव्याप्तिरिति भावः ॥ परंपरया ॥ स्वाश्रयसमवायेन ॥ त
प्रि+ था चोक्तपरंपरया यदवच्छेदकं तदन्यत्वस्य जातित्वे सत्त्वान्नाव्याप्तिरिति भावः ॥ तादृशधर्मावच्छिन्नाभाव इति ॥ उक्तपरंपरया रूपत्वव्याप्यजातित्वावच्छिन्नस्य समवायेनाभावः
नास्तीत्यत आह पृथिव्यामित्यनेषच्यते ॥ मतान्तरमाह ॥ साध्यादीति ॥ आदिना साधनपरिग्रहः ॥ व्याप्तिभेदादिति ॥ व्याप्तिज्ञानस्य कारणताभेदादित्यर्थः ॥ एवंरीत्या निर्वाहे तत्र
साध्यतावच्छेदकतावच्छेदकधर्मिकप्रतियोगितावच्छेदकतानवच्छेदकत्वप्रकारकज्ञानस्य हेतुत्वेनोचितं कारणतावच्छेदकगौरवात् ॥ न च एवंरीत्या जातिमानित्येवानुमितिः स्यान्न
तु जातिमज्ज्ञानित्याकारकेति वाच्यम् ॥ पृथिवीत्वादिहेतुके जातिमानित्येवानुमित्याकारो जातिमज्ज्ञानित्याकारस्तु तद्व्यक्तित्वहेतुक इत्यदोषादित्यपि वदन्तीत्यामस्वरसः सूचितः
सुडमत्ता समानाधिकरणेति ॥ न च विशिष्टनिरूपिताधिकरणतया हेतुतावच्छेदकसंबंधत्वे कथं तेन संबंधेन सत्ताधिकरणं गुणः समवायस्य तथात्वे तु द्रव्यत्वे साध्ये विशिष्टस
त्तायां व्यभिचारित्वात्तेन व्याप्त्यभिधानमसंगतमिति वाच्यम् ॥ साध्याभाववद्वृत्तितावच्छेदकहेतुतावच्छेदकवत्त्वस्यैव व्यभिचारपदार्थतया सुडसमवायसंबंधस्य हेतुतावच्छेदकसं
बन्धत्वेपि विशिष्टसत्त्वस्य हेतोर्व्यभिचारित्वाभावात् ॥ नाव्याप्तिरिति ॥ न च हेतुतावच्छेदकविशिष्टसत्तात्वविशिष्टसत्ताया अधिकरणत्वस्य गुणे सत्त्वादेवं क्विवसणोपि कथमव्या
प्तिपरिहार इति वाच्यम् ॥ हेतुतावच्छेदकावच्छिन्ननिरूपिताधिकरणत्वस्य विवक्षितत्वाद्विशिष्टसत्तात्वस्य गुणनिष्ठाधिकरणतानिरूपिताधेयतानवच्छेदकतया तदवच्छिन्ननि
रूपिताधिकरणत्वस्य गुणेऽभावादिति ॥ तथैव ॥ तद्वत्स्येव ॥ तस्यैव वृत्त इति ॥ अधिकरणभेदेनाभावभेदानभ्युपगमादिति भावः ॥ प्रतियोग्यधिकरणवृत्तित्वम् ॥ प्रतियोग्यधिकरणाद
न्यभिन्नत्वम् ॥ विवक्षितत्वादिति ॥ प्रतियोगिव्यधिकरणपदेन विवक्षितत्वादित्यर्थः ॥ नन्वेवं हेतुसमानाधिकरणोत्यस्यैव यर्थ्ये ॥ सत्तावान् ज्ञानेत्यादौ सत्ताद्यभावस्य निरुक्तप्रति
योगिवैयधिकरण्याभावादव्याप्तिविरहादत आह ॥ स्वप्रतियोग्यनधिकरणेति ॥ निष्कर्षेति ॥ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावान्निष्कर्ष इत्यर्थः ॥ तथा च हेतुसमानाधि
करणत्वविशेषणबलादेव तादृशप्रतियोगिवैयधिकरण्यलाभान्न तद्वैयर्थ्यमिति भावः ॥ सत्ताधिकरणत्वेपीति ॥ तथा च विशिष्टसत्ताभावो न प्रतियोगिव्यधिकरणः ॥ अभावान्तरप्रति
योगितायाश्चानवच्छेदकमेव विशिष्टसत्तात्वमित्यतिव्याप्तिरिति भावः ॥ नज्ञातिः ॥ नातिव्याप्तिः ॥ एवमग्रेपि ॥ ननु प्रतियोगितावच्छेदकसंबंधेनैव प्रतियोग्यनधिकरणत्वमुच्यतां तां
वतापि ज्ञानवान्सत्त्वादित्यादावनतिप्रसंगादित्यत आह ॥ इत्यंचेति ॥ साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वविवक्षणे चेत्यर्थः ॥ वह्निविरहसत्त्वेपीति ॥ तथा च प्रतियोगितावच्छे
दकसमवायेन प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वाद्वह्नित्वस्याव्याप्तिः ॥ साध्यतावच्छेदकसंबंधावच्छिन्नत्वेनाग्रिमप्रतियोगिताविशेषणोत्संबंधद्वयप्रवेशेन

रद्यभाव१

हेतुसमानाधिकरणत्व विशेषण=४

विशिष्टनिरूपिताधिकरणतानिरूपसंबन्धेन=द्रव्यगुणकर्मान्यत्वविशिष्टसत्ता इत्यत्र=

अभावे=

स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभाव=

परंपरासंबंधेन रूपत्वव्याप्यजातित्वस्य साध्यतावच्छेदकत्वे=५ मूले उक्तोभयाभावेपि वदन्ति शरीराभ्यां=हेतुतावच्छेदकसंबंधत्वे=

हेतुतावच्छेदकविशिष्टहेत्वधिकरणस्य विवक्षणेपि=विशिष्टसत्तात्वावच्छिन्न=

णा+

घटाभावादि=

प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वकथनेनापि=

30A

भूतलादौ=

गौरवमितिभावः ॥ नन्वेतिः ॥ नाव्याप्तिः ॥ समवायेनवह्न्यभावस्यसाध्यतावच्छेदकसंयोगेनप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वाभावादितिभावः ॥ तत्सामान्यस्य ॥
तियोगितावच्छेदकावच्छिन्नसामान्यस्य ॥ यत्किंचिदिति ॥ यत्किंचित्प्रतियोगितावच्छेदकंतदवच्छिन्नसामान्यस्येत्यर्थः ॥ सर्वलक्षणवृत्तित्वविशिष्टेति ॥ सर्वलक्षणवृत्तित्वविशि
ष्टस्यस्वस्यघटाभावादेर्योभावस्तद्रूपात्मकेत्यर्थः ॥ घटाभावाद्यधिकरणेपिसर्वलक्षणवृत्तित्वविशिष्टघटाभावादेरभावस्यानरलक्षणवच्छेदेनसत्त्वादितिभावः ॥ नचसर्वलक्षणवृत्तित्वविशि
ष्टस्यघटाभावादेरभावस्याभावावास्यप्रतियोगीनघटाभावादेरितिवाच्यम् ॥ नचसर्वलक्षणवृत्तित्वविशिष्टस्यघटाभावादेर्योभावस्तदभावस्यसर्वलक्षणवृत्तित्वविशिष्टघटाभावस्व
पस्यघटाभावानतिरिक्ततयाविशिष्टघटाभावप्रतियोगिनस्तस्यकुत्रघटाभावस्यप्रतियोगित्वात् ॥ तथाचप्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽसंभवइतिभावः ॥ घटाभावात्मकतये
ति ॥ अभावाधिकरणकाभावस्यानतिरिक्तत्वादितिभावः ॥ इत्यादाविस्यादिनाऽभावसाध्यकसद्धेतुमात्रपरिग्रहः ॥ स्वरूपसंबंधइति ॥ अभावीयविशेषणतेत्यर्थः ॥ ए
वंलक्षणवृत्तित्वविशिष्टस्याभावेति ॥ सर्वलक्षणवृत्तित्वयत्स्वंघटाभावादिस्तदभावात्मकेत्यर्थः ॥ प्राचांमतेद्रव्येसंयोगसामान्याभावानंगीकारादाह ॥ कपीति ॥ घटाभावीयय
त्किंचित्प्रतियोगितावच्छेदकगुणसामान्यघटत्वावच्छिन्नानधिकरणत्वस्यहेत्वधिकरणेसंभवान्नप्रतियोगिव्यधिकरणाभावाप्रसिद्धिर्निबंधनाव्याप्तिःसंभवतीति
भावः ॥ घटत्वहेतुकेयत्किंचित्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वंहेत्वधिकरणस्यघटादेर्नसंभवति ॥ उत्पत्तिकालेघटेगुणसामा
न्याभावसत्त्वादत आत्मत्वपर्यंतानुधावनम् ॥ तृतीयविवक्षानुसारेणसमाधत्ते ॥ याद्दशीति ॥ याद्दश्याःप्रतियोगितायाःअवच्छेदकावच्छिन्नानधिकरणत्वंहेतुम
हेतुमतस्ताद्दश्याःप्रतियोगितायाअनाश्रयत्वमित्यर्थः ॥ विवक्षितत्वात् ॥ अप्रतियोगियदनविवक्षितत्वात् ॥ कपिसंयोगाभाववानात्मत्वादित्यादौगुणसामान्याभाव
त्वावच्छिन्नप्रतियोगितायाएवयाद्दशप्रतियोगितायेदेनोपादातुंशक्यतयातदवच्छेदकत्वस्यकपिसंयोगाभावत्वेसत्त्वान्नाव्याप्तिरितिभावः ॥ अत्रचयद्धर्मविशिष्टानधि
करणत्वंहेत्वधिकरणस्यतद्धर्मभिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्यलघोर्निर्दुष्टस्यसंभवेपियथासन्निवेशनवैयर्थ्यमितिबोध्यम् ॥ साध्यतावच्छेदकसंबं
धेनप्रतियोग्यनधिकरणत्वविवक्षणेऽव्याप्तिंशंकते ॥ नन्विति ॥ महाकालभेदविशिष्टघटाभावइति ॥ अभावीयकालिकविशेषणताघटितसामानाधिकरण्यसंबंधेनमहाका
लभेदविशिष्टस्यघटस्याभावादित्यर्थः ॥ महाकालेमहाकालभेदाभावादिति ॥ अभावीयविशेषणतासंबंधेनमहाकालभेदाभावादित्यर्थः ॥ सामानाधिकरण्यघटकीभूतविशेष
णविशेष्यसंबंधाभ्यांयत्रविशेषणविशेष्योभयवत्त्वंतत्रैवविशिष्टाधिकरणत्वोपगमादितिभावः ॥ ननुमहाकालमात्रवृत्तिविशेषणताविशेषेणसाध्यतायांमहाकालान्यत्व
विशिष्टघटाभावोपिनप्रतियोगिव्यधिकरणस्तत्रतेनसंबंधेनमहाकालान्यत्वविशिष्टघटाधिकरणाप्रसिद्धेरतआह ॥ वक्ष्यतइति ॥ अत्रप्रतियोगितावच्छेदकसंबंधेनप्रतियोग्य
नधिकरणहेत्वधिकरणवृत्त्यभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वघटितलक्षणकरणेपिकालोघटवान्नित्यादावव्याप्तिस्तदवस्थैव ॥ साध्यतावच्छे

महाकालमात्रवृत्तिविशेषणता
विशेषसंबंधेन=२

धिकरणा+

...णसामान्याभा
वत्वावच्छिन्नप्रतियो
गितावच्छेदकत्व
स्य=

महाकालादौ=

महाकाले=

घटत्व+

घटस्य=

प्रतियोगितावच्छेदकधर्मविशिष्टप्रतियोगिकाभाव
धी: धः उभयाभावः यत्संबंधावच्छि
न्नत्व यद्धर्मावच्छिन्नत्वोभयाभाववलक्षणीतत्पर्यवसानुधावनम्=१

कालिकविशेषणतासंबंधावच्छिन्न=१

31

व्या॰ मु॰ टी॰

३१

घटनिष्ठ

दकसंबंधावच्छिन्नताहशप्रतियोगितायाः प्रसिद्धेस्तत्प्रतियोगिताधर्मिकोभयाभावपर्यवसानुधावनम् । समवायेन वह्न्यभावप्रतियोगितायां वह्नित्वावच्छिन्नत्वसत्त्वात्सं
योगेन घटाभावप्रतियोगितायां साध्यतावच्छेदकसंयोगावच्छिन्नत्वस्य सत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिवारणाय यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वयोर्निवेशः । सं
योगेन घटाभावप्रतियोगितायां धूमत्वावच्छिन्नत्वघटितोभयाभावसत्त्वादतिव्याप्तिवारणाय सामान्यइति । अप्रसिद्धमिति । तथा चाव्याप्तिरिति भावः । यदि च कंबुग्री
वादिमान्नास्तीत्यादेः कंबुग्रीवादिमत्प्रतियोगिकाभाव एव विषयो न तु कंबुग्रीवादिमत्त्वेन तत्प्रतियोगितावच्छेदकत्वमपीत्युच्यते तदा यत्किंचित्पदस्वत्यापि कंबुग्रीवादिमा अभाव+
नास्तीति वाक्यस्याप्रामाण्यापत्तिरिति हृदि निधायाह । संक्षेप इति । मूले पक्षतानिरूपणे संगतेः प्रदर्शनाय प्रदर्शयति यत्तद्वृत्तित्वमित्यत्रेति । तथा च प्रकृतस्य परा संगीतं=
मर्शस्य घटकतया पक्षतेर्धर्मत्वमपि प्रकृतं तेनैवैपयादकत्वरूपोपोद्घातसंगत्या पक्षतानिरूपणं व्याप्तिनिरूपितेककार्यकारित्वमेव संगतिरित्यपि बोध्यम् । मूले पक्षता
निरूपणस्य स्वतंत्रतयानवकाशः पक्षतालक्षणं स्वातंत्र्येण दर्शयितुं तात्पर्यमाह । सिसाधयिषाविरहेति । घनगर्जितेन मेघानुमितिस्थले अव्याप्त्यापत्तेः सिसाधयिषामात्र
स्य पक्षतात्वं निषेधयति । सिसाधयिषामात्रेणेति । मेघानुमानात् । मेघानुमितेः । अत एव । वक्ष्यमाणदूषणादेव । सिसाधयिषाविरहरूपविशेषणस्य प्रयोजनमाह ।
सिद्धौ सत्यामिति । अतइति । अत्रानुमितिनिर्वाहकपक्षतासंपन्नत्यर्थमित्यर्थः । तत्र सिसाधयिषायां सत्यामसत्यामपीति । सत्यामुभयाभावप्रयुक्तस्यासत्यां विशे
ष्याभावमात्रप्रयुक्तस्योक्तविशिष्टाभावस्य सत्त्वादिति भावः । सिद्धौ सत्यामसत्यां चेति । सत्यां विशेषणाभावप्रयुक्तस्यासत्यां तूभयाभावप्रयुक्तस्य विशिष्टा
भावस्य सत्त्वादिति भावः । सिद्धेः सत्त्वादिति । सिद्धेः सत्त्वेन तदभावरूपपक्षताया अभावादिति भावः । सिसाधयिषाविरहवैशिष्ट्यं च सिद्धावेककालावच्छेदेन र
कालवृत्तित्वं तेन न सिसाधयिषाकालीनसिद्धेः कालिकसंबंधेन सिसाधयिषाविरहविशिष्टत्वेपि न क्षतिः । परामर्शरूपकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वे यथानुमितिः स्यात्त
दानीं स्यादुत्तेजकत्वं वाच्यं न चैतत्संभवतीत्याशंकते । ननु यत्रेति । परामर्शानंतरं परामर्शोत्पत्तिद्वितीयक्षणे ततः सिद्ध्युत्पत्तिद्वितीयक्षणे क्रमेणाव्यवधानेन । एवमन्यत्रापि यत्र प ति+
रामर्शसिसाधयिषासिद्धयः क्रमेण । एवं सिद्धिसिसाधयिषापरामर्शाः । एवं सिसाधयिषासिद्धयस्तत्रेत्यर्थः । सिद्धिकाले परामर्शकाले चेति । सिद्धिपरामर्शोभयक्षणे इ परामर्श+
त्यर्थः । कुत्रमिति । किमर्थमित्यर्थः । इति प्रत्यक्षमिति । अनुमितीच्छासाधनताविषयकमिति शेषः । प्रत्यक्षोत्पत्तेः पूर्वमनुमितीच्छासाधनताधीस्वीकारे इच्छासामग्र्या प्रति वक्तः संयोगरूपः=
बंधात्प्रत्यक्षमेव न स्यादिति । यादृश्या यादृशीत्यादि । घटानुमितिर्जायतामितीच्छासत्त्वेपि पर्वतो वह्निमानिति सिद्धिसत्त्वे पर्वतो वह्निमानित्युत्पत्तेः पर्वतो वह्निमानिति सिद्धिसत्त्वे
पि तदिच्छावलात्तादृशानुमित्यापत्तिरत उक्तं सिद्धिमत्त्वेपीति । इदं चोत्तेजकेच्छाव्यक्तेः परिचायकरूपमनुत्तेजकत्वं तद्व्यक्तित्वेनैवेति बोध्यम् । तेन तत्तदिच्छाया उत्तेजकत्वेन य
त्किंचिज्ज्ञानमित्यस्य । एतदुभयकालीनमित्यादि । अन्यथा यत्किंचिज्ज्ञानस्य सर्वदासिद्धत्वेन तद्रूपेणेच्छाविरहात् । नानुमितिरिति । नानुमित्यापत्तिरित्यर्थः । तदिच्छा

घटानुमितिर्जायतामितीच्छावत्ता=

सिसाधयिषाभावः=

यत्किंचिज्ज्ञानं जायतामितीच्छा=

पर्वतो वह्निमानित्यनुमित्यापत्तेः=

यादृशी यादृशीत्यादिकपदं=

३१

31 A

यत्किंचिज्ज्ञानं जायतामिति
तीच्छायाः व्यक्तित्वे=१

यत्किंचिज्ज्ञानं जायता
मितीच्छा=२

पर्वतो वह्निमानि
तिसिद्धिकाले=२

पर्वतो वह्निमानितिसिद्धि
सत्वे=१

अत्र मितिसामग्री=

मनःसंयोगादिरूपा=

यास्तद्व्यक्तित्वेनोनेकत्वानभ्युपगमादिति भावः ॥ नच यत्किंचिज्ज्ञानं जायतामित्येतादृशेच्छाकाले सिद्धिकालेप्यनुमितिर्भवत्वेवेति वाच्यम् ॥ अत्र मितिसामग्रीसत्वे आत्मादिविषयकयत्किंचि
न्मानसादिसामग्रीसत्वनियमेन यत्किंचिन्मानससाधारण्यस्यैव तादृशेच्छाविषयसिद्धेः तत्रानुमित्युत्पत्त्या विशापत्त्यसंभवात् ॥ नन्वनुमितित्वप्रकारकेच्छात्वेनानुगतरूपेणोवोनेकत्वं वाच्यम्
नावेतेव यत्किंचिज्ज्ञानं जायतामितीच्छावारणासंभवात्तन्न तत्तद्व्यक्तित्वेनानेकत्वं कल्प्यं गौरवादित्यतआह ॥ वह्निव्याप्येति ॥ प्रत्यक्षातिरिक्तं ज्ञानमित्यस्य ... सामग्र्यसत्वे
त्यादिपक्षादृशसामग्रीसत्वे ... तादृशेच्छाविषयसिद्धिसंभवात् ॥ भवत्येवेत्यनुमितिरित्यनेन संबध्यते ॥ तथाचानुमितित्वप्रकारकेच्छात्वेनानेकत्वेन तत्रानुमितिर्नस्यादिति भावः ॥ तद्भिन्न
कत्वप्रवेशस्य फलमाह ॥ एवमित्यादिना ॥ नानुमितिरिति ॥ इच्छायास्तद्व्यक्तित्वेनानेकतया तादृशेच्छाव्यक्तेरनतेजुकत्वादिति भावः ॥ इदं तु बोध्यम् ॥ पर्वते वह्न्यनुमितिर्जायतामि
त्याद्यनुगतेच्छानां पर्वतत्वावच्छिन्नविशेष्यकत्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयकत्वप्रकारताशाल्यनुमितिगोचरेच्छात्वेनानुगतरूपेणोवोनेकत्वं प्रत्यक्षातिरिक्तं ज्ञानं जायता
मित्याद्यनुगतेच्छानां तत्तद्व्यक्तित्वेन ॥ नतु सकलेच्छानां तत्तद्व्यक्तित्वेन गौरवादिति ॥ सिसाधयिषाकाले पर्वतो वह्निमानिति सिद्धिसत्वेपि पर्वतो वह्निमानित्यनुमित्युत्पत्तेस्ता
दृशसिद्धेर्न तादृशानुमितिं प्रति प्रतिबंधकत्वं स्यादत उक्तं सिसाधयिषाविरहकाल इति ॥ विशिष्य वक्तव्येति ॥ पर्वतो वह्निमानित्याद्यनुमितौ पर्वतत्वाद्यवच्छिन्नविशेष्यता
निरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबंधकतावच्छेदकत्वमित्यर्थः ॥ तत्प्रयोजनमाह ॥ तेनेति ॥ सिद्धेरेवेत्येवकारेण सामानाधिकरण्येन सिद्धिव्यवच्छेदः ॥ सामानाधिकर
ण्येनानुमितिं प्रतिबंधिति(?) ॥ सामानाधिकरण्यमात्रेणानुमितिं प्रतिबंधित्यर्थः ॥ अन्यथाऽवच्छेदकावच्छेदेनानुमितेरपि सामानाधिकरण्यावगाहितया तद्व्यवच्छेदानुपपत्तेः ॥ सिद्धिः
मात्रमिति ॥ पक्षविशेष्यकसाध्यप्रकारकनिश्चयत्वेन विरोधित्वमित्यर्थः ॥ उपाध्यायास्तु सिसाधयिषाविरहविशिष्टस्य सिद्धिसाध्योरन्यतरस्याभावः पक्षता ॥ तेन सिद्धिकाले समान
विषयकप्रत्यक्षसामग्रीकालेपि च नानुमित्यापत्तिरित्याहुः ॥ तद्दूषयितुं प्रत्यक्षसामग्र्यभावस्य पक्षताकुक्ष्यप्रवेशे प्रत्यक्षसामग्रीकाले कथं नानुमितिरित्युक्तं शिष्यजिज्ञासा
नुत्पादार्थं प्रथमतः स्वसिद्धान्तमाह ॥ इदं तु बोध्यमित्यादिना ॥ संशयोत्तरप्रत्यक्षे प्रतिहेतुभूतस्य विशेषदर्शनस्य सत्वादिति भावः ॥ एतादृशप्रत्यक्षसामग्रीविशेषपर्यन्तानुधावनं च तर्हि
यत्रेनुमितिसामग्रीसंपत्तिप्रदर्शनार्थं स्वातंत्र्येणानुमितिसामग्रीप्रदर्शनेन प्रयासापत्तेः ॥ स्वातंत्र्येणेति ॥ नतु पक्षताकुक्षिप्रविष्टत्वेनेत्यर्थः ॥ शाब्दसिद्धौ सत्यां मशब्दज्ञानं जायतामितीच्छा
यामनुमितेरुत्पादात् सिद्धावनुमितिगोचरेच्छात्वेन तादृशेच्छाकाले प्रत्यक्षसामग्रीकालेनुमित्युत्पादेन सामग्र्यामनुमितित्वप्रकारकेच्छात्वेनानेकत्वस्यावश्यकतया एकरूपे
णानेकत्वस्यासंभवात् ॥ एवंच यत्र सिसाधयिषाविरहसत्वे ? नैकसंबंधेन विशेषणत्वं सिद्धौ समवायघटितसामानाधिकरण्येन वक्तः संयोगरूपसामग्र्यां तस्याप्रयच ...
तेयुक्तमनःप्रतियोगिकविजातीयसंयोगघटितसामानाधिकरण्येनेत्येकरूपेणानयोः प्रतिबंधकत्वासंभवादित्याशयः इतिदिक् ॥ नन्वनुमितिं प्रति प्रत्यक्षसामग्र्याः स्वातंत्र्येण प्रति
बंधकत्वे भिन्नविषयेपि प्रत्यक्षसामग्रीकालेनुमित्युत्पत्तेः ॥ मन्मते त्वत्र मानाभिरिक्त(?)साध्यसाधकमानत्वेन पक्षताकुक्षौ तस्याः प्रवेशेनोक्तापत्त्यनवकाशादत आह ॥ एवमिति ॥ अनु

सिद्धौ सामग्र्यां च=

विशिष्य वक्तव्यत्यं=

प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छा

सिद्धिसामग्र्योः=२

प्रत्यक्षसामग्र्याः

भिन्नविषये प्रत्यक्षसामग्रीकाले
नुमित्युत्पत्त्यापत्त्यनवकाशात्=१

भिन्नविषये प्रत्यक्षसाम
ग्रीकाले=

हेत्वाभासवर्णने=३

मितिसामग्रीप्रतिबंधकेति॥ तथा च भिन्नविषयकानुमितिसामग्र्यभावघटितप्रत्यक्षसामग्र्याः सत्त्वाभावात्पूर्वोक्तस्थलेनुमित्यनुपपत्तिरिति भावः॥ पक्षतानुमितिसामग्रीप्र
तिबंधिकानुमितिसामग्र्येव प्रतिबंधिका न तु भिन्नविषये प्रत्यक्षसामग्र्यनुमितेः प्रतिबंधिकेत्यर्थः॥ तथा च प्रत्यक्षसामग्र्याः समानविषयकानुमितिं प्रत्येव प्रतिबंधकत
या न पूर्वोक्तानुमित्यनुपपत्तिरिति भावः॥ अथ हेत्वाभासाः॥ हेत्वाभासानिति॥ विजयलक्षणैककार्यकारित्वमत्र संगतिर्बोध्या। ननु लक्षणात्मकसाधारणध
र्मज्ञानं विना विशेषजिज्ञासानुदयाद्विभागो निश्चयोऽनवकाश इत्यतो लक्षणमाह॥ तल्लक्षणं त्विति॥ हेत्वाभासलक्षणं त्वित्यर्थः॥ लक्ष्ये लक्षणं ग्राहयति॥ तथाहीति॥ ते
व्यभिचारादयः॥ ननु यद्विषयकत्वेनेत्यत्र तृतीयार्थोऽवच्छेदकत्वं तथा च वह्निमान्ह्रदादित्यत्र वह्न्यभावेतिव्याप्तिः॥ पर्वतविशेष्यकवह्न्यभावप्रकारकनिर्णयत्वेन
वह्न्यनुमितिं प्रति प्रतिबंधकत्वे वह्न्यभावविषयकत्वस्य प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्॥ न च स्वरूपसंबंधरूपावच्छेदकतायाः पर्याप्त्यधिकरणत्वमनतिरिक्त
वृत्तित्वं वावच्छेदकत्वं तृतीयार्थः॥ वह्न्यभावविषयकत्वस्यावच्छेदककोटिप्रविष्टत्वेप्यवच्छेदकतापर्याप्त्यनधिकरणत्वादनतिरिक्तवृत्तित्वाच्च नातिव्याप्तिरिति वाच्य
म्॥ पर्याप्तिनिवेशेऽसंभवापत्तेः॥ अप्रामाण्यज्ञानानास्कंदितत्वस्याधिकस्य प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्॥ अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे ह्रदो व
ह्निमान्धूमादित्यादौ वह्न्यभावविशिष्टह्रदस्याव्याप्त्यापत्तेः॥ प्रतिबंधकत्वाभाववति ह्रदे इत्येतादृशज्ञाने वह्न्यभावविशिष्टह्रदविषयकत्वस्य सत्त्वात्॥ विशिष्टह्रदस्य
ह्रदानतिरेकादित्यत आह॥ यद्विषयकत्वेनेति॥ एतद्धि लक्षणप्रयोजनमाह॥ तेनेति॥ बाधभ्रमस्य॥ बाधभ्रमसाधारणस्य पर्वतविशेष्यकवह्न्यभावप्रकारकत्वादित्यर्थः॥ अ
नुमितिविरोधित्वेपि॥ अनुमितिविरोधितावच्छेदकत्वेपि॥ न तत्तेति॥ न वह्न्यभावादावतिव्याप्तिः॥ इतरथा तु वह्न्यभावविषयकत्वं पर्वतविशेष्यकवह्न्यभावप्रकारकत्वरूपानु
मितिप्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्तत्रातिव्याप्तिः स्यादिति भावः॥ यादृशविशिष्टेति विवक्षणेन तु तत्र नातिव्याप्तिरित्याह॥ तत्रेत्यादिना॥ न च वह्न्यभावविशिष्टपर्वतस्या
प्रसिद्धत्वेपि यादृशविशिष्टपदेन वह्न्यभावत्वविशिष्टवह्न्यभावस्योपादाने तत्रातिव्याप्तिरिति वाच्यम्॥ यादृशविशिष्टेति विवक्षणेऽनतिरिक्तवृत्तित्वस्यैवावच्छेदकत्वस्य
लक्षणे निवेशनीयतया वह्न्यभावविषयकत्वस्य प्रतिबंधकत्वाभाववति वह्न्यभाव इति ज्ञाने सत्त्वेन तत्रातिव्याप्तेरभावात्॥ न चैवं पूर्वोक्तरीत्या वह्न्यभावविशिष्टह्रदाद्याव
व्याप्तिरिति वाच्यम्॥ यादृशविशिष्टविषयकत्वेनेत्यस्य यद्रूपावच्छिन्नविषयकत्वेनेत्यर्थकत्वात्तत्त्वमित्यस्य च तद्वत्त्वमित्यर्थकत्वात्॥ ह्रद इति ज्ञाने च वह्न्यभावावच्छिन्नवि
षयकत्वाभावात्॥ अथवा अनतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्य विवक्षणेनुमितिप्रतिबंधकत्वाभाववति ह्रदो वह्निमान्न वेति संशये ह्रदो वह्निमानिति वा त्वाहार्यनिश्च
येऽप्रामाण्यज्ञानानास्कंदितत्वादृशनिश्चये च वह्न्यभावविशिष्टह्रदविषयकत्वस्य सत्त्वादसंभव इति चेन्न॥ ज्ञानस्येत्यत्र ज्ञानपदस्यानाहार्याप्रामाण्यज्ञानानास्कंदितनिश्च
यपरतया तादृशनिश्चयनिष्ठयादृशविशिष्टविषयकत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वमित्यर्थलाभादिति दिक्॥ सद्धेतुपदस्यानित्यदोषत्ववादीशकते॥ न च

वह्न्यभावविशिष्टह्रद
विषयकत्वेन ज्ञानस्यानु
मितिविरोधित्वेन हेत्व
म्=
वह्न्यभावे=

रूपमिति अनतिरिक्तवृ
त्तियादृशविशिष्टवि
षयकत्वरूपावच्छेदक
त्वनिवेशे=

विशिष्टह्रदस्य ह्रदानतिरेकात्प्रतिबंधकत्वाभाववति ह्रदे इत्ये
तादृशज्ञानेऽनतिरिक्तवृत्तिवह्न्यभावविशिष्टह्रदविषयकत्वसत्त्वादि
तिचेत् अनतिरिक्तवृत्तिवह्न्यभावविशिष्टह्रदविषयकत्वस्य ह्रदो
वह्निमान्धूमादित्यादौ वह्न्यभावविशिष्ट ह्रदावव्याप्त्या=५

३२A

यद्वेति ॥ विशिष्टस्यासिद्धत्वादिति ॥ पाषाणमयत्वेन वह्न्यभावव्याप्यत्वाभावादिति भावः ॥ इष्टापत्तेरिति ॥ तथा च सद्धेतौ तत्प्रतिपरामर्शेपि नदुष्टत्वमिति भावः ॥ अन्यथा ॥ प्रतिबंधकीभूतभ्रमविषयस्या
विदोषत्वे ॥ अनित्यदोषत्वापत्तेरिति ॥ पक्षे साध्याभावभ्रमदशायां सद्धेतावपि दोषत्वापत्तेरित्यर्थः ॥ इत्यंच ॥ यादृशविशिष्टविषयत्वेन ज्ञानस्य प्रतिबंधकत्वं तादृशविशिष्टस्य दोषत्वेच ॥
हेत्वादिकमित्यादिना साध्याभावविशिष्टपक्षपरिग्रहः ॥ यादृशविशिष्टपदेन व्यभिचारित्वादिविशिष्टव्यभिचारादिकमादाय लक्षणं न संभवति ॥ व्यभिचारविषयकत्वस्य प्रतिबंधक
ताघटकत्वेव्यभिचार इति ज्ञाने वृत्तित्वेनातिरिक्तवृत्तित्वात् ॥ किंतु व्यभिचारादिविशिष्टं हेत्वादिकमादायैवेति व्यभिचारादिविशिष्टहेत्वादिकमेव दोष इति भावः ॥ ननु व्यभिचारादिविशिष्ट
स्य हेतौ दोषत्वे तद्वत्त्वस्य हेतावभावाद्धेतौ दुष्टत्वव्यवहारो न स्यात् ॥ न च तादात्म्येन तद्वत्त्वं विवक्षणीयमिति वाच्यम् ॥ तथा सति वह्न्यभावविशिष्टह्रदे तादात्म्येन धूमेऽभावेन ह्रदपक्षके धू
मस्य दुष्टत्वं न स्यादित्यत आह ॥ तद्वत्त्वं चेति ॥ न च वह्निव्यभिचारविशिष्टस्य व्यत्वादेर्धूमेपि सत्त्वादिति व्याप्तिरिति वाच्यम् ॥ यादृशविशिष्टविषयकज्ञानत्वेन यद्धेतुकानुमितिप्रतिबंधकत्वं
तादृशविशिष्टस्याश्रयतद्धेतुत्वस्यैव दुष्टत्वादिति ॥ सत्प्रतिपक्षादेरनित्यदोषत्ववादिनामतमाह ॥ परेत्विति ॥ नन्वेव ह्रदाभावादिव्याप्यत्वे तत्पक्षे तोयादौ तंशकालेपि तस्याधूमादिहेतावना न धूमस्य दुष्ट
त्वं स्यादित्यत आह ॥ तद्वत्त्वं चेति ॥ ज्ञानेति ॥ एकज्ञानविषयत्वेन तद्वत्त्वमित्यर्थः ॥ तद्वत्त्वस्य ॥ साध्याभाववत्त्वस्य ॥ तत्र ॥ बाधकालीने धूमादिसद्धेतावित्यर्थः ॥ अत्र ॥ प्रतिपरामर्शकालीने धू
मादिसद्धेतौ तत्कल्पनात् ॥ ज्ञानस्य संबन्धत्वकल्पनात् ॥ न तु सद्धेतावपि बाधित इति व्यवहारेण संबन्धत्वकल्पनेन ज्ञानस्य भविष्यतीत्यत आह ॥ तत्रेति ॥ बाधभ्रमकालीने सद्धेतावित्यर्थः
प्रत्युतायं न बाधितः पुरुषस्य भ्रान्त इत्येव व्यवहारादिति भावः ॥ तादृशव्यवहाराव्यवहारयोः स्वानुभवमात्रसाक्षित्वमतः इत्यस्वरसबीजम् ॥ यथाकथंचिद्विरोधित्वत्यागेबीजमाह ॥ तेने
त्यादिना न तु तद्धेतुकत्वं तस्यानुमितिप्रतितद्धेतौ न साध्यव्यभिचारप्रकाशाभावो हेतुवीत्यत आह ॥ तद्भावेति ॥ न क्षतिः ॥ नाव्याप्तिः ॥ नन्वत्र लक्षणोऽवच्छेदकत्वं न स्वरूपसंबंधविशेषः ॥ प्र
योक्तदोषादित्यनतिरिक्तवृत्तित्वमेव निवेशनीयम् तथा च धूमवान्वह्नेरित्यादौ धूमे यत्व विशिष्टव्यभिचारेति व्याप्तिस्तद्विषयत्वस्य प्रतिबंधकतानतिरिक्तत्वादत आह ॥ संज्ञेयइति ॥ प्रकृतानुमि
तिप्रतिबंधकतावच्छेदकानतिराघटितत्वेनानुमितिविरोधितावच्छेदकं विशेषणीयं धूमे यत्वविशिष्टव्यभिचारस्य प्रकृतानुमितिप्रतिबंधकतावच्छेदकीभूतो यो व्यभिचारस्तद्घटित एवेति न तत्राति
प्रसंग इति दिक् ॥ नन्वत्रानुमितितत्करणज्ञानान्यतरप्रतिबंधकत्वमन्यतरनिष्ठप्रतिबध्यतानिरूपकत्वघटितं घटितदा पर्वतो वह्निमान्धूमादित्यादौ वह्न्यभावविशिष्टह्रदस्यापि दोषताप्र
संगः तस्य पर्वतो वह्निमान् ह्रदो वह्निमानिति समूहालम्बनात्मकप्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वात् ॥ यदि च तादृशान्यतरत्वावच्छिन्नप्रतिबध्य
तानिरूपकत्वघटितं तदा तादृशान्यतरत्वस्य कस्यचित्प्रतिबध्यतानवच्छेदकतया संभवः तादृशान्यतरत्वव्यापकप्रतिबध्यतानिवेशेच सव्यभिचारादौ बाधादौ चाव्याप्तिः ॥ व्यभिचारा
देरनुमित्यविरोधितया बाधादेश्च व्याप्तिज्ञानाविरोधितया तत्प्रतिबध्यतायास्तत्याविधान्यतरत्वाव्यापकत्वात् ॥ किंच तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकतद्धर्मावच्छिन्नहेतुकानुमि
तितत्करणज्ञानान्यतरविरोधित्वं लक्षणे निवेशनीयम् ॥ अन्यथा पर्वतो वह्निमान्धूमादित्यादौ पर्वतादेः कांचनमयत्वाभावो हेत्वाभासः स्यात् ॥ एवं च निर्वह्निः पर्वतो वह्निमानिति वह्नि

हेतुमत्वस्य=

तादात्म्येन तद्धत्त्वविवक्षणे=५

हेत्वाभासलक्षणे=

स्था+

तद्वह्न्यभावविशिष्टह्रदविषयकत्वस्य=

अनुमितितत्करण=

अनुमितितत्करणान्य
तरनिष्ठ=२

आश्रयासिद्धरूपो
हेत्वाभासः स्यात्=१

साधारणस्य =

न्या० सू० टी०
३३

मानित्यादौ नकोपि हेत्वाभासः स्यात्तादृशानुमितेरप्रसिद्धेरत आह यादृशसाध्येति सम्भवेत्तु वायुर्गन्धवान्स्नेहादित्यादौ सर्वहेत्वाभाससम्भवइतिभावः हेत्वाभासलक्षणमुक्त्वा तद्
भेदस्य मानाणोश्च नैकान्तिकादिलक्षणमुक्तं चिकीर्षुर्दोषहरिनिधाय स्वयमनैकान्तिकादीनां लक्षणान्याह एवमिति साधारणेत्यादिना साधारणानुपसंहारिणोः प्रसिद्ध
हः नन्वेतस्यानुमितितत्करणज्ञानान्यतरविरोधिज्ञानविषयत्वाभावात्कथं हेत्वाभासत्वमित्यतो दूषकतावीजमाह तेनचेति एवमग्रेपि क्रियतइति व्याप्तिघटकाव्यभि
चारांशे व्यभिचारज्ञानस्य प्रतिबंधकत्वादितिभावः प्रतिबध्यतइति व्याप्तिघटकीभूतसामानाधिकरण्यग्रहः प्रतिबध्यतइत्यर्थः एवंच साधारणासाधारणानुपसंहारिणां व्या
प्तिज्ञानप्रतिबंधकरूपदूषकतावीजैक्येनैकहेत्वाभासत्वमुपपद्यते साधारणेनाव्यभिचारग्रहस्यासाधारणेन सामानाधिकरण्यग्रहस्यानुपसंहारिणाच व्यतिरेकव्याप्तिग्रहस्य
प्रतिबंधादितिभावः प्राचीनमतमाह अन्येत्विति पक्षेसाध्यसन्देहदशायामेवासाधारणस्य हेत्वाभासतानतु निश्चयदशायां तदा पक्षे साध्यनिश्चयत्वेन निश्चितसाध्यवत्त्वा
द्वेतुत्वाभावादित्यनित्यदोषत्वं तस्येत्याह इत्थं चेति असाधारण्यघटकसपक्षत्वस्य निश्चयघटितत्वेवेत्यर्थः तत्र निश्चितसाध्यवतिपक्षे साधारणादित्रयाणामे
कहेत्वाभासत्वानुपपत्तिर्वेदत्तीत्यनेनास्वरसः सूचितः व्यतिरेकव्याप्तिग्रहप्रतिबन्धइति केवलान्वयिसाध्यके चान्वयव्याप्तिज्ञानादेवानुमितिरितिभावः नन्वेवं साध्याभा
वसाधकात्सत्प्रतिपक्षाद्विरुद्धस्य भेदो नस्यादत आह सत्प्रतिपक्षेत्विति प्रतिहेतुः प्रतिकूलो द्वितीयो हेतुरिति विशेषः इत्यनयोर्भेदः ननु दूषकतावीजैक्येपि हेतुभेदे
सत्प्रतिपक्षो हेत्वैक्ये विरुद्धरूपे हेत्वाभासान्तरमित्युच्यते तदा यत्रान्वयिना हेत्वन्तरेण प्रतिरोधस्तत्र सत्प्रतिपक्षो यत्रतु व्यतिरेकिणा तत्र हेत्वाभासान्तरं स्यादतो भेदकान्तरम
प्याह साध्याभावेति वस्तुगत्या साध्याभावसाधके हेतावेवतु वसाध्यसाधकत्वभ्रमइति स्थापनावादिनं प्रति भ्रमरूपाशक्तिसूचकत्वमसाधारणत्वमस्यनत्वेवं सत्प्रतिपक्ष
स्येतिभावः साध्याभावव्याप्येति एवं साध्यवदन्यत्वव्याप्यवान्पक्षः पक्षनिष्ठसाध्याभावसाध्यवदन्यत्वव्याप्यावयविवोध्यो अन्यतमत्वादित्यादिनातुगमात्रविभागव्या
घातः सत्प्रतिपक्षव्यवहारोपयिकमन्येषां सत्प्रतिपक्षलक्षणमाह अगृहीतेति नित्यत्वव्याप्यशब्दत्ववत्ताज्ञानस्यकालीनानित्यत्वव्याप्यकृतकत्वपरामर्शसत्त्वेपित
त्प्रतिपक्षव्यवहाराभावात्कालीनान्तमुपस्थितिवि शेषणम् गृहीताप्रामाण्यकनित्यत्वव्याप्यवत्ताज्ञानकालीनानित्यत्वव्याप्यकृतकत्वपरामर्शसत्त्वेपि तद्व्यवहा
राभावादगृहीताप्रामाण्यकेतिप्रथमोपस्थितिविशेषणम् तादृशकालीनानित्यत्वव्याप्यवत्तापरामर्शसत्त्वेपिनत्राप्रामाण्यग्रहकालेतथाव्यवहाराभावादगृहीता
प्रामाण्यकत्वं द्वितीयोपस्थितिविशेषणम् व्यवहारमात्रोपयोगिनो निरुक्तरूपस्यप्रकृतानुपयोगः उपस्थितिघटितस्योक्तरूपस्यस्वरूपसत एवोपयुक्तस्याभासः
तायामप्रयोजकत्वादित्यस्वरसः सूच्यतइत्यन्येत्विति सत्प्रतिपक्षस्य दूषकतावीजं प्रदर्शयति अत्रेत्यादिना सत्प्रतिपक्षस्य संशयजनकत्वं दूषकतावीजं तत्त्वनुमितिप्रति
बंधकत्वं तदभावव्याप्यवत्ताज्ञानस्यानुमितिप्रतिबंधकत्वे मानाभावादितिरत्नकोषकारमतं दूषयितुमुपन्यस्यति अत्रकेचिदित्यादिना अनुमितिर्भवत्येवेति अनुमि

असाधारणस्य =

व्याप्तिग्रहप्रतिबंधकतया = न कामिनानस्यानुमिति प्रतिबंधकत्वात् =

विरुद्धस्य =

सत्प्रतिपक्ष =

सत्प्रतिपक्ष =

नित्यत्वव्याप्यशब्दत्ववत्ताज्ञानकालीन =

स्वरूपसंबंधरूपावच्छेद
कत्वाभावाद्व्याप्यत्वासिद्धि
नीकारे सति=१ नीलधूमत्वावच्छेदेन=१ वह्न्यभाव+ वह्निव्याप्य=वह्न्यभावव्याप्यत्वारोपरूप= व्याप्यत्वव्याप्यस्यैव पुरुषत्व व्याप्यकरादि= स्थाणुत्वव्याप्य वोवा=

33A

तिं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे मानाभावात् तत्र वह्न्यभावानुमितिसामग्रीभ्यामेव तत्तदभावकोटिकसंशयानुमित्युपपत्तौ संशयानुमितिं प्रत्युभयव्याप्यवत्ताज्ञा-
नस्य पृथक्त्वेनातिरिक्तहेतुताकल्पनप्रयुक्तगौरवाभावादिति भावः न च पक्षे उभयव्यासक्तत्वे उभयभानं तदापि प्रत्येकदोषसत्त्वेपि पीतत्वशङ्खत्वोभयस्य ताभ्यामेवानापत्तिरित्यत आह
फलबलेन चेति तथा च तत्र पीतत्वसाक्षात्कारस्यैवानुभविकतया शङ्खत्वग्रहे पित्तरूपदोषस्य प्रतिबन्धकत्वं कल्पयित्वा पीतसाक्षात्कारसामग्र्या अधिकबलत्वमेवं स्थाणुत्वग्रहे दोषस-
त्त्वेपि स्थाणुत्वपुरुषत्वयोः स्थाणौ संशयस्यैवानुभवात् सामग्र्योः समबलत्वमेव कल्प्यत इति भावः ज्ञानमात्रे तादृशज्ञानत्वावच्छिन्ने विशेषे दोषविशेषाजन्ये गौरवादिति कार्यकार-
व+ णभावद्वयकल्पने गौरवादिति भावः कथमनुमितिरिति अनुमितेरपि तत्प्रतिबध्यतावच्छेदकाक्रान्तत्वादिति भावः कथं तत्सामर्थ्यं व्याप्यवत्तानिश्चयात्मात्यन्तिकः संशयस्यापि अनु- तदभावव्याप्यवत्ताज्ञानत्व=
उभयव्याप्यवत्ता= न भवत्येव तावद्व्याप्त्यनिश्चये प्रामाण्यं न स्यादित्यत आह यत्र चेति आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धिव्याप्यत्वासिद्ध्योः परिग्रहः साध्याप्रसिद्ध्यादीनामाधिक्यं निराकरोति सा-
ध्याप्रसिद्ध्यादय इति आदिना साधनाप्रसिद्धिपरिग्रहः केषांचिन्मतमाह एवं वह्निमानित्यादिना वदंतीत्यनेनास्वरससूचितः तत्र नीलधूमे व्याप्तिसत्त्वात्कथं व्याप्यत्वासिद्धिः न च तत्र व्याप्ति- अस्वरससूचितं=
हेतुतानवच्छेदकतया= सत्त्वेपि नीलधूमत्वादीनामनवच्छेदकतया तदवच्छेदेन व्याप्यत्वासिद्धिरेवेति वाच्यम् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य नीलधूमेपि सत्त्वात् स्वरूपसंबंधरूपावच्छेदकत्वाभावाद्व्याप्य-
त्वासिद्धिरित्यपि न तथा सति पक्षमात्रसाध्यादिमतः स्यादावपि व्याप्यत्वासिद्ध्यापत्तेः साध्याद्यपेक्षया गोत्वादिजातेर्लघुत्वेन साध्यादेः स्वरूपसंबंधरूपावच्छेदकत्वाभावात् अतएवानी- स्वरूपसंबंधरूपहेतुतावच्छेदकत्वस्य धूमत्वादिनीलधूमत्वेभावात्=
तत्स्यात् लधूमत्वादेः स्वरूपसंबंधरूपावच्छेदकत्वाभावात्तदवच्छेदेन व्याप्त्यभावरूपाव्याप्यत्वासिद्धिर्न तद्धेत्वाभासत्वम् अनुमितिकरणीभूतव्याप्तिज्ञानाविरोधित्वात् न च वह्निमान्स्यादित्य-
मेयवानिति शमेयत्वसामानाधिकरण्येन व्याप्यवत्ताज्ञानादनुमित्यापत्तिवारणाय हेतुतावच्छेदकावच्छेदेन व्याप्तिज्ञानस्यैव करणतया तद्विरोधितया निरुक्तव्याप्यत्वासिद्धेर्हे-
त्वाभासत्वमिति वाच्यम् तावताप्यनतिरिक्तवृत्तित्वरूपावच्छेदकत्वेपि तत्र स्वरूपसंबंधरूपावच्छेदकत्वाभावग्रहस्याग्राह्याभावानवगाहितया विरोधित्वात् तस्माद्यथाविशे-
षणत्वेन व्याप्यत्वासिद्धिर्हेत्वाभासः पुरुषत्वाधिकेनेरहात इति साध्याप्रसिद्ध्यादिना साध्यवदन्यत्वस्य पक्षावृत्तिसाध्यादेश्च परिग्रहः तद्धर्मिकतदभावनिश्चयः अ-
ता+ नाहार्यप्रामाण्यज्ञानानास्कंदित तद्धर्मिकतदभावनिश्चयः बाधबुद्धौ तत्संनिकर्षे लौकिकसंनिकर्षजन्यविशिष्टबुद्धेरानुभविकत्वादाह लौकिकसंनिकर्षाजन्येति नं चैतदिंद्रियज- न्वे+
न्यलौकिकबाधनिश्चयोत्तरं तदिंद्रियजन्यलौकिकविशिष्टबुद्ध्यापत्तिरिति चेन्न अलौकिकत्वं प्रतिबध्यतावच्छेदककोटौ निवेश्य तदिंद्रियजन्यतद्विशिष्टबुद्धौ तदिंद्रियजन्य-
लौकिकतदभावनिश्चयत्वेन प्रतिबंधकत्वोपगमात् तदिंद्रियजन्योपनीतभानात्मकबाधनिश्चयोत्तरं तदिंद्रियजन्यलौकिकतद्विशिष्टबुद्धेरप्रतिबध्यतावच्छेदकको-
टौ लौकिकत्वस्य निवेशः न चालौकिकतदिंद्रियजन्याभावप्रमास्थले तदधिकरणे प्रतियोगिनः सत्त्वादेव न तद्विशिष्टलौकिकप्रत्यक्षापत्तिरित्यलं तथाविधप्रतिबध्यप्रति- साध्य=
धिकरणा+ बंधकभावेनेति वाच्यम् यत्र प्रतियोग्यधिकरणे एकसंनिकर्षेण तत्र तदभावस्य लौकिकप्रत्यक्षात्मकारोपो दोषेण जनितः तदुत्तरं तदधिकरणे प्रतियोगिनो लौकिकप्र-

अभावप्रमाधिकरणे=२ लौकिकघटधीरिति प्रत्यक्षापत्तिः=३ तत्तदनंतरं=१ प्रतियोग्यधिकरणे आरोपिताभावाधिकरणे=१

34

न्या॰मु॰टी॰
३४

घटाभावाधिकरणो घटवा इति
अन्यदीयस्यारतत्सत्त्वाभावत्तदन्वयोः
प्रतिवध्यप्रतिवंधकभावो मतः ॥१॥
घटाभावाधिकरणे ॥

लौकिकसंनिकर्षाजन्यापित्तमंडूकवसांजनादिदोषा
जन्यतादृिपतन्यतहिशिष्टबुद्धौ अन्यतायाम्प्रामा
ण्यज्ञानाभाकरितत्तदिन्द्रियजन्यलौकिकत्वाभाव
निश्चयोविरोधी ॥५॥

घटज्ञानेनस्या
दिति ॥

दोषस्य प्रतिवंधकत्वानंगीकारे ॥१॥

स्यैज्ञापादनात् तत्राभावलौकिकप्रत्यक्षजनकदोषस्य प्रतिवंधकत्वादेवनियमाद्वह्निरन्यथाभावारोपोत्पत्तिरूपो प्रतियोगिप्रत्यक्षापत्तिरिति चेन्न यत्रविनश्यदवस्थदो
षेणाभावलौकिकप्रत्यक्षात्मकारोपस्तदुत्तरं प्रतियोगिप्रत्यक्षापादनात् यत्राभावलौकिकप्रमासमकालं तद्वितीयक्षणेवा तदधिकरणे प्रतियोगिप्रकारकानुभवाय — घटाभावाधिकरणे
मानोरोपजनकदोषसमवधानेन तत्राभावप्रमोत्तरं प्रतियोगिनो लौकिकप्रत्यक्षात्मकारोपापादनवारणाय वा इन्द्रियभेदेन तथाविधप्रतिवध्यप्रतिवंधकभावोपगमात्
शंखो न पीतो वंशो नोरग इति निश्चयेपि पित्तमण्डूकवसांजनादिदोषवशाच्छंखः पीतः वंशउरग इत्यारोपोदयात्तत्रव्यभिचारवारणाय दोषविशेषेति दोषसामान्याजे
न्यत्वनिवेशे भ्रममात्रस्यैव बाधाप्रतिवध्यत्वापत्तिरतो विशेषेति तथाच पित्तमण्डूकवसांजनादिदोषाविशिष्टोपादायतदजन्यत्वे प्रतिवध्यतावच्छेदककोटौ निवेश
नीयमितिभावः नचपित्तद्रव्यात्मकदोषाजन्यत्वनिवेशो व्यर्थः शंखः पीत इतिभ्रमे शंखांशेनुभूयमानस्यैव पित्तद्रव्यपीतिम्न आरोपोपगमेन तदंशे लौकिकत्वादलौकि — पित्तांशे
कत्वस्य प्रतिवध्यतावच्छेदके निवेशादेव तत्रव्यभिचारवारणादिति वाच्यम् पित्तद्रव्यस्यांतरालावस्थानदशायामपि तत्पीतिम्नः शंखवादीप्रत्यक्षोदयेन स्वयं माणारोपस्यैव — पीतत्वांशे
तत्रनवीनैः स्वीकारात्तदंशे तस्यालौकिकत्वात् तथासति शंखः पीत इतिप्रत्यक्षोत्तरं पीतं साक्षात्करोमीति साक्षात्कारित्वग्रहानुपपत्तिस्तद्व्यंजकलौकिकविषयताया — साक्षात्कारित्वग्रह
पीतत्वांशे वे॰ स्तत्राभावादिति चेन्न लौकिकविषयतायाऽव दोषविशेषजन्यत्वस्यापि साक्षात्कारित्वव्यंजकत्वात् अन्यथा यत्तुरग इति स्मर्यमाणारोपे साक्षात्कारित्वग्रहानुपपत्तेः — दोषविशेषाजन्यत्वस्य भावात्कारित्वजनकत्वाभावः
शंखो न पीत इत्यादिनिरिन्द्रियजन्यबाधबुद्ध्युत्तरं पित्तादिदोषवशात्तदिन्द्रियजन्यः शंखः पीत इत्यारोपो यद्यनुभवसिद्धस्तदा स्वरूपोक्तेन्द्रियभेदभिन्नप्रतिवध्यप्रतिवंध
कभावेपि दोषविशेषाजन्यत्वं प्रतिवध्यतावच्छेदके निवेशनीयमिति बोध्यम् नचप्रतिवध्यतावच्छेदककोटौ लौकिकान्यत्वस्य निवेशो बाधनिश्चयोत्तरं लौकिकसन्निकर्षजन्य
संशयापत्तिरिति चेन्न भूतलं घटवदित्याकारकलौकिकप्रत्यक्षोत्पत्तिकाले स्वातंत्र्येण कथंचिदुपस्थितस्य घटाभावोदर्भूतलेप्रकारतयाभानवारणाय समानधर्मितावच्छे
दककतत्कोटिलौकिकप्रत्यक्षसामग्र्याविपरीतकोटिभानप्रतिवंधकत्वमंगीकरणीयम् तथाच बाधनिश्चयोत्तरमपि तत्प्रायान्तेः लौकिकसंनिकर्षजन्यसंशयस्यतत्कोटि
लौकिकप्रत्यक्षसामग्र्याः प्रतिवंधकायाः सत्त्वेन विपरीतकोटिभानासंभवात् तर्हि क्वापि लौकिकसन्निकर्षजन्यसंशयो न स्यादिति चेदोम् ज्ञानप्रत्यासत्त्यैव स्वोपस्थि
तकोट्याभानसंभवादिति यत्र संशयस्थले तत्कोट्यंशे लौकिकसन्निकर्षसत्त्वे कथं संशयस्य न लौकिकत्वं कथं वा तत्र संशये विपरीतकोटिभानम् तत्कोटिलौकिकर
प्रत्यक्षसामग्र्याः प्रतिवंधकायास्तत्रसत्त्वादिति चेन्न तत्रलौकिकसन्निकर्षसत्त्वेपि संशयजनकदूरत्वादिदोषस्य लौकिकप्रत्यक्षप्रतिवंधकस्य सत्त्वेन लौकिकप्रत्यक्षसाम
ग्र्यभावादुभयोपपत्तेरित्यन्यत्रविस्तरः कस्यचिन्मतं दूषयति नत्विति इति युक्तमित्यनेनान्वयः नन्वेवं बाधनिश्चयकाले संसर्गाभावत्वज्ञानाभावादेवानुमित्यभावोपपत्तौ बाध
निश्चयस्यनानुमितिविरोधित्वमिति हेत्वाभासत्वेन स्यादत आह नहीति विरोधितयेति अनुमितिकारणीभूतसाध्यसंसर्गत्वज्ञानविरोधितयेत्यर्थः नन्वप्रसिद्धसाध्यकानुमि

34A

यत्र पक्षे साध्याभाव
ज्ञाने जाते=

असिद्धिर्हि परामर्शप्रतिबंधकतया दोषः तथा च यत्र भ्रमात्मक... व प्रतिबं
१ परामर्शो जातस्तत्र बाधे सत्यनुत्पत्तुं त्यक्तिः बाधस्यानुमिति... धकत्वम्=२
प्रतिबंधकतया दोषत्वात् एवं भ्रमात्मकव्याप्तिज्ञाने जाते तत्र वा

(साध्यनिश्चय=) तिः कुत्रापि न भवत्येवात आह साध्यसंशयेति ननु संशयशून्यकालेपि सिसाधयिषाकालीन साध्यनिश्चयात्मकं साध्यसंसर्गज्ञानमस्त्येवेत्यत आह आदीति आदिनासि
साधयिषाकालीनसिद्धिपरिग्रहः न च संशयानन्तरोत्पन्नेवानुमितिरिति वाच्यम् सति विशेषदर्शने संशयायोगात् पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयोनुमि
तिप्रतिबंधकस्तदभावः कारणमतस्तादृशप्रमात्वमेव बाध इति प्राचीनमतं दूषयति एवमिति प्रमात्वज्ञानमपि प्रमात्वनिश्चयोपि मानाभावादिति यत्साभावानवगाहि
(प्रमात्वनिश्चयस्य=) नस्तादृशज्ञानस्य विरोधित्वे मानाभावादित्यर्थः ननु पक्षे साध्याभावज्ञानेपि तत्राप्रामाण्यकाले नुमितेरुदयात् साध्याभावज्ञाने प्रतिबंधकम् अस्मन्नाने तु तदा साध्या
भावज्ञानप्रामाण्यनिश्चयाभावादेवानुमित्युत्पत्तिरित्यत आह गौरवादिति तथा च तत्रानुमितिनिर्वाहाय संशयनिश्चयसाधारणाप्रामाण्यज्ञानाएव प्रतिबंधकतावच्छे (अप्रामाण्यज्ञानका... भावः+)
दककोटौ निवेश्यते न तु पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयत्वेन प्रतिबंधकत्वं गौरवादित्यर्थः यत्र पक्षे साध्याभावज्ञानं न तत्र प्रामाण्यज्ञानं न वाऽप्रामाण्यज्ञानं
(साध्याभावविशिष्टप... =) तत्रनानुमितिर्भवत्येवेति भावः साध्याभावत्वसंघटिते प्रमात्वविषयकत्वे नुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वसत्त्वात्तस्याभासत्वं दुर्वारमिति तन्न प्रमेयत्वविशिष्टव्यभिचारादेरिवता (प्रमात्वीयस्य=)
दृशविशिष्टान्तरघटितत्वेनाभासत्वायोगादिति ननु गृहीताप्रामाण्यकसाध्याभावनिश्चयस्य प्रतिबन्धकत्वे प्रथमोपस्थितप्रमात्वनिश्चय एव तथास्यादत आह अन्यथेति सत्प्रतिपक्षादावि (प्रतिबंधकः स्यात्=)
त्यादिनाऽसिद्ध्यादिपरिग्रहः प्रतिबंधकत्वापत्तेरित्यस्यानुमित्यादावित्यादि ननु साध्याभावज्ञानप्रमात्वज्ञानेनुमितिप्रतिबंधस्तदभावे तन्नेत्यन्वयव्यतिरेकाभ्यां प्रमात्वज्ञानस्यानुमिति
प्रतिबंधकत्वमत आह किंन्विति कुचिदिति तथा चानुमितितत्करणज्ञानान्यतरप्रतिसात्त्वात्प्रतिबंधकीभूतज्ञानविषयत्वाभावात् साध्याभावप्रमात्वभास इति भावः व्यभिचारस (मा+)
तादेरित्यादिनासिद्धिपरिग्रहः भेदादिति तथा च बाधस्य लेसिद्धिव्यभिचारान्यतरनियमेपि बाधज्ञानस्य व्यभिचारादिविषयकत्वाभावेन तस्य हेत्वाभासान्तरत्वमिति भावः न च हेतुमान्य (बाधस्य=)
हेः साध्याभाववानित्याकारक एव बाधपरिग्रहः कुतो न भवति सामग्रीसत्त्वात्तथा च व्यभिचारज्ञानात्मिके व बाधबुद्धिरिति वाच्यम् परामर्शात्मकाव्यभिचारज्ञानरूपप्रतिबंधकसत्त्वेन बाध
वुद्धेर्व्यभिचारविषयकत्वासंभवात् एकत्र हेतौ व्यभिचाराव्यभिचारविषयकैकनिश्चयासंभवाच्च नन्वयोगोलकपक्षकधूमसाध्यकवह्निहेतुके बाधलौकिकप्रत्यक्षवद्व्यभिचार (मर्शो+)
लौकिकप्रत्यक्षमपि व्याप्तिनिश्चये सत्यपि भविष्यतीत्यात् किंचेति आकिंचित्करत्वादिति व्यभिचारज्ञानेनानुमितौ न साक्षात्प्रतिबंधकम् किंतु परामर्शप्रतिबंधद्वारा तथा च परा
मर्शोत्तरकालीनव्यभिचारज्ञानमकिंचित्करमिति तत्र बाधबुद्धिरेव प्रतिबंधिकेति भावः व्यभिचारादसंकीर्णमपि प्रदर्शयति एवमित्यादिना बाधस्येवेति तत्र पक्षे हेतुसत्त्वेन स्वरूपा (बाधं+)
सिद्धेः प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारस्य चाभावादिति भावः बाधतद्व्याप्यमिन्नाये हेत्वाभासास्तद्व्याप्योपि तन्मध्य एवान्तर्भवतीति पाठः बाधः साध्याभाव
विशिष्टपक्षः तद्व्याप्यः सत्प्रतिपक्षस्तद्भिन्ना व्यभिचारविरुद्धासिद्धास्तद्व्याप्यानां तत्रैवान्तर्भाव इत्यर्थः व्यभिचारादेरिवव्यभिचारादिव्याप्यस्यापि व्याप्तिग्रहप्रतिबंधकज्ञानविषयत्वे
(नो+) नपंचहेत्वाभासान्तर्गतत्वेन तस्यातिरिक्तहेत्वाभासत्वं स्यादित्यर्थः न प्रतिबंधक इति साध्याभावव्याप्यवत्ताज्ञानस्य साध्यवत्ताज्ञानविरोधित्वे मानाभावादिति भावः दूषकतावीजस्य (व्याप्य+)

भिन्नतयेति साधारणस्याव्यभिचारज्ञाने विरुद्धस्य सामानाधिकरण्यग्रहे प्रतिबंधकत्वादिति भावः असाधारण्यघटकसपक्षत्वं निश्चयगर्भं न तु साध्यवत्त्वमात्रमित्याह सपक्ष इति एवमग्रे-
पि सपक्षविपक्षयोर्निश्चयत्वनिवेशस्य फलमाह प्राञ्च इत्यादिना पूर्वमुक्तमिति असाधारणः साध्यासमानाधिकरण इत्यादिनोक्तमित्यर्थः केवलान्वयिपक्षक इतीति अ-
त्र पक्षता साध्यसंशयरूपा ग्राह्या तेन सर्वमभिधेयं प्रमेयत्वादित्यादौ पक्षासिद्धिः सिसाधयिषा च तदा साध्यनिश्चयसंभवेन सामानाधिकरण्यघटितव्याप्तिग्रहसंभवात्तस्य सद्धेतोर-
लस्य तथा सिसाधयिषाविरहविशिष्टसिद्ध्यभावस्य तदा केवलान्वयित्वेपि तत्र नातिव्याप्तिः अनुपसंहारिणो हेत्वाभासत्वमुपपादयति सर्वमभिधेयमित्यादिना सर्वस्यैव प-
क्षत्वात् सामानाधिकरण्यग्रहस्यलाभावादिति संशयोत्पत्तिक्षणे निश्चयवारणाय निश्चयं प्रति संशयसामग्र्याः प्रतिबंधकत्वस्यावश्यं वाच्यतया प्रकृते सर्वत्र साध्यसंदेह-
सत्त्वे तत्सत्त्वेन सामग्र्याः सत्त्वेन साध्यनिश्चयस्य कुत्राप्यसंभवेन व्यापकसाध्यसामानाधिकरण्यविशिष्टधर्मत्वादिरूपव्याप्तिग्रहासंभवादत्रानुमितिरित्यनुपसंहारिणो
हेत्वाभासत्वमिति भावः सत्तेरभावादिति तदानीमपि केवलान्वयिपक्षताकत्वरूपस्यानुपसंहारित्वस्य सत्तेरभावादित्यर्थः तथा च तत्रानुपसंहारित्वस्य सत्त्वात्तस्य व्याप्तिज्ञा-
नानुत्पादप्रयोजकत्वाभावाद्धेत्वाभासत्वानुपपत्तिरिति भावः न च संशयसामग्र्याः सत्त्वात्कथं पक्षैकदेशे साध्यनिश्चय इति वाच्यम् सर्वत्वधर्मितावच्छेदककसंशयसामग्र्याः
सत्त्वेपि घटत्वादिधर्मितावच्छेदककसाध्यनिश्चयोत्पादे बाधकाभावात् समानप्रकारकत्वेनैव विरोधात् समानविषयकत्वेन प्रतिबंधकत्वेप्याह अस्त्वेवेति तस्य सहचा-
राग्रहस्य तस्य स्वरूपसत एव विरोधित्वेन तज्ज्ञानस्यानुमित्यनुत्पादप्रयोजकत्वाभावादिति भावः न च तत्र सहचाराग्रहप्रयोजकः संशय एव हेत्वाभासस्तस्यापि स्व-
रूपसत एव विरोधित्वात् न च संशयविषयस्य साध्याभावविशिष्टपक्षादेरेव तत्राभासत्वमिति वाच्यम् सर्वमभिधेयमित्यादावभिधेयत्वाभावविशिष्टपक्षाप्रसिद्धे-
रित्यन्यत्र विस्तरः तदर्थ इति तेन साधारणो नातिव्याप्तिरिति भावः धूमप्रागभावेति तस्य व्याप्यतावच्छेदकीभूतधूमत्वघटितत्वेन तत्संग्रहोनुस्यादिति भावः स्वस्य स्ववि-
षयकप्रतीतिविषयत्वरूपस्याघटितत्वाभावाद्धर्मान्तरेति न च नीलधूमत्वस्यापि तादृशधर्मान्तराघटितत्वमस्त्येव धूमत्वस्य नीलधूमत्वभिन्नत्वाभावादिति वाच्यम् स्वाविष-
यकप्रतीतिविषयत्वस्य स्वपर्याप्तावच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यनधिकरणत्वपर्यवसितस्य तदर्थत्वात् शुद्धधूमत्वपर्याप्तावच्छेदकताकप्र-
कारत्वनीलत्वादिविशिष्टधूमत्वपर्याप्तावच्छेदकताकप्रकारत्वयोर्भेदात् नन्वेवं वह्निमदन्यावृत्तित्वस्य वह्निव्याप्यतावच्छेदकत्वानुपपत्तिः तस्य वह्नित्वरूपतादृशधर्मान्त-
रघटितत्वात् धूमान्यान्यत्वादेर्व्याप्यतावच्छेदकत्वापत्तिभिया धर्मान्तरस्य विशेष्यविधया घटितत्वविवक्षणस्याशक्यत्वादिति चेन्न स्वसमानाधिकरणपदेन स्वव्यापक-
स्य विवक्षितत्वात् वह्नित्वस्य वह्निमदन्यावृत्तित्वाव्यापकत्वाद्धूमत्वस्य धूमान्यान्यत्वव्यापकत्वाच्चोक्तदोषासंभवात् स्वव्यापकत्वं च धर्मान्तरस्य स्वघटकसाध्यसंबंधि-
त्वावच्छेदकत्वेन अन्यथा धूमालोकान्यतरस्य वह्निव्यापकतावच्छेदकत्वापत्तेः धूमत्वालोकत्वयोः प्रत्येकमन्यतरत्वाव्यापकत्वादिति विरुद्धयोः परामर्शो हेत्वोरि-

अन्यताभावाप्रतियोगिसाध्यसंदेहत्वघटितस्यानुपसंहारित्वलक्षणस्य=
सहचाराग्रहस्य=
प्रमेयत्वस्य=
सर्वमभिधेयमित्यत्र=
व+
संशयस्यापि=
धूमप्रागभावत्वस्य=
त्वा+

35A

अवसरस्यात्र प्रतिबंधकीभूतशिष्यजिज्ञासानिवृ
त्तौ सत्यामवश्यवक्तव्यत्वम् = ३

तत्र विरुद्धपोहेत्वोर्भेदामर्शी इति भ्रमवारणायाह स्वसाध्येति स्वसमानाधिकरणत्वेनाभिमतो हेतुः स्वसाध्याविरुद्धो यः साध्याभावः स्यार्थः नन्वत्यन्तिकालीनघट इति प्रत्यक्षमगु
क्तं तत्रपक्षे घटे गन्धसत्त्वाभावादत आह पक्षतावच्छेदकेति कालस्येव देशस्यापि पक्षतावच्छेदकत्वे बाधस्याभावान्न प्रत्यक्षेनेन बलत्वमनन्तरं परिहरणमाह एवमिति वोध
मिति तत्रपक्षे वृक्षे संयोगसत्त्वेपि पक्षतावच्छेदकमूलावच्छेदेन संयोगाभावादिति भावः ॥ इत्यनुमानप्रमाणम् अवसरसंगतिमभिप्रेत्याह उपमितिरिति तत्र गवये सा
दृश्यदर्शने सादृश्यप्रत्यक्षम् तदुपमितिकरणमिति नवीनमतेनैतत् अतिदेशवाक्यार्थशाब्दबोधः कारणमतिदेशवाक्यार्थस्मरणं व्यापारः सादृश्यविशिष्टपिण्डदर्शी
नं सहकारीति सांप्रदायमतेन सहकारित्वेनावश्यकसादृश्यविशिष्टपिण्डदर्शनस्यैव करणत्वं युक्तमित्युपेक्षेति स्मरणं जायत इति सादृश्यविशिष्टपिण्डदर्शनस्योद्बोध
कविधयातिदेशवाक्यार्थस्मारकत्वादिति भावः तदेव व्यापार इति एतेन सादृश्यविशिष्टपिण्डदर्शनोत्तरं यत्रातिदेशवाक्यार्थशाब्दबोधस्तत्रातिदेशवाक्यार्थस्मरणापेक्षाभावान्न
तिदेशवाक्यार्थस्मृतिव्यापारकं सादृश्यविशिष्टपिण्डदर्शनं करणं किंतु सादृश्यज्ञानमात्रं करणं विशेषणज्ञानविधया तज्जन्यमतिदेशवाक्यार्थज्ञाने सादृश्यविशिष्टपिण्ड
दर्शनं चोभयं व्यापार इति कस्यचिन्मतं प्रत्युक्तम् यत्र सादृश्यविशिष्टपिण्डदर्शनोत्तरमतिदेशवाक्यार्थशाब्दबोधस्तत्रोपमित्यनभ्युपगमात् किंतु तदुत्तरं पुनः सादृश्यविशिष्ट
पिण्डदर्शनं ततोतिदेशवाक्यार्थस्मरणं तदुत्तरमेवोपमितिरिति भावः गवयो गवयपदवाच्य इति ज्ञानं जायत इति एतेनोपमितिर्न प्रमित्यन्तरं किंतु शाब्दबोधात्मिकैव गो
सदृशो गवयपदवाच्य इत्यत्र सदृशपदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वग्रहस्य गोसदृशो गवयपदवाच्य इत्याकारकस्यैवोपमितिस्वरूपत्वादित्यपास्तम्
गवयत्वावच्छेदेन गवयपदवाच्यत्वविषयिण्या उपमितेर्गवयपदजन्यगवयत्वविशिष्टोपस्थितिं विना शाब्दबोधरूपत्वासंभवादिति नच गोसादृश्यस्य गवयत्वस्य च
प्रत्यक्षेणोपस्थितौ कथं गवयत्वावच्छेदेन गवयपदवाच्यत्वोपमितिर्न तु सादृश्यावच्छेदेनेति वाच्यम् उपस्थितौ तौल्येपि गवयत्वजात्यपेक्षया गोसादृश्यस्य गुरुत्वेन ज्ञाने
न तदवच्छेदेन गवयपदवाच्यत्वोपमितिरस्तु इत्यात् गवयपदाद्गवयत्वप्रकारकशाब्दबोधानुपपत्तेश्च तत्प्रकारकशाब्दबोधे तदवच्छेदेन शक्तिग्रहस्य हेतुत्वात् नच ए
दृश्यत्वविशिष्टे सादृश्यज्ञानाद्गवयत्वावच्छेदेन गवयपदवाच्यत्वोपमितेरस्तु यत्र हेमविशिष्टे सादृश्यज्ञाने तद्धर्मावच्छेदेनोपमितिमनेके वाञ्छन्ति यत्र तु गवयत्वा
दिमात्रस्यानुपस्थितिस्तत्र सादृश्यज्ञानस्य सस्नादिगुरुधर्मविशिष्टग्रहात्तदवच्छेदेन गवयपदवाच्यत्वोपमित्यापत्तिरिति वाच्यम् इष्टापत्तेः तस्याः प्रमात्वं न ततोऽपि गु
रुधर्मावच्छेदेन गवयादिपदवाच्यत्वासाधकत्वादिति इत्युपलक्षणम् वैधर्म्यविशिष्टपिण्डदर्शनं करणम् जलादिविधर्मा गुणवती पृथिवीत्यतिदेशवाक्यस्मृतिर्व्यापारः
पृथिवीत्वावच्छेदेन पृथिवीपदवाच्यत्वोपमितिः फलमित्यपि बोध्यम् ननूपमानस्य प्रमाणान्तरत्वे मानाभावः नच प्रत्यक्षादिप्रमितिविजातीयप्रमितिकरणत्वान्नस्य प्रमा
णान्तरत्वम् उपमितेः प्रत्यक्षादिप्रमितितो विजातीयत्वाभावादिति चेन्न चक्षुरादिव्यापारविगमेपि उपमितेरुत्पादेन चाक्षुषत्वासंभवात् नवा मानसत्वम् मानसो नरमन्तु

उपमितेः=

अतिदेशः=

गवयो गवयपदवाच्य इत्याकारिकायाः=

सादृश्यावच्छेदेन=

संस्नादिगुरुधर्मैः=

सादृश्यज्ञानेः=

स्थि+

गवयत्वप्रकारकशाब्दबोधे गवयत्वावच्छेदेन शक्तिग्रहस्य हेतुत्वान्न तु सादृश्यावच्छेदेन=

उपमानस्य=

तीरादिनिष्ठविशेष्यतायाः=

त्वग्रहमानायाउपमिनोमीतिप्रतीतेर्विषयत्वासंभवात् उपमित्युत्तरं स्मात्तात्करोमीतिप्रतीतेरदृढ्येन तत्र प्रत्यक्षत्वसत्वे प्रमाणाभावाच्च अन्यथानुमितेरपिमानसत्वापत्तेः
नाप्यनुमितिः व्याप्त्यादिज्ञानं विनाप्युदयात् नापिशाब्दी पदज्ञानजन्यत्वात् न स्मृतिः अननुभूतार्थस्य स्मरणायोगादितिसंक्षेपः ॥ इत्युपमितिपरिच्छेदः ॥ ० ॥ उप न+
जीव्योपजीवकभावसंगतिमभिप्रेत्याह सर्वेपदज्ञानंत्विति एवकारार्थस्य स्वरूपस्य तु शब्दस्य व्यवच्छेद्यं दर्शयति मुक्तावल्यां ज्ञायमानमिति मौनिश्लोकादा
वित्यादिना हिंसादिबोधकविजातीयहस्तचेष्टादेः संग्रहः अन्यथा पदार्थज्ञानमात्रस्य व्यापारत्वे तत्रापि पदजन्यपदार्थोपस्थितावपि घटकत्वसंभवादर्थः अ
न्यथा हेत्येतस्यानुपादाने ननु वृत्तिर्यदि शक्तिस्तदा गंगादिपदात्तीरादेर्बोधो न स्यात् तस्यापदजन्यतीरोपस्थितेरभावादतआह वृत्तिश्चेति अन्यतरस्संबंधः अन्यतरात्मकः
गंगापदजन्यबोधविषयत्वीरः स्यात्= संबंधः अत्रैव पदजन्यपदार्थोपस्थितावेव साचेति यद्यपीश्वरेच्छायाएकत्वाद्घटशब्दाद्घटो बोद्धव्य इतीश्वरेच्छापटेपीत्यतिप्रसंगः एवंगंगापदजन्यबोधविषयत्वप्रका
रकेश्वरीयात्तीरेपिसत्वाच्छक्त्यैवतीरबोधोपपत्तेर्लक्षणोच्छेदापत्तिस्तथापिगंगादिपदवाच्यत्वव्यवहारस्य नीरादिभिन्नेऽभावाद्गंगादिपदजन्यबोधविषयतात्वावच्छिन्न
प्रकारतानिरूपितविशेष्यतासंबंधेनेश्वरेच्छैव गंगादिपदानांशक्तिः तीरादिनिष्ठविशेष्यतायांगंगादिपदजन्यबोधविषयत्वप्रकारतानिरूपितत्वेपि न तस्यास्तादृशविषयतात्वेनतादृश
प्रकारतानिरूपितात्वमपितुप्रवाहविषयतात्वेनेतिनातिप्रसंगो न वा लक्षणोच्छेद इत्यर्थः आधुनिकेनास्ति आधुनिकेपित्रादिभिरेकादशेहनिसंकेतितेनास्ति इतीश्वरेच्छायाइति
एकादशाहकालीनपित्रुच्चारणविषयनामत्वेनसामान्यरूपेणेत्यर्थः आधुनिकसंकेतितेन आधुनिकमात्रसंकेतितेनदीर्घादिपदेन संप्रदायमतेऽस्वरसंहृदिनिधायनवीनमतेप्रद
ईश्वरेच्छायाःशक्तित्वस्वीकारे= र्शयति नव्यास्त्विति न शक्तिरिति तथा सत्याधुनिकसंकेतितान्मद्यादिपदाच्छाब्दबोधो न स्यादिति भावः मतद्वयेप्यपभ्रंशात्मकगर्गर्यादिपदेशक्तिभ्रमादेव बोध इत्यवधेयम् नवीनमते संप्रदायमते च=
व्याकरणादिति भूसत्तायामित्यादावर्तमानेलडित्यादिव्याकरणादित्यर्थः लाघवादिति कृतित्वजातेःशक्यतावच्छेदकत्वेलाघवादित्यर्थः नचकर्तुरभिधानादिति अनभिहितइत्य
धिकारीयेणकर्तरितृतीयेत्यनेनाभिहितेकर्तरितृतीयाविधानादितिभावः तत्रतृतीयापाया [?] तत्वात् प्रयोजकत्वात् ननु कर्तृगतसंख्याभिधानएवकिंप्रयोजकमित्याशंक्यात
त्प्रयोजकंदर्शयति संख्याभिधानेति चैत्रःपचतीत्यादौ लडित्यादेःकर्मत्वादिलाक्षणिकप्रथमांतपदोपस्थाप्यतंडुलादिवृत्तासायाह कर्मत्वाद्यनवरुद्धइति ननु चैत्रश्चमैत्रश्चगच्छ
मैं+ तीत्यत्राख्यातेनैकवचनत्वरूपेणोक्तायाःसंख्यायाश्चैत्रेन्वयःस्यात् कर्मत्वाद्यनवरुद्धत्वात्प्रथमांतपदोपस्थाप्यत्वाच्च किंचपच्यमन्नंभुज्यतइत्यादावन्नादौसंख्यान्वयानुपप
ण+ त्तिः पाककर्मस्यान्नस्यान्वयेनकर्मत्वाद्यनवरुद्धत्वाभावादतआह कर्मत्वादीत्यस्येति तथाचकर्मत्वपरमितरपरंमन्त्रवरुद्धत्वंचविशेषणतयाविवक्षितम् वस्तुतस्तरस्यापिन
विवक्षाविशेषत्वमात्रस्याविवक्षितत्वादिति अविशेषणत्वंप्रकारताशून्यत्वं तस्यतुशाब्दबोधात्पूर्वं चैत्रादावपिसत्वाच्चैत्रश्चमैत्रश्चेत्यादौचैत्रेपि संख्यान्वयोपपत्तिः नचमैत्रीयंसा अविशेषणत्वस्य=
दृश्यमित्यत्रांतरवाक्यार्थबोधस्य पूर्वंसत्वात्कथमविशेषणत्वंविवक्षितिवाच्यम् यत्रखलेकपोतन्यायेनबोधस्तत्र मैत्रीयसादृश्यमित्यत्रांतरवाक्यार्थबोधस्य पूर्वमभावादतो हि ३६

शाब्दबोधात्पूर्वं=

३६A

चैत्रएवपचतिचैत्रश्चैत्रंपश्यती त्यादी=२

भात्यधीतिरिक्ताविशेषणीभूत=८

चैत्रे+

नच+

कवृत्तयइति मूलस्य स्वसमानान्योन्याभावप्रतियोगितानवच्छेदकैकत्वका इत्यर्थः पक्षे स्वाश्रयान्योन्याभावव्यापकात्यंताभावप्रतियोगिन इत्यर्थः स्वार्थैकेति विनयादि सत्र एकोनभवतीत्यन्योन्याभावः रूपादीनामभावः=तत्र+
भ्यः स्वार्थैकविधानात् विशेषणशब्दस्य तदंगत्वाद्विनयादेराकृतिगणत्वादितिभावः विशेषगुणा इत्यर्थ इति विशेषगुणत्वंचभावनान्यायोवायुवृत्तिवृत्तिस्पर्शावृत्तिधर्मस
मवायीतरद्रव्यत्वेसतिगुरुत्वाजलद्रवत्वान्यगुणत्वम् अत्रजात्यादावतिव्याप्तिवारणाय विशेष्यम् गुरुत्वनैमित्तिकद्रवत्वयोर्वारणाय गुरुत्वेत्यादि सांसिद्धिकद्रवत्वसंग्र
हायजलेति संयोगादिवारणाय सत्यंतम् भावनायामव्याप्तिवारणाय भावनान्यांतम् सत्यंतघटकसमवायिविशेषणम् सत्तादिकमादायासम्भववारणाय स्पर्शसंग्रहा
यवस्पर्शावृत्तीति संख्यादिर्यस्यापरत्वमंते यस्येतिव्युत्पत्त्या परिमाणपरत्वयोरेवग्रहणमितिभ्रमवारणायादिपदग्राह्यगुणान्विशिष्य प्रदर्शयति संख्यापरिमाणेत्यादि
ना गुरुत्ववेगावित्यत्रमूले वेगपदं भावनातिरिक्तसंस्कारपरम् तेनस्थितिस्थापकस्यापिग्रहः मूलेसामान्यगुणाइति तत्त्वंचरूपस्पर्शान्यत्वेसतिद्रव्यविभाजकोपाधि
व्याप्यतावच्छेदकसंयोगविभागवेगद्रवत्ववृत्तिजातिशून्यगुणत्वम् द्रव्यविभाजकतावच्छेदकं पृथिवीत्वादि तद्व्याप्यतावच्छेदकंच गंधत्वादि तच्छून्यत्वस्यसंख्यादौसत्त्वात्सा
मान्यलक्षणसमन्वयः अत्रनीलपीतकरूपेवायोरनुष्णाशीतस्पर्शेचपृथिव्यादिमूलरूपस्पर्शाव्याप्तजातिविशेषमानाभावात् पाकजरूपानुष्णाशीतस्पर्शयोरतिव्याप्तिवारणाय

Left-margin notes:

दैशिकीव्याप्यायत्रद्रव्यत्वंतत्रसंख्यादिकंयत्रसंख्यादिकंतत्रद्रव्यत्वंतदवच्छेदिकासंख्यात्वादिरूपा=८ स्वपदेनरूपादयः=९

नैमित्तिकद्रवत्वान्यः=

भावनान्येति=

संख्याद्यपरत्वेपरिमाणस्यैवापरत्वात्तत्वस्यपरत्वस्यैव=

Note at foot of leaf:

स्वसमानाधिकरणान्योन्याभावस्यरूपाद्याश्रयएकोनभवतीतिरूपस्यवक्तुमशक्यत्वात्प्रतियोगितानवच्छेदकमेकत्वंतद्वत्त्वंरूपादीनांसाधर्म्यमित्यर्थः=६.८

४५

द्रव्यविभाजकोपाधिव्या
प्यतावच्छेदकजातित्वात्=३

४४५

वमत्वं तन्न शब्दविशेषजनकतावच्छेदकजात्यवच्छिन्नकठिनावयवद्वयविभागे तेजोवेगातिशये त्वं ताग्निसंयोगनाश्यतावच्छेदकजात्यवच्छिन्नद्रुतादिवृत्तिद्रवत्वे चाव्याप्तिवारणाय द्रव्यत्वं तंग
तिविशेषणम् कर्मादौ तद्वारणाय विशेष्यम् पृथिवीत्वादिव्याप्यतावच्छेदकतत्तत्संख्यात्वादिकमन्यत्वस्य तत्संख्यायामभावाद्व्याप्तिवारणाय जातिपदम् द्रव्यविभाजकतावच्छेदकोपा
धेश्चव्यापकत्वं तत्र द्वयक्तिकत्वेन विवक्षितं न तु तादृशोपाधित्वेन अन्यथा संख्यात्वादेरपि तादृशजातित्वादसम्भवापत्तेरिति संख्यादिरपरत्वान्तो द्रव्यत्वं स्नेह एव चेत्यत्र स्नेहस्नेहपदं वेगस्याप्युप
लक्षणम् स्थितिस्थापकस्य त्वतीन्द्रियत्वं वक्ष्यते ननु द्वीन्द्रियग्राह्यत्वं रूपादावतिव्याप्तं तेषां मनसापि ग्रहात् बाह्येन्द्रियद्वयग्राह्यत्वमपि तत्रैवातिव्याप्तं रूपादीनां चक्षुरादिना ग्रहणादतो
न्द्रियसंख्याद्याख्यानं च तत्रेन्द्रियग्राह्यत्वस्यैवाभावात् तत्राह चक्षुषा त्वचापीति चक्षुस्त्वगुभयग्रहणयोग्यत्वं तदर्थः चक्षुस्त्वगुभयग्राह्यभावनाहेत्यन्यधर्मसमवायित्वमिति नि गुणत्वं=
ष्कर्षः संस्कारत्वादिकमादाय भावनायामतिव्याप्तिवारणाय भावनावृत्त्यन्येति कर्मादौ तद्वारणाय गुणत्वस्य निवेशः ननु बाह्यैकैकेन्द्रियग्राह्यत्वं संख्यादावतिव्याप्तं तेषामुभयग्राह्य
त्वेप्येकग्राह्यत्वानपायात् व्याप्तं चातीन्द्रियरूपादौ तेषामिन्द्रियग्राह्यत्वस्यैवाभावात् तत्राह रूपादीनामिति चक्षुरादीति चक्षुरादिनेत्यर्थः तथा चैकैकमात्रग्राह्यत्वस्य विवक्षित रा+
तेषां ग्रहणायोग्यत्वे विभक्तत्वरूपादिसामान्याभावान्न तत्र सि=२
त्वात्संख्यादौ नातिव्याप्तिः ग्राह्यत्वात् ग्रहणयोग्यत्वात् तेन नातीन्द्रियरूपादावतिव्याप्तिः तथा च चक्षुस्त्वगुभयाग्राह्यत्वे सति बहिरिन्द्रियग्रहणसमवेतजातिमत्त्वमेतेषां लक्षणमिति
भावः न च त्रसरेणुनिष्ठापकर्षस्य चक्षुरिन्द्रियेणैव ग्रहणात्तत्रातिव्याप्तिरिति वाच्यम् परिमाणान्यत्वेनापि गुणविशेषणीयत्वात् स्नेहे गुरुत्वादृष्टभावनेत्यत्र भावनापदं वेग
भिन्नसंस्कारपरं तेन स्थितिस्थापकस्यापि संग्रहः न चातीन्द्रियत्वमिन्द्रियजन्यप्रत्यक्षाविषयत्वं यदि तदा गुरुत्वादावसंभवस्तेषामलौकिकप्रत्यक्षविषयत्वात् लौकिकप्रत्यक्षा विषयत्वा+
विषयत्वं चातीन्द्रियरूपादावतिव्याप्तिरिति वाच्यम् लौकिकसाक्षात्कारविषयगुणत्वन्यूनवृत्तिसंस्कारत्वान्यधर्मसमवाय्यन्यगुणत्वस्य विवक्षितत्वात् सत्तादिकमादायासम्भव
संस्कारत्वमादाय=
वारणाय गुणत्वन्यूनवृत्तीति भावनास्थितिस्थापकयोरव्याप्तिवारणाय संस्कारत्वान्येति आत्मादावतिव्याप्तिव्याप्तिवारणाय गुणपदम् स्नेहेऽकारणगुणोत्पन्ना इत्यत्र न कारण
मकारणं तस्य गुणा इति भ्रमनिवारणायाह स्वकार्यस्याकारणगुणेनेति समवायिकारणसमवेतगुणेनेत्यर्थः अत्र कारणत्वमविवक्षितं समवायित्वमात्रं बोध्यम् नेतादृशा
इति तथा च कारणगुणोत्पन्नाः कारणगुणोत्पन्नाः नकारणगुणोत्पन्ना अकारणगुणोत्पन्ना इति विग्रहेण स्वाश्रयसमवायिसमवेतगुणाजन्यत्वं कारणगुणोत्पन्नत्वं तादृशगु
क+ णाजन्यत्वमकारणगुणपूर्वकमिति भावः यद्यपीदं नित्यरूपे जन्येपि च पाकजरूपादौ अवयवावयविनोर्द्वित्वद्विपृथक्त्वातिरिक्तद्वित्वद्विपृथक्त्वादौ कर्मजन्यसंयोगविभागवेगेषु पा
कजद्रवत्वे चातिव्याप्तं तथाप्यकारणगुणोत्पन्नमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं विवक्षितमित्यदोषः अकारणगुणोत्पन्नमात्रवृत्तित्वं च निरुक्तकारणगुणोत्पन्नावृत्तित्वम्
रूपनिष्ठपाकजन्यतावच्छेदकवैजात्यं संयोगविभागवेगनिष्ठकर्मजन्यतावच्छेदकवैजात्यमणुपरिमाणनिष्ठवैजात्यं परममहत्त्वं चादायातिव्याप्तिवारणाय गुणत्वसाक्षाद्व्याप्ये

लक्षणं=३

न्या.मु.टी.
द्वि.
४५

स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुणजन्यवृत्तिसंख्यात्वपृथ
क्त्वातिरिक्तभावनावृत्त्यजातिमत्त्वे सत्यपाकजत्वं कारणगुणोत्प
न्नत्वम्=१

संस्कारान्यत्व
स्याकथने१=

नित्यरूपाश्रयः परमाणुस्तत्समवाय्यभावात्=परिमाणाश्रयो द्व्यणुका
दिः तत्समवायी परमाण्वादिः तन्निष्ठद्वित्वादिसंख्यायाः परिमाणस
जातीयत्वाभावात्=वेगाश्रयः शरस्तत्समवायी शरावयवस्तत्समवेत
कर्मणः शरनिष्ठवेगसजातीयत्वाभावात्=६

ति संस्कारत्वान्यगुणत्वव्याप्याव्याप्यत्वे सति गुणत्वव्याप्यं तदर्थः अन्यथाभावनात्वस्य गुणत्वसाक्षाद्व्याप्यत्वाभावाद्भावनायामव्याप्तिप्रसंगात् इत्थमपि परत्वापरत्वयोरतिव्याप्तिरव
अतिव्याप्तिः=२ शिष्यते सापि परत्वापरत्वावृत्तित्वेन जातेर्विशेषणीयत्वान्निरसनीयेति ध्येयम् मूले स्युः कारणगुणोद्भवा इति कारणगुणोत्पन्नत्वं च न रूपादौ किं स्वाश्रयसमवायिसमवेतगुणजन्यत्वं
हस्तपुस्तकसंयोगविभागादिजन्यकायपुस्तकसंयोगविभागादावतिव्याप्तेः नच स्वाश्रयसमवायिमात्रसमवेतगुणजन्यत्वेन तद् हस्तपुस्तकसंयोगादेश्च न स्वाश्रयसमवायिमात्रसम
...हस्तपुस्तकसमवे वेतत्वमिति वाच्यम् तथाप्यवयवावयविनोरेकत्वाभ्यां जनितेऽवयवावयविद्वित्वादावतिव्याप्तेस्तथापि स्वाश्रयसमवायिमात्रसमवेतस्वजातीयगुणजन्यत्वं तत् अवयवैकत्वादेरवयवा कारणगुणोत्पन्नत्वं=३
...पि=४ द्वित्वेक वयविद्वित्वसजातीयत्वाभावेन तत्रातिव्याप्त्यभावात् नच संख्यात्वेन तयोः साजात्यमस्तीति तद्दोषतादवस्थ्यम् गुणत्वसाक्षाद्व्याप्यजात्या साजात्यस्य विवक्षितत्वात् अवयवावयविरू
...पी:=५ पादीनां नीलत्वादिना साजात्यसत्त्वाच्चासंभवः ननु तथापि नित्यरूपे संख्याप्रथमपृथक्त्वपरिमाणे कर्मजवेगे चाव्याप्तिरिति चेन्न स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुणजन्य
वृत्तिजातिमत्त्वस्य विवक्षितत्वात् नित्यरूपादौ च तादृशरूपत्वादिकमादाय लक्षणसमन्वयात् अत्र च संख्यात्वपृथक्त्वातिरिक्तत्वेन भावनान्यत्वेन च तादृशजातिर्विशेषणीया
व+ तेन तादृशसंख्यात्वं पृथक्त्वं चादाय द्वित्वद्विपृथक्त्वादौ नातिव्याप्तिः नवावयवविभागजन्यावयविविभागवृत्तिसत्तागुणत्वसंस्कारत्वमादाय भावनायामतिव्याप्तिः नचैवं जातिघटितलक्षणे
तादृशरूपत्वादिजातिमादाय पाकजरूपादावतिव्याप्तिरिति वाच्यम् तादृशजातिमत्त्वे सत्यपाकजत्वस्य विवक्षितत्वादिति सर्वं चतुरस्रम् लक्ष्यतावच्छेदकेऽपाकजत्वविशेषणा
स्य प्रयोजनमाह मुक्तावल्यां पाकजरूपादीनामिति कारणगुणपूर्वकत्वाभावात् कारणगुणपूर्वकत्वव्यवहाराभावात् अत्र पाकजरूपरसगंधस्पर्शपाकजद्रवत्वद्वित्वद्विपृथक्त्वादि
संयोगविभागपरत्वापरत्वादीनां न कारणगुणपूर्वकत्वं नवाऽकारणगुणपूर्वकत्वं साधर्म्यमिति ध्येयम् एवमन्यत्रापि मूले एकपृथक्त्वस्नेहशब्दक इत्यत्रैकत्वमेकपृथक्त्वं चेत्यर्थो बोध्यः
वैशेषिके गुणा इत्यत्रात्मन इत्यस्यान्वयः मुक्तावल्यामुष्णस्पर्श इति अवयवगत उष्णस्पर्श इत्यर्थः उष्णस्पर्शस्यावयविगतोष्णस्पर्शस्य एवमग्रेऽपि कारणे कार्यप्रत्यासत्त्याका
र्यैकार्थप्रत्यासत्त्या च गुरुत्वमसमवायिकारणत्वमिति प्रदर्शनाय गुरुत्वपतनयोरित्युभयमुक्तम् एवमग्रेऽपि संग्रहे सत्कारिसंयोगविशेषे भेर्याकाशसंयोगोऽसमवायीति प्रथमान्तसंयो
पदघटितः पाठः भावकार्यस्यासमवायिकारणजन्यत्वनियमाद्भेर्याकाशसंयोगस्य शब्दं प्रत्यसमवायिकारणत्वमावश्यकमिति भावः यद्यपि भेरीदंडसंयोगस्य शब्दे निमित्तत्वं न तु त
त्र तस्यासमवायिकारणत्वं भेर्याकाशसंयोगस्यासमवायिकारणत्वं न तु तत्र तस्य निमित्तत्वमित्येकव्यक्तेर्न द्विविधहेतुत्वं तथापि संयोगजातीयस्य द्विविधहेतुत्वमस्तीति भावः एवं
मग्रेऽपि अथ प्रादेशिक इत्यादिमूले संयोगादिद्वयविभुविशेषगुणानामव्याप्यवृत्तित्वं साधर्म्यं प्रदर्शनीयम् तत्रापि यथाश्रुते कर्मादावतिव्याप्तेरीश्वरज्ञानादावव्याप्तेश्चाव्याप्य
वृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यमित्यर्थः मूले संयोगादिद्वये तथेत्यनंतरं द्विधैवेत्यस्य प्राक् परापरत्वद्वित्वादिद्विपृथक्त्वादिकं पुनरिति पाठः क्वचित्पुस्तके प्रमादादायातः ४५

अवयवगुरुत्वं गुरुत्वकारणेनावयविनासदावयवे
समवेतम्=अवयविगुरुत्वेन तत्कार्यपतनं चोभयम
वयविनि समवेतम्=५

45A

परत्वादीनामकारणत्वेन द्विविधकारणत्वस्य तत्राभावात् न च परत्वादीनामपि स्वध्वंसस्व प्रत्यक्षं प्रति हेतुत्वात्कथमकारणत्वमिति वाच्यम् ध्वंसप्रत्यक्षातिरिक्तं प्रत्यकारणत्वस्योक्तत्वा
त् विस्तरस्त्वन्यत्रानुसंधेयः मुक्तावल्यामव्याप्यवृत्तिरित्यस्य दैशिकेत्यादि तेन रूपादौ नातिव्याप्तिः ॥ इति गुणसाधर्म्यम् ॥ नीलत्वादिना रक्तत्वादिपरिग्रहः अन्यथा नीलादीना
मेकव्यक्तित्वे ननु लाघवादेव नीलारुणादिव्यक्तेरैक्यं सेत्स्यतीत्यत आह लाघवं त्विति प्रत्यक्षबाधितमिति नीलो नष्टो रक्त उत्पन्न इत्यादिप्रत्यक्षबाधितमित्यर्थः अन्यथेति लाघवमात्रे
ण नीलारुणादीनामेकत्वाभ्युपगमे इत्यर्थः ननूत्पन्नो घटो विनष्टो घट इत्यादिप्रतीतेर्घटादेरैक्यमित्यत आह उत्पादेति एतेन ईदृशजातिसाधकप्रमाणेन रसादिकम् रसत्वादि
कं आदिना गन्धत्वादिपरिग्रहः संयोगादावतिव्याप्तिमाशंक्याह चक्षुर्ग्राह्यत्वमिति चक्षुर्ग्राह्यत्वमित्यस्येत्यर्थः तेन चक्षुरिति ग्राहकप्रतीकधारणेऽपि न पौनरुक्त्यम् विशेषगुणत्वमिति वि
लक्षणगुणत्वमित्यर्थः वैलक्षण्यं च चक्षुर्भिन्नाग्राह्यत्वम् न च तत्प्रभामिन्निसंयोगेऽतिव्याप्तिरिति वाच्यम् चक्षुर्मात्रग्राह्यत्वस्य चक्षुर्मात्रग्रहीतत्वे सविशेषेतिव्याप्त्यापत्त्या चक्षुर्मा

त्वकमात्रग्राह्यजाति मद्गुणत्वस्यार्थत्वं:
त्रग्राह्यत्वस्य जातिविशेषणतया स्वीकृत्य चक्षुर्मात्रग्राह्यजातिमद्गुणत्वविवक्षणस्यावश्यकतया तेनैव प्रभामिन्निसंयोगेऽतिव्याप्तिवारणादिति प्रभात्वमादाय प्रभायामतिव्याप्तिवारणा
य गुणपदम् एवमग्रेऽपि स्पर्शलक्षणेऽप्येवमाधारीति बोध्येत्यर्थः अप्रत्यक्षत्वप्रसंगादिति द्रव्यचाक्षुषं प्रति समवायसंबंधेनोद्भूतरूपस्य हेतुत्वादिति भावः व्याप्यवृत्तिजातीयेति व्याप्यवृत्ति
त्तिजातिश्च सविषयाव्याप्तिर्बोध्या तेन व्याप्यवृत्तीश्वरज्ञानजातीयस्यास्मदादिज्ञानस्याव्याप्यवृत्तित्वेऽपि न क्षतिः ननु वृत्तीनां बहुत्वेऽप्येकं वनमितिवद्रूपसमुदायगतमेकत्वमादायैकं नातिव्याप्तिः=
चित्रमित्यनुभवोपपत्तिरत आह नानेति गौरवादिति चित्रमिति प्रतीतिविषयतायाः अनेकत्र कल्पने गौरवादित्यर्थः ननु चित्ररूपाधिकरणे घटादौ स्वाश्रयसमवेतत्वसंबंधेन कपालनी
लादीनां कारणानां सत्त्वात्कथं तत्र नीलाद्युत्पत्तिरित्यत आह एवं चेति उक्तलाघवेन चित्ररूपसिद्धौ चेत्यर्थः प्रतिबंधकत्वकल्पनादिति समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसं
बंधेन नीलातिरिक्तरूपत्वेन पीतरूपं प्रति पीतातिरिक्तरूपत्वेन प्रतिबंधकत्वमिति रीत्या प्रतिबध्यप्रतिबंधकभावकल्पनादन्यथा नानाजातीयकपालारब्धे घटे नीलकपालावच्छेदेन पीतोत्प प्रतिबध्यप्रतिबंधकभावाकल्पने=
त्तावव्यवस्थापत्तेरित्यादि भावः अत्र नव्याः नानाजातीयरूपवत्कपालारब्धे घटे पीतकपालाकपालावच्छेदेन नीलापत्तिवारणाय पूर्वोक्तः प्रतिबध्यप्रतिबंधकभावः कल्प्यते किं त्ववच्छे
दकतासंबंधेन नीलादिकं प्रति समवायेन नीलादेः कारणत्वं कल्प्यते चित्ररूपांगीकारे तु समवायेन नीलादिकं प्रति स्वाश्रयसमवेतत्वसंबंधेन नीलत्वादीनां हेतुत्वस्य पूर्वोक्तप्रति
बध्यप्रतिबंधकभावस्य च कल्पने गौरवमित्याहुः तन्न अवच्छेदकतासंबंधघटितोक्तकार्यकारणभावांगीकारेऽप्यवच्छेदकतासंबंधेन कपालादौ जायमानस्य नीलादेः समवायेन घटा
दावित्यादिगगनादावप्युत्पत्तिवारणाय समवायेन नीलादिकं प्रति स्वाश्रयसमवेतत्वसंबंधेन नीलादेर्हेतुत्वस्य तदावश्यकत्वात् किं च चित्रमिति प्रतीतिविषयतायाः अनेकत्र कल्पने
गौरवमेकत्र कल्पने लाघवमिति लाघवानुरोधेनातिरिक्तचित्रसिद्धौ पूर्वोक्तप्रतिबध्यप्रतिबंधकभावकल्पनागौरवस्य न दोषत्वं फलमुखत्वादित्यन्यत्र विस्तरः स्पर्शोऽपि व्याख्यातः इ
ति कोमलकठिनस्पर्शवदवयवाभ्यामारब्धे घटादौ स्पर्शानंगीकारे घटस्याशनापत्तिरित्यादिरीत्या चित्रस्पर्शोऽप्यावश्यक इति भावः अवयविनो नीरसत्वेऽपि तदप्रतीतेरभावादिति न च वि

46 न्या॰मु॰टी॰ टि॰ ४६ त्रोरसइतिप्रतीतिविषयतयातिरिक्तचित्ररससिद्धिरितिवाच्यम् तादृशप्रतीतेरेकावयवगतनानारसैरुपपत्तेरतिरिक्तचित्ररसतत्प्रागभावध्वंसादिकल्पनेगौरवात् नचैवंद्व्यणुकरसस्यायो
पपत्त्यामधुरादिरसप्रतीतिनियामकत्वासंभवेनोक्तत्र्यणुकेमधुरादिरसप्रतीतेरणुकागतावयवविपर्ययेतमधुरादिरसवत्त्वेमानाभावः अणुकमधुररसेनैवमधुरादिप्रत्ययोपपत्तेरितिवा
च्यम् समवायेनमधुररसंप्रतिस्वसमवायिसमवेतत्वसंबंधेनमधुररसत्वेनहेतुतायामव्द्यणुकगतमधुररसान्यथानुपपत्त्याकल्पतयातादृशकारणताबलात्त्र्यणुकेमधुरादिर
सोत्पत्तेर्दुर्वारत्वात् ननुघटावयवेष्वायातननुपरमाणावतआह नहिरत्नेति इति रूपगंधरसगंधस्पर्शइति नसंयोगगतइति कठिनसंयोगइतिप्रतीतिस्तुकठिन
स्पर्शवद्द्रव्यप्रतियोगिकत्वमवगाहतइतिभावः रूपादीनांपाकइति रूपादीनांपरावृत्तिरित्यर्थः पाकोनसंभवतीति रूपादिपरावृत्तिफलकतेजःसंयोगोनसंभवतीत्यर्थः
रूपादिपरावृत्तिर्नसंभवतीतियावत् रूपादिनाशंप्रतिसाक्षात्परंपरासाधारणसर्वावयवावच्छेदेनतेजःसंयोगस्यहेतुतयावयविनावष्टब्धेष्ववयवेषुसत्स्वअवयविनिरूपादिना
रूपादिनाश=१ शोनसम्भवति तद्धेतोःसर्वावयवावच्छेदेनतेजःसंयोगस्याभावादितिभावः नचविद्यमानेपिघटादौसर्वावयवावच्छेदेनतेजःसंयोगःकुतोनोत्पद्यतइतिवाच्यम् तथासत्यारम
तेजःसंयोग=२ कसंयोगावच्छेदेनावयविनितेजःसंयोगोत्पत्तिकालेतदवच्छेदेनावयवेष्वपिनोदनाभिघातयोरन्यतरस्योत्पादनियमेनावयवेषुविभागजनकक्रियोत्पादेनारंभकसंयोगनाशाद्द्रव्य
अवयविनाश=४ विनाशापत्तेः नचावयवेषुतेजोभिघातानंतरंपंचमक्षणएवावयविनाशसंभवेनतत्पूर्वमवयविनिरूपादिनाशोत्पादाभ्युपगमेबाधकाभावइतिवाच्यम् तत्रपूर्वावयविनाशावयव्यन् रूपादिनाशे=
जनक+ तरोत्पादस्यावश्यकत्वात् पूर्वावयविनिरूपादिपरावृत्तिविजातीयतेजःसंयोगस्यमानाभावेनाकल्पनात् अवयविरूपनाशेआश्रयनाशस्यहेतुत्वात्पाकाजन्यत्वस्यकार्य
पाकाजन्यरूपनाशंप्रतिआश्रयनाशःकारणमिति= तावच्छेदककोटिप्रवेशेगौरवाद्द्रव्यविनाशंविनापाकेनावयविरूपनाशासंभवाद्द्रव्यविनीलादावयवेविनीलादेर्दृष्टतायांव्यभिचारापत्त्यापाकेनावयविनीलाद्युत्पादासंभवा
च्चेत्यभिमानः अवयविष्वपिनेष्विति घटाद्यारम्भककपालादिपरमाणुपर्यन्तसंयोगेनपूर्वोक्तरीत्याघटादिद्व्यणुकपर्यंतनाशसंभवादितिभावः स्वतंत्रेषु कार्यद्रव्यध्वंसवि पर्यंत+
शिष्टेषु ननुनत्रसंस्थानभेदादिःकथंनप्रतीयतइत्यतआह तेजसामिति व्यूहः संस्थानम् वैशद्यमनुत्पत्तिः प्रक्रिया द्व्यणुकनाशादिरूपाक्रमस्यनिरूपणम् क्रियत
इतिशेषः विभागजविभागानंगीकारइति कारणाकारणविभागात्कार्याकार्यविभागवत्कारणमात्रविभागात्कारणाकार्यविभागानंगीकारइत्यर्थः द्रव्यारंभकसंयोगप्रतिद्वंद्वि
द्रव्य= विभागजनकक्रियायास्तदनारंभकसंयोगप्रतिद्वंद्विविभागजनकत्वनियमेमानाभावादितिभावः विभागग्रंथेवक्ष्यमाणविकल्पासहत्वप्रसंगभियोक्तनियमानंगीकारआ अत्र+
नियमानंगीकारे= वश्यकः एवंचद्व्यणुकारंभकपरमाणुक्रिययायत्रद्व्यणुकारंभकसंयोगप्रतिद्वंद्विविभागोजनितस्तत्रतयातत्परमाणुक्रिययातत्परमाण्वाकाशादिसंयोगप्रतिद्वंद्विविभागो द्व्यणुकारंभक=
त्पत्तिर्नसंभवति नचमास्तुतत्रपरमाण्वाकाशविभागःकोक्षतिरितिवाच्यम् तथासतिनाशकविभागाभावेनपरमाण्वाकाशसंयोगस्यनित्यत्वापत्तेः एवंचपरमाण्वाकाशसंयो
गरूपस्यपूर्वदेशसंयोगस्यप्रतिबंधकस्यसत्त्वात्परमाणावुत्तरदेशसंयोगानुत्पत्त्यापरमाणुगतक्रियानाशानुपपत्तेश्चातस्तादृशपरमाण्वाकाशविभागजनकःपरमाण्वोर्विभा ४६

उत्तरदेशसंयोगप्रतिबंधकस्य=१

परमाण्वाकाशविभागानंगीकारे=२ परमाण्वाकाशसंयोगनाशक=२

परमाण्वाकाशसंयोग का+ नाशक=१

परमाण्वाकाशसंयोगस्य नित्यत्वांगीकारे=२

सर्वोक्तनियमानंगीकारपक्ष एव=१ विभागजविभागप्रतिद्रव्यारंभकसंयोगस्य कारणताव=२

46A

गेवाप्यइत्यभिप्रायवानाह तदंगीकारेत्विति अनयोःपक्षयोःप्रथमपक्ष एवमस्माकं पूर्वपक्षे देनकमलारंभकसंयोगस्त्वपूर्वदेत्र क्रियानुत्पत्त्या च न विकसत्कमलभंगप्रसंग इति
विभागे= ध्येयम् तत्त्वे विभागजनकत्वे कर्मत्वं कर्मलक्षणस्यातिव्याप्तिः संयोगविभागयोरनपेक्षकारणं कर्मेति सूत्रस्य संयोगस्य विभागस्य वानपेक्षकारणं कर्मेति लक्षणद्वयेनात्प
र्यमित्यभिमानेन द्वितीयलक्षणस्य तत्रातिव्याप्त्यभिधानमिदम् वस्तुतस्तु संयोगविभागयोरनपेक्षं कारणं कर्मेति सूत्रे तत्र संयोगस्यानपेक्षकारणमित्युक्तौ कारणाकारणसंयो
गेतिव्याप्तिस्तस्य कार्याकार्यसंयोगे किंचिदनपेक्षकारणत्वात् एवं विभागस्यानपेक्षत्वमित्युक्तौ कारणाकारणविभागेतिव्याप्तिरत उक्तं संयोगविभागयोरिति अनपेक्षत्वं स्वोत्
कारणं= तरोत्पन्नभावानपेक्षत्वमन्यथा कर्मणोपि संयोगजनने द्रव्यस्य पूर्वसंयोगनाशस्य चापेक्षणादसंभवापत्तेः विभागासमवायिकारणत्वे सति संयोगहेतुत्वं वा तत्पूर्वदेशविभाग
कारणमात्रविभागस्य=३ कृतोत्तरदेशसंयोगे कारणं व्यवहाराभावेनान्यथासिद्धेः संयोगस्य विभागं प्रति कारणत्वाभावादेव नासमवायिकारणत्वमिति न तत्रातिव्याप्तिः इत्थं च कारणमात्रविभागस्य
पूर्वसंयोगनाशं द्रव्यनाशं वानपेक्ष्य कारणाकारणविभागजननेपि नातिव्याप्तिः तस्य विभागजनकत्वेपि संयोगविभागोभयजनकत्वाभावादिति ध्येयम् द्रव्यारंभकसंयोगवि
नाशविशिष्टं कालमपेक्ष्येति द्रव्यारंभकसंयोगनाशोत्पत्त्यधिकरणक्षणोत्तरक्षण इत्यर्थः कारणतावद्रव्यारंभकसंयोगनाशत्वेनैव लाघवादिति ध्येयम् एवमग्रेपि नवक्षणे कारणमात्रविभागस्य=८
कारणात्मप्रक्रियाःक्रमेणोपपादयति तथाहीत्यादिना परमाणौ कर्म द्व्यणुकारंभकपरमाण्वोर्मध्ये एकस्मिन्परमाणौ कर्म परमाण्वन्तरेण द्व्यणुकारम्भकपरमाण्वन्तरेण
आरम्भकेति द्व्यणुकारम्भकेत्यर्थः ततः परमाणोः श्यामादिनाश इति परमाणुगतरूपनाशं प्रति द्व्यणुकात्मकद्रव्यस्य प्रतिबंधकतया तत्पूर्वं श्यामनाशासंभवादिति भावः द्रव्या द्व्यणुकनाशपूर्वं=
रम्भकेति द्व्यणुकारम्भकेत्यर्थः तद्विनाशानंतरेणेति द्व्यणुकनाशोत्पत्तिक्षणोत्पत्तिकोत्तरसंयोगेन श्यामनाशक्षण एव पूर्वक्रियानाश इति भावः परमाणोः क्रियान्तराभावादि
ति तस्मिन्परमाणौ क्रियान्तराभावादित्यर्थः अत्र हेतुमाह कर्मवतीति गुणोत्पत्तिमंतरेण कर्मानुत्पत्तौ हेतुमाह निर्गुणेति कारणमात्रविभागस्य कारणाकारणविभाग
प्रक्रिया= जनकत्वाभावपक्ष एव ग्रंथान्तरेषु क्षणप्रक्रियासांचनिर्गुणे द्रव्यारम्भानुगुणक्रियोत्पत्तौ बाधकाभावेन रक्तोत्पत्तिक्षण एव द्रव्यारंभानुगुणक्रियोत्पत्तिः सम्भवतीत्यभिप्रायेण
समर्थनीया विभागेन विभागजनन इति कारणमात्रविभागेन कारणाकारणविभागजनने सतीत्यर्थः विभागजविभागाविति आरम्भकसंयोगनाशस्य तृतीयक्षण एवोत्पन्नत
द्व्यणुकनाशपूर्वं= याचतुर्थक्षणे परमाण्वाकाशविभागः सम्भवतीति भावः ततः श्यामनाशपूर्वसंयोगनाशाविति परमाणुश्यामनाशपरमाण्वाकाशसंयोगनाशावित्यर्थः परमाणुश्याम
नाशं प्रति द्व्यणुकनाशस्य हेतुत्वात्तत्पूर्वं परमाणुश्यामनाशासम्भवादिति भावः रक्तोत्पत्त्युत्तरसंयोगाविति उत्तरसंयोगं विना पूर्वकर्मणो नाशासम्भवेन द्रव्यारम्भानुगुण
क्रियानुत्पत्तेरिति भावः एवमग्रेपि अत्र य एवाग्निसंयोगो द्व्यणुकनाशकः स एव श्यामनाशे रक्तोत्पादे च हेतुरिति केषांचिन्मतं पुनरग्न्यन्तरसंयोगादिति भाष्यविरुद्धत्वादनादरणीय
मित्यभिप्रेत्याह मध्यमशब्दवदिति एकस्मादिति द्व्यणुकनाशकादेकस्मादित्यर्थः यथा मध्यमशब्दात्पूर्वशब्दनाशोत्तरशब्दोत्पादौ भवतस्तथैकस्माद् द्व्यणुकनाशकादग्निसं

योगाच्छ्यामनाशरक्तोत्पादौ न भवतः इति व्यतिरेकदृष्टान्तः तावत्कालमिति श्यामनाशोत्पत्त्यव्यवहितक्षणपर्यन्तमित्यर्थः अग्नेः द्व्यणुकनाशकाग्निसंयोगस्य एवमग्रेपि अस्थिरत्वा
दिति यद्यपि परमाणावग्निसंयोगात् द्व्यणुकासमवायिकारणसंयोगविनाशकं परमाणौ कर्म तदैव नोदनाभिघातान्यतरात्मकस्याग्निपरमाणुसंयोगस्य जनकं यद्यग्निकर्म तस्य विना
शः कर्मणः स्वजन्यसंयोगविनाश्यत्वात् तदुत्तरक्षणे पुनस्तौ कर्म कर्मकारणीभूतवेगाभिघातादेः समानाधिकरणकर्मध्वंसरूपसहकारिणश्च सत्त्वात् ततो विभागस्त
तो द्व्यणुकनाशसमकालमग्निपरमाण्वोः संयोगस्य नाशे न श्यामरूपनाशोत्पत्त्यव्यवहितपूर्वक्षणपर्यन्तं तस्यास्थिरत्वादिति भावः ननु मास्तु द्व्यणुकनाशकाग्निसंयोगस्य परमा
णुश्यामनाशकत्वं रक्तोत्पादकत्वं च परन्तु द्व्यणुकनाशसमकालोत्पन्नान्यतरसंयोगस्य परमाणुश्यामनाशकत्वं रक्तोत्पादकत्वं चास्तु न च श्यामनाशकतावच्छेदकर
 क्तोत्पादकतावच्छेदकजात्योः सांकर्यापत्तिरिति वाच्यम् उत्पादकतावच्छेदकजातेर्नाशकतावच्छेदकजातिव्याप्यत्वोपगमादत आह किं चेति नाशकएव यद्युत्पादक इति
एवकारेण नाशकतावच्छेदकेनैव जात्या चाग्नित्वरूपव्याप्तिरुत्पादकतावच्छेदके लभ्यते तथा च यद्युत्पादकतावच्छेदकं नाशकतावच्छेदकव्याप्यं तदेत्यर्थः नष्टे रूपादौ रूपप्र
त्यग्रयानष्टायां अग्निनाशे चरमाग्निसंयोगनाशे परमाणौ पाकेन रूपोत्पत्तिस्थले प्रथममग्निसंयोगादिना रूपोत्पत्तिस्तेनैव रूपनाशः पुनरग्निसंयोगानन्तरं पुना रूपोत्पत्ति
संभवेपि चरमाग्निसंयोगोत्तरं तेन रूपोत्पादेन रूपस्य तेनैवाग्निसंयोगेन नाशसंभवात् द्विरग्निसंयोगस्याविनाशे रूपान्तरोत्पादासंभवेन नीरूपश्चिरं परमाणुः स्यादित्यर्थः न च चर
माग्निसंयोगेन विनश्यद्रव्ये नैव रूपोत्पत्तिस्तदुत्तरक्षणे च न तद्रूपनाशः पूर्वक्षणेग्निसंयोगाभावादिति वाच्यम् असमवायिकारणस्य कार्यसहभावेनैव हेतुतायाः स्यायवैशेषिकर
सिद्धान्तसिद्धतया विनश्यद्द्रव्येण चरमाग्निसंयोगेन रूपोत्पादासम्भवादिति परमाणुरिति वैशेषिकमताभिप्रायेण न्यायनये सर्वोङ्करीत्या घटादेरपि नीरूपत्वप्रसङ्गो बोध्यः ननु र
क्तोत्पादकतावच्छेदकवैजात्यं श्यामनाशकतावच्छेदकवैजात्यव्याप्यमिति न भ्रमः परन्तु वैजात्ययोरभेदः तेन न सांकर्यमत आह उत्पादकश्चेदिति चेन्नाशक उत्पादक इति योज
ना नाशकतावच्छेदकमेव यद्युत्पादकतावच्छेदकं तदेत्यर्थः रक्ततरतानस्यादिति अयं भावः रूपनाशकतावच्छेदकं विलक्षणाग्निसंयोगत्वं तदेव यद्युत्पादकतावच्छेदकं त
दा कार्यतावच्छेदकमपि सामान्यतः पृथिवीपरमाणुरूपत्वं वाच्यम् तथा सति कश्चिद्रक्ततरता कश्चिद्रक्ततमता परमाणौ न स्यात् कार्यवैचित्र्यस्य कारणतावच्छेदकभेदा
 धीनत्वादिति सिन्दूरादेरक्ततारतम्यस्यानुभावकतया तत्परमाणुषु तस्यावश्यंभावादिति भावः इदं च पूर्वरूपनाशकाग्निसंयोगमात्रस्योत्तररूपहेतुत्वमित्यभिप्रायेणाग्नि
रन्यस्मादग्निसंयोगादिति भाष्यानुरोधेन चोक्तम् वस्तुतो रक्ततारतम्यस्य पूर्वरूपविशेषध्वंसकृतत्वात् भाष्यस्य द्व्यणुकनाशकाग्निसंयोगापेक्षयान्यपरत्वाद् उत्पादविनाशक
योरग्निसंयोगयोरेकत्वानेकत्वेऽनियम एवेति ध्येयम् परमाण्वन्तरेति द्व्यणुकनाशककर्मवत्परमाणुभिन्नद्व्यणुकान्तरारंभकपरमाणावित्यर्थः कर्मचिन्तनादिति द्व्यणुका
रम्भकसंयोगनाशाद्युत्पत्त्यादिक्षणे द्व्यणुकान्तरारम्भककर्मचिन्तनादित्यर्थः पंचमादीत्यत्रादिना षष्ठसप्तमाष्टमक्षणानां परिग्रहः इत्यष्टक्षणा इति ननु यत्रैकस्मिन्परमा

रक्ततारतम्यस्य=४ रक्ततरतानस्यादिति दूषणाभिधानं=४

कर्मोत्पत्तिक्षणे=२

मानाभावेनारम्भकसंयोगावच्छेदेन विजातीयतेजःसंयोगादेव रूपादिनाश
३+ सम्भवेप्यारम्भकसंयोगावच्छेदेन तेजःसंयोगस्याभिघातादेस्तथात्वं नि
त्रसङ्गावे २८

द्वितीयक्षणे=१

47A

एणावन्निसंयोगसमकालं परमाण्वंतरे कर्मोत्पत्तिः ३ अनन्तरक्षणे नकर्मेणैवक्रियाविभाग पूर्वसंयोगनाश द्व्यणुकनाशा अपरत्र विभाग पूर्वसंयोगनाशो न्तरसंयोगोत्पत्ति द्व्यणुकोत्पत्तिस्सो ।

त्पत्तिपक्षत्र द्विक्षणा एवं यत्रैकस्मिन्परमाणौ कर्मोत्पत्तिसमकालं परमाण्वंतरे कर्मोत्पत्तिस्तत्र त्रिक्षणा एवं यत्रैकस्मिन्परमाणौ विभागसमकालं परमाण्वंतरे कर्मोत्पत्तिस्तत्र चतुःक्षण

श्यामादिनिवृत्तिमंतरेणा=३ पि सम्भवतीति चेन्न द्व्यणुकनाशमंतरेण परमाणौ श्यामादिनिवृत्तिस्तामंतरेण च रक्तोत्पत्तिर्न सम्भवतीत्युक्तप्रायम् इत्थं च द्व्यणुकनाशक्षणे परमाणुश्यामनाशक्षणे रक्तोत्पा

द्व्यणुकनाशक्षणे परमाणुश्यामनाशक्षणे रक्तोत्पत्तिक्षणेषु=४ त्तिक्षणे वा द्व्यणुकांतरोत्पत्तौ द्वित्रिचतुःक्षणाप्रक्रियाव्याख्या न चैतेषु द्व्यणुकांतरोत्पत्तिः सम्भवतीति तत्पाक्षसति तत्सर्वेक्षणेषु परमाणोरक्तत्वेन तदारब्धद्व्यणुकस्यापुरक्तत्वप्र

संगादिति परमाण्वंतररक्ते नैव द्व्यणुकरक्तोत्पादसंभवाच्चाष्टमक्षणे द्व्यणुकोत्पत्तौ क्षतिविरहेण त्रिक्षणापि सम्भवति रूपाद्यंतरसहकृतस्यैव रूपादेः रूपाद्यारम्भकत्वांगीकारे त्रिक्षण

प्रक्रियाया असम्भवेपि चतुःक्षणा संभवत्येव रक्तोत्पत्तिक्षणे द्व्यणुकोत्पत्त्यास्तानुअनन्तरक्षणे तत्र रक्तोत्पादसम्भवादित्युक्तं खलमतं नादरणीयमित्यन्यत्र विस्तरः अवयविन्यपीत्यपि नापर

माणुग्रहः तेषां नैयायिकानां अयं वक्ष्यमाणः अवयविष्वपीति अवयविनाक्ये चोत्रपीत्यर्थः पाकः रूपादिपरावृत्तिः नविरुध्यते इति सालात्परम्परासाधारणसकला

वयवावच्छेदेन तेजःसंयोगस्य [illegible] रूपादिनीहेतुत्वे मानाभावेन सर्वीकरीत्यावयविनाशस्याप्रसक्तेः सर्वावयवावच्छेदेन तेजःसंयोगस्य रूपादिनाशकत्वेपि नाशकताव

च्छेदकवैजात्यस्य नोदनात्वाभिघातत्वविरुद्धस्यैवांगीकरणीयतया नोदनाभिघातभिन्नतेजःसंयोगात् रूपादिनाशेपि तेनावयविनाशस्यापि अस्तु वा रूपादिनाशकतावच्छेदकवैजात्य संभवा+

स्य नोदनाभिघातत्वव्याप्यत्वेन यावावयवाभिघातादिकालेवयवाभिघातोत्पत्तिनियमे मानाभावः आस्तां वा तथा नियमस्तथाप्यवयवाभिघातादेर्नियमतो द्रव्यारम्भकसंयोगविरोधिवि

भागहेतुक्रियाजनकत्वे मानाभाव एवं विभागं प्रतिक्रियायास्तत्सहकृतक्रिये हेतुतया तत्सत्क्रियाधीनविभागं प्रति तत्तत्पूर्वदेशस्य विशिष्य हेतुतया च तत् अभिघातादि जन्यक्रियायास्तादृशविभागहेतुत्वासिद्धेरिति द्व्यणुकादिद्रव्यनाशक=

भावः यद्यप्युक्तं वैशेषिकैरवयविरूपं प्रत्यवयवरूपहेतुतायां व्यभिचारापत्त्यानावयविनिपाकेन रूपोत्पाद इति तदपि न अवयवरूपादेर्विजातीयरूपादिकं प्रत्येव हेतुतया व्यभिचाराप्रसक्तेः

अवयवरूपादेर्विजातीयरूपादिकं प्रत्येव हेतुतांगीकारेणा= एतेनावयविरूपनाशं आश्रयनाशहेतुतायां व्यभिचारापत्त्या पाकेनावयविरूपनाशासम्भव इत्यपास्तम् आश्रयनाशजन्यतावच्छेदककोटौ वैजात्यस्यानिवेशनीयत्वादिति अवयविनिपाका विजातीयरूपनाशं प्रति आश्रयनाशः कारणमिति=

नभ्युपगमे साधकाभावमुक्त्वा तत्र बाधकमाह अनंतेति इत्थं चावयविनाशानंगीकारे च प्रत्यभिज्ञासंगच्छत इति एवं चावयविविनाशे तत्पन्नावयविनि पूर्वावयविनोऽभेदाभावेनाभेदावगाहिनी

प्रत्यभिज्ञानस्यादिति भावः॥ इति स्पर्शग्रन्थः॥ कालादावतिव्याप्तिमाशंक्याह असाधारणमिति वस्तुतो गणने संख्यात्वं तत्प्रकारको व्यवहारस्तत्प्रकारकं प्रमात्मकं ज्ञानं तद्धेतुस्तद्विषय इत्यर्थात्

एवमग्रेपीति=२ कालादावतिव्याप्तिः तत्रापि संख्यात्वं जातिरेव लक्षणमितरन्तु संख्यात्वजातौ प्रमाणतयोक्तम् एवमग्रेपीति ध्येयम् द्वित्वादय इति एकत्वान्यसंख्यामात्रं अपेक्षाबुद्धिरूपनिमित्तकारणजन्यमि

त्यर्थः असमवायिकारणं तु द्वित्वं प्रति समवायिकारणगतं यावदेकत्वमिति बोध्यम् ननु योग्यद्वित्वादावपेक्षाबुद्धेर्हेतुत्वेप्ययोग्यद्वित्वादौ तद्धेतुत्वे मानाभाव इति चेन्न योग्यद्वित्वादेरपेक्षाबु अपेक्षाबुद्धि=२

द्धिजन्यत्वेतीन्द्रियद्वित्वादावप्यनेकसंख्यात्वादिना तद्धेतुमानात् अयोग्यापेक्षाबुद्धेर्द्वित्वहेतुत्वे कथमविरलक्रमेण यावदपेक्षाबुद्धिसत्त्वेन द्वित्वाद्युत्पत्तिः अत्र केचित् अपेक्षाबुद्धेरन्यानि ।

संख्यात्वजातिमत्त्वे संख्यात्वे=३

संख्यात्वप्रकारकज्ञानविषयत्वमिति=२

अपेक्षाबुद्धिजन्यत्वानुमानात् द्वित्वादयः अपेक्षाबुद्धिजन्याः अनेकसंख्यात्वात् योग्यद्वित्वादिवत्=१

भगवदपेक्षाबुद्धेः=२ अपेक्षाबुद्धि=२ चैत्रीयापेक्षाबुद्धिजन्यानेकसंख्यात्वाद्यवच्छिन्नं प्रति
चैत्रीयापेक्षाबुद्धिजन्यानेकसंख्याप्रतिबंधिका=२

48

न्या॰मु॰टी॰ ४८

वंधेनहेतुत्वात्ययावदपेक्षाबुद्धिसत्त्वं द्वित्वाद्युत्पत्तिरिति तत्र धारावाहिकापेक्षाबुद्धिभिः सर्वत्र धारावाहिकद्वित्वाद्युत्पत्तेर्दुर्वारत्वात् भगवदपेक्षाबुद्ध्या धारावाहिकद्वित्वाद्युत्पत्तेर्दुर्वार
त्वाच्च तद्बुद्धेर्नित्यत्वेनोत्पत्तिसंबंधेन तद्धेतुत्वस्य दुर्वचत्वात् वस्तुतस्तु तत्तत्पुरुषीयापेक्षाबुद्धिजन्यानेकसंख्यात्वाद्यवच्छिन्नं प्रति तत्तत्पुरुषीयापेक्षाबुद्धिजन्यानेकसंख्यादेः प्रति
बंधकत्वाभ्युपगमान्न यावदपेक्षाबुद्धिसत्त्वं द्वित्वाद्युत्पत्तिरिति प्रत्येकं घटादाविति तथा चानेकाश्रयपर्याप्त्यादि तिमत्त्वमसंगतमिति भावः नन्वेकत्वमप्यनेकवृत्तितया द्वित्वा
एकोद्वौ= न एकोद्वौ= धारतानवच्छेदकत्वान्न तथा प्रत्यय इत्यत आह एकोनद्वाविति एकत्वावच्छेदेन द्वित्वबुद्ध्यभावादेकत्वादेर्न्यूनवृत्तितया द्वित्वबुद्ध्यनवच्छेदकत्वादिति भावः अनेकाश्रय इति
उभयाद्याश्रय इत्यर्थः तथा च तादृशप्रतीतेर्न द्वित्वबुद्ध्याधारतावच्छेदकत्वमेकत्वे विषयः किंतु पर्याप्तिसंबंधेन द्वित्वं तद्बुद्धेर्वा एकत्वावच्छिन्ने प्रकारः इत्थं च पर्याप्तिसंबंधे
न द्वित्वस्य प्रत्येकमभावादेकोद्वावित्यप्रत्ययस्यैकोनद्वाविति प्रत्ययस्य चो[illegible]विति प्रत्ययस्य वैलक्षण्यमुपपत्तिः यदि चैकोनद्वाविति प्रतीतिबलाद्द्वित्वबुद्धेरवच्छेदकत्वं स्व[illegible]
पपत्तिरिति भावः अत्र वदन्ति उभयादेः प्रत्येकानतिरिक्ततया प्रत्येकमपि पर्याप्तिसंबंधेन द्वित्वमस्त्येवेति पर्याप्त्यंगीकारेप्येकोद्वावित्यप्रत्ययस्यैकोनद्वाविति प्रत्ययस्य च कथमुपप
त्तिः यदि चैकोनद्वाविति प्रतीतिबलाद्द्वित्वावच्छेदकत्वं स्वरूपसंबंधविशेषरूपमेकत्वे स्वीक्रियते नद्वित्वावच्छेदकत्वमेको द्वावित्यप्रत्ययादिति विभाव्यते तदा समवा
यपक्षेपि तुल्यमिति पर्याप्त्यंगीकारो निरर्थकमिति चेदत्राह आकाशाविति वाक्यस्य प्रामाण्याय पर्याप्त्यंगीकार आवश्यकः न च समवायेनैव पर्याप्तिसंबंधेनापि द्वित्वा
आकाशाविति= स्याकाशे सत्त्वात्पर्याप्त्यंगीकारेपि तद्वाक्यप्रामाण्यं दुर्वारमिति वाच्यम् उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेरेव द्वित्वसंबंधतोपगमात् आकाशत्वव्याप्यद्वित्वपर्याप्तेर (उद्देश्यतावच्छेदक)
प्रसिद्धत्वात् द्वित्वपर्याप्तेर्द्वित्वस्वरूपतया तस्य घटादावपि सत्त्वात् न चोद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसमवायस्य द्वित्वसंसर्गतां स्वीकृत्याकाशाविति प्रयोगवारणसंभव
उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसमवायसंबंधस्वीकारेसति= वादत्वं पर्याप्तेरिति वाच्यम् तथा सति घटाविति प्रयोगस्य प्रामाण्यानुपपत्तेः समवायस्यैकत्वेन घटत्वव्याप्यसमवायस्या+ इत्यन्यत्र विस्तरः अपेक्षाबुद्धिनाशात्तेषां नाश इ प्रसिद्धे+
ति सत्त्वस्य तृतीयक्षणेऽपेक्षाबुद्धिनाशाच्चतुर्थक्षणे द्वित्वादीनां नाश इति नार्थः परंतु चतुर्थक्षणेऽपेक्षाबुद्धिनाशात् पंचमक्षण इत्यर्थ इति ज्ञापनाय वैशेषिकप्रक्रियां प्रदर्
शयति प्रथममित्यादिना द्वित्वविशिष्टप्रत्यक्षम् द्वित्वत्वविशिष्टलौकिकप्रत्यक्षम् अन्यथा अपेक्षाबुद्धेर्द्विक्षणमात्रावस्थायित्वे द्वित्वस्यैव नाश इति द्वित्वस्य ना
द्वित्वाभावपूर्वक्षणे= श एवेत्यर्थः ननु तदानीं द्वित्वाभावेपि तत्पूर्वक्षणे द्वित्वसत्त्वान्न द्वित्वप्रत्यक्षानुपपत्तिरत आह विद्यमानस्यैवेति संबद्धं वर्तमानं च गृह्यते चक्षुरादिनेत्यनुरोधाल्लौकिकप्रत्यक्षं प्रति
द्वित्वादेर्विषयस्य कार्यसहभावेन हेतुत्वादिति भावः ननु योग्यविभुविशेषगुणानां नाशं प्रति स्वोत्तरवर्त्तिविशेषगुणत्वेन हेतुतया ऽपेक्षाबुद्धेरुत्तरक्षणोत्पन्नस्मृत्या संस्कारेण वा
पेक्षाबुद्धिनाशे कथं नवारणीय इत्याशंकामुपसंहारव्याजेन परिहरति तस्मादिति द्वित्वप्रत्यक्षादिकमिति द्वित्वद्वित्वत्वनिर्विकल्पकमित्यर्थः आदिना त्रित्वादिग्रहः परि
ग्रहः योग्यविभुविशेषगुणत्वस्य स्वत्वस्य चाननुगतस्याभावेन स्वोत्तरोत्पन्नगुणत्वस्याननुगतस्याभावात्तत्संबद्धत्वेनैव नाश्यनाशकभावस्य वाच्यतया द्वित्वत्वविशिष्टप्रत्यक्षस्य ४८

द्वित्वप्रत्यक्षकाले=४
कार्यप्रत्यक्ष तत्सहभावेनतत्कालीन
वृत्तिमत्त्वेन=३

द्वित्वप्रत्यक्ष=२ निर्विकल्पस्य=५

48 A

कार्यानुरोधेन द्वित्वत्वनिर्विकल्पकस्यैव तन्नाशकत्वेनापेक्षाबुद्धिनाशकत्वं कल्प्यते न तु द्वितीयक्षणोत्पन्नस्मरणादेरिति भावः ननु द्वित्वत्वविशिष्टद्वित्वप्रत्यक्षमुपनीतभानात्म
कमेवास्तु अलं तदुत्पन्नपञ्चमक्षणावस्थायित्वकल्पनेनापेक्षाबुद्धेः न च द्वित्वत्वांशे उपनीतभानसंभवेऽपि द्वित्वांशे नोपनीतभानत्वमनुपनीतविशेषणतायां वेति नियमादिति वाच्यम् प
तो द्वित्वत्वविशिष्टद्वित्वप्रत्यक्षं हि जायमानं द्वयोर्द्वित्वप्रकारकमेव भवति द्वे द्रव्ये इत्याकारकं निर्विकल्पकोत्तरक्षणे द्वे द्रव्ये इत्याकारकं द्वित्वत्वविशिष्टद्वित्वप्रकारकं प्रत्यक्षं उपनीतभानात्मके=
द्वे द्रव्ये इत्याकारकज्ञानपूर्वं=८ न सम्भवति तत्पूर्वं विशेषणतावच्छेदकद्वित्वत्वप्रकारकद्वित्वज्ञानासम्भवादिति चेन्न विशेष्ये विशेषणमिति रीत्यैव द्वे द्रव्ये इत्याकारकसंभवादिति चेन्न निर्विकल्पकस्याप्रत्यास
त्तितया द्वे द्रव्ये इत्युपनीतभानासंभवात् तस्योपनीतभानरूपत्वे तदुत्तरं द्वित्वसाक्षात्कारोमीत्यनुव्यवसायानुपपत्तेश्च तस्मात् त्रिक्षणावस्थायित्वमपेक्षाबुद्धेरिति वैशेषिकाणामाशयः न
व्यास्तु उत्पद्यमानद्वित्वस्य द्वित्वसामान्यलक्षणया सर्वमनुभवाद्द्वित्वोत्पत्तिसमय एव द्वित्वत्वप्रकारकमुत्पद्यमानं द्वित्वस्मरणं तेन तदुत्तरक्षणे इदानीं द्वे द्रव्ये इति विशिष्टवैशिष्ट्
यावगाहिलौकिकप्रत्यक्षसंभवादलमपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वेन अन्यथा चक्षुरादिकुत्पादद्वितीयक्षणोत्पन्नत्वनिर्विकल्पकमनन्तरक्षणे चक्षुरपनोदाद्दृष्टं साक्षात्करोमीति लौकिक अपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वे=
प्रत्यक्षं न सम्भवतीति चक्षुरवशादादेरपि त्रिक्षणावस्थानप्रसंगादित्याहुः नन्वपेक्षाबुद्धेर्द्वित्वोत्पादकत्वे चैत्रीयापेक्षाबुद्धिजन्यद्वित्वस्यापेक्षाबुद्धिशून्येन मैत्रेण ग्रहणापत्तिः
संयुक्तसमवायरूपसामग्र्याः चक्षुःसंयुक्तघटे द्वित्वस्य समवायात्= सन्निकर्षादिघटितसामग्र्याः सत्त्वात् महारणपविषयतासंबंधेन तत्पुरुषीयप्रत्यक्षे तद्भिन्नपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादेः स्वाद्यात्मना प्रतिबंधकत्वकल्पने च गौरवमत आह अत एवेति
पूर्वोक्तयुक्त्यापेक्षाबुद्धेर्द्वित्वोत्पादकत्वस्यावश्यकत्वादेव तेनैव गृह्यत इति कल्प्यत इति तद्भिन्नेन न गृह्यत इति कल्प्यत इत्यर्थः तथा चान्यथानुपपत्त्या पूर्वोक्तप्रतिबध्यप्रतिबंधक
अपेक्षाबुद्ध्यभावकालान्तरे= भावकल्पनागौरवं न दोषायेति भावः ननु कालान्तरे द्वित्वप्रत्यक्षवारणाय द्वित्वप्रत्यक्षं प्रत्येवापेक्षाबुद्धेर्हेतुत्वमस्तु न तु द्वित्वं प्रतीत्याशंकते न चेति लाघवेनेति द्वित्वप्रत्यक्षत्वापेक्ष
या द्वित्वस्यैव कार्यतावच्छेदकस्य लघुत्वादिति भावः ननु द्वित्वप्रत्यक्षनिष्ठलौकिकविषयतया द्वित्वत्वस्यैव कार्यतावच्छेदकमिति गौरवम् न चान्तरेणापेक्षाबुद्धिं द्वित्वप्रत्यक्षापत्तिरे
लौकिकविषयतया द्वित्वस्य कार्यतावच्छेदकत्वांगीकारेणापि= तावतापि वारितैवेति वाच्यम् द्वित्वत्वाविषयकद्वित्वप्रत्यक्षस्य अलीकतया व्यापकीभूतद्वित्वत्वावच्छिन्नजनकसामग्रीविरहादेव तद्वारणादिति चेन्न उत्पादकसामग्र्या व्यञ्जक द्वित्वप्रत्यक्ष=
त्वांगीकारे घटाद्युत्पादकसामग्र्या अपि घटादिव्यञ्जकत्वापत्त्या सत्कार्यवादापत्तेरिति नन्वपेक्षाबुद्धेर्द्वित्वाद्युत्पादकत्वं न सम्भवति द्व्यणुकस्यास्मदीयप्रत्यक्षागोचरतया तत्रापेक्षाबु
द्व्यणुके= द्ध्यसंभवेन तत्र त्रित्वानुत्पत्त्यापत्तेः न चेष्टापत्तिः भावकार्यस्यासमवायिकारणजन्यत्वनियमेन द्व्यणुकगतत्रित्वं विना त्र्यणुकपरिमाणानुत्पत्तेः परिमाणस्य स्वसमानजातीयो
त्र्यणुकपरिमाणे= त्कृष्टपरिमाणजनकत्वनियमेन द्व्यणुकपरिमाणस्य तत्रासमवायिकारणत्वासंभवादत आह अतीन्द्रिये द्व्यणुकादाविति आदिना परमाणुपरिग्रहः सर्गादौ योगिनामभावा
दत आह ईश्वरीयेति न चेश्वरीयापेक्षाबुद्धेर्द्वित्वोत्पादकत्वेन द्वित्वस्य नित्यत्वप्रसंगः ईश्वरीयापेक्षाबुद्धेर्नित्यत्वेन तन्नाशनाश्यत्वस्य [illegible] द्वित्वे व्यभिचारकत्वादिति वाच्यम् त ईश्वरीयापेक्षाबुद्धिजन्यद्वित्वे=२
द्वित्वस्येश्वरीयापेक्षाबुद्धिसहकारिविशेषस्य क्षणविशेषस्य नाशादेव नाशोपपत्तेः क्षणविशेषस्येश्वरीयापेक्षाबुद्धिसहकारित्वानंगीकारे सर्गाद्यकालीनपरमाणुद्वित्वोत्पत्तेः

सर्गाद्यकालीनपरमाणुगतद्वित्वस्य=१

४९ न्या॰मु॰टी॰ ४९

सर्वत्र द्वित्वोत्पत्त्यापत्तेः अपेक्षाबुद्धिनाशाद्वेति मतस्यान्यथानाशोपलक्षकत्वमीश्वरीयापेक्षाबुद्धिसहकारिविशेषोपलक्षकत्वस्वीकारात्स्वनतं हि रोधः एतेन घटाद्युत्पत्तिद्वितीयक्षणे भ-
गवदपेक्षाबुद्ध्या तत्र द्वित्वादिकं जन्यत इति परास्तम् तदानीं सहकारिक्षणविशेषस्याभावेन भगवदपेक्षाबुद्ध्या द्वित्वादेर्जननात्तदानीं तत्र द्वित्वोत्पादे मानाभावाच्च एतदस्वरसाद्वात्वाङ्गु-
तरे इति इत्यतः इत्याकांक्षातः नन्वेकत्वांशे निर्धर्मितावच्छेदकैकत्वज्ञानाद्द्वित्वाद्युत्पत्त्यापत्तिरतो व्याचष्टे अयमेक इति तन्मद्व्यक्तिमात्रनिष्ठेदंत्वाद्यवच्छिन्नविशेष्यतानिरूपितैक-
त्वप्रकारताशालिनी बुद्धिरपेक्षाबुद्धिपदार्थ इति नोक्तदोष इति भावः क्वचित्पुस्तके इदं तु बोध्यमित्याद्यवधेयमित्यंतः पाठः स चैवं व्याख्येयः यत्रानियतैकत्वेति एकविशेष्यकसंख्यात्वनि-
यतत्रित्वादिप्रकारकज्ञानमन्यकालीनमनेकैकत्वज्ञानमित्यर्थः यद्वा एकत्वांशे निर्धर्मितावच्छेदकमेकत्वसंख्यायोगिन इत्याकारकज्ञानमित्यर्थः तेन विनादाविति तत्र नियतैकत्वा-
ज्ञानाभावात्तस्यैव सहस्रत्वादिसंख्योत्पादकत्वादिति भावः उत्पन्नेपीति अनियतैकत्वज्ञानस्यापि त्रित्वाद्युत्पादकत्वादिति भावः दोषात् नियतानेकैकत्वज्ञानाभावात् अनियता-
नेकैकत्वज्ञानस्य त्रित्वोत्पत्तिकारणत्वेपि त्रित्वांशे त्रित्वत्वप्रकारकप्रत्यक्षे नियतानेकैकत्वज्ञानस्य हेतुतायां तं विना न त्रित्वत्वादिप्रकारकं प्रत्यक्षमिति भावः उपपद्यत इति इतोव-
तरेत्यत्र बहुत्वे स्वसजातीयनिरूपितोत्कर्षः प्रतीयत इति तथा च चतुष्ट्वादिरूपे बहुत्वे त्रित्वादिरूपस्वसजातीयनिरूपितोत्कर्षसत्त्वात्तादृशप्रतीतिरुपपद्यत इति भावः संख्यांतरत्वे त्रित्वाद्य-
तिरिक्तसंख्यात्वे तत्तारतम्याभावादिति बहुत्वे स्वसजातीयोत्कर्षाभावात्तत्वमनेनसैकत्वादिति भावः नच बहुत्वस्य त्रित्वादिरूपत्वे बहुत्वनिश्चये कथं त्रित्वादिसंशय इति वाच्य-
म् समानप्रकारकनिश्चयस्यैव संशयविरोधितया बहुत्वप्रकारकनिश्चयस्य त्रित्वत्वादिप्रकारकसंशयाविरोधित्वात् ॥ इति संख्याग्रंथः ॥ अणु महदित्यादि यद्यप्यणुत्वमेव ह्रस्वत्व-
महत्त्वमेव दीर्घत्वमस्त्विति कृतमत्र चातुर्विध्यं तथापि तदवधिकाणुतया प्रतीयमानेपि तदवधिकह्रस्वत्वाव्यवहारात्तदवधिकमहत्त्ववत्तया प्रतीयमानेपि तदवधिकदीर्घत्वाव्यवहा-
राच्च ह्रस्वत्वदीर्घत्वयोरतिरिक्तपरिमाणतया तच्चातुर्विध्यं बोध्यम् संख्याजन्यमुदाहरतीति संख्यामात्रजन्यमुदाहरतीत्यर्थः न सजातीयमित्यनंतरं विजातीयसंयोगरूपः प्रचयस्त-
न्द्व्यणुकादौ तत्सत्त्वेपि तस्य किंचित्करत्वादिति स्मरणीयम् द्वित्वसंख्या द्वित्वमात्रसंख्या एवमग्रेपि परिमाणजन्यम् परिमाणमात्रजन्यम् कपालादिपरिमाणजन्यम् कपाला-
दिपरिमाणमात्रजन्यमित्यर्थः अप्रचितमहत्कपालद्वयारब्धे घटे यन्महत्परिमाणं तत्र कपालगतद्वित्वसंख्या न कारणं द्वित्वसंख्याया महत्त्वाजनकत्वात् अन्यथा द्व्यणुकेपि मह-
त्त्वोत्पत्त्यापत्तेः न चोक्तापत्त्या द्वित्वे न परिमाणाजनकत्वेपि घटगतमहत्त्वं प्रति कपालगतमहत्त्वस्य कपालगतद्वित्वस्य वा हेतुत्वमित्यत्र विनिगमनाविरह इति वाच्यम् कपालगतम-
हत्त्वोत्कर्षेण घटगतमहत्त्वोत्कर्षस्यानुभविकतया कपालमहत्त्वस्यैव तत्रावश्यं हेतुतायावाच्यत्वात् यत्र कपालेन प्रचयस्तत्र प्रचयस्यापि हेतुत्वासंभवाद्घटपरिमाणं कपालपरिमाण-
मात्रजन्यमिति भावः प्रचयः शिथिलाख्य इति किंचिदवयवावच्छेदेनावयवांतरासंयोगिनि महदवयवे वर्तमानः संयोगः प्रचय इत्येके अत्र महत्त्वदर्शनेद्व्यंपरमाणुसंयोगसंयो-
गस्य प्रचयत्वे सति विरहादित्यन्ये भूयोवयवावच्छेदेनावयवांतरासंयोगिन्यवयवे वर्तमानः संयोगः प्रचयस्तेन परमाणुसंयोगो द्व्यणुकसंयोगो वा न प्रचय इत्यपरे अत्र प्रचयरहिते शिथि- ४९

ईश्वरीयापेक्षाबुद्धिसहकारमतमेकं=२

परिमाण= प्रचय=

द्वित्वसंख्यायाः महत्त्वजनकत्वे=

द्व्यणुकेमहत्त्वोत्पत्त्यापत्त्या=

घटगतमहत्त्वे=३ इतिमतकथनेन=२

आश्रयनाशमात्रनाशा
दित्यर्थकत्वे=५

मह+

५१A

महावयवैरारब्धस्य यन्महत्परिमाणं तत्संख्यापरिमाणोभयजन्यं महदवयवारब्धत्वादतिशयितत्वात् अल्पावयवारब्धमहत्त्वादतिशयितत्वाच्च प्रचिताभ्यां महावयवाभ्यामारब्धे यन्महत्परिमाणमति
शयितं तत्परिमाणप्रचयोभयजन्यमप्रचितावयवारब्धात् द्व्यणुकमहत्त्वाच्च तादृशातिशयादर्शनात् प्रचितैर्महद्भिरारब्धस्य महत्परिमाणं संख्यापरिमाणप्रचयजन्यं प्रचितमहावयवद्वयारब्धमह
दर्शितमात्रस्य= त्त्वादपि तस्योत्कृष्टत्वादिति बोध्यम् दिङ्मात्रस्य मूले प्रदर्शितत्वादित्यन्यत्र विस्तरः केचित्तु दीर्घमिति प्रतीतेरवयवसंयोगविशेषेणैवोपपत्तेर्दीर्घत्वं न परिमाणान्तरमन्यथा वक्रत्वचतुरस्रत्वादीनां दीर्घत्वस्यापि परिमाणत्वे=३
परिमाणान्तरत्वापत्तेरित्याहुः अर्थादिति प्रकरणादित्यर्थः यद्वा अर्थात्परिशेषादित्यर्थः न च परिशेषोऽसिद्धः रूपादेराश्रयनाशनाश्यत्वादिति वाच्यम् आश्रयनाशत इति मूलस्याश्रयनाशमात्रा
रूपादीनां पाकादिना विनाश्यत्वमित्यभिवः=५ दित्यर्थकतया रूपादेराश्रयनाशमात्रनाश्यत्वाभावेन परिशेषसम्भवात् न च मूलस्य तादृशार्थकत्वे प्रयोजनाभाव इति वाच्यम् क्रियाविभागादिक्रमेण यत्किंचिदवयवनाशेऽपि शरीरादिना
शस्य मीमांसकैरनभ्युपगमात्तत्र परिमाणनाशस्यानुभविकत्वाच्चाश्रयनाशमात्रनाश्यत्वं स्य परिमाणे तैरनंगीकारात्तन्मतनिराकरणाय मूलस्य तादृशार्थकत्वादिति ध्येयम् ॥ इति परिमाण
ग्रंथः द्वितीयक्षणे चोत्पद्यत इत्यनंतरं त्वाश्रयावयवगतैकत्वासमवायिकारणत्वं चेति स्मरणीयम् एकपृथक्त्वम् एकसमवेतपृथक्त्वम् द्वित्वादिवच्चेति तथा च द्विपृथक्त्वादौ समानाधि द्विपृथक्त्वाधिकरणे घटादौ नत्वेण पृथक्त्वानि=७ अपेक्षाबुद्धिनाशाश्रयनाशाभ्यां=
करणान्येकपृथक्त्वान्यसमवायिकारणानि इदमेकं पृथगिदमेकं पृथगिति नानैकपृथक्त्वविषयिण्यपेक्षाबुद्धिर्निमित्तकारणम् तादृशबुद्धिनाशात्क्वचिदाश्रयनाशात्क्वचिदुभाभ्यां द्वि
पृथक्त्वं नश्यतीति भावः अत्रोभयसमवेतपृथक्त्वं द्विपृथक्त्वं त्रितयसमवेतपृथक्त्वं त्रिपृथक्त्वमित्यादि बोध्यम् ननु घटोपटात्पृथगित्यादावित्यादिप्रतीतेः पटावधिकैकपृथक्त्वद्वयादिनाप्युप
पत्तेरुभयसमवेतपृथक्त्वादौ मानाभाव इति चेन्न घटोपटात्पृथगिति प्रतीत्योभयसमवेतपृथक्त्वसिद्धेस्तेनैव घटः पटात्पृथगिति प्रतीत्युपपत्तेरेकपृथक्त्वे मानाभाव इत्यस्यापि वक्तुं शक्यत्वे द्विपृथक्त्वसाधनेनैव=
एकपृथक्त्वं द्विपृथक्त्वं च= न्नस्माद्विनिगमनाविरहादुभयमंगीकार्यम् परंपरासंबंधः कल्प्यत इति सामानाधिकरण्यरूपपरंपरासंबंधविषयकत्वमुक्तप्रतीतेः कल्प्यमित्यर्थः इदमुपलक्षणम् प्रतीतेः सामानाधिकर घटोन पटइति प्रतीतेः=
ण्यरूपपरंपरासंबंधसंबंधविषयकत्वमं[illegible]गीकृत्यान्योन्याभावानंगीकारे न घटरूपमेतद्घटात्पृथगिति प्रतीत्यनुपपत्तेः एतद्रूपमेतद्रूपात्पृथगिति प्रतीत्यापत्तेश्च अन्योन्या एतद्घटावधिकपृथक्त्वस्यैतद्घटाश्रयत्वाभावात्=
भावस्यातिरिक्तस्याभ्युपगमे तु पृथक्पदस्यान्योन्याभावपरतया सर्वमुपपादनीयमिति पंचमीप्रसंगादिति अन्योन्याभावार्थकपदयोगस्य पंचमीप्रयोजकस्य तत्र सत्त्वादिति भावः अत्र नव्याः
अन्योन्याभाव एव पृथक्त्वं न तु गुणान्तरम् न च घटो नेत्यत्र पंचम्यापत्तिरन्योन्याभावविशिष्टपदार्थकपदयोग एवान्यारादितरर्ते इत्यादिसूत्रेण विधानात् नञस्तु नान्योन्याभावविशिष्टार्थकत्वं अन्योन्याभावविशिष्टभिन्नादिपदार्थकपदप्रयोगित्यादि=५
परं त्वन्योन्याभावार्थकत्वमित्यस्यान्यत्र सिद्धान्तितत्वात् यदि च घटाद्भिन्न इत्यादौ पंचम्यनुपपत्त्या भेदार्थकपदप्रयोगः पंचमीप्रयोजकतयान्यारादिति सूत्रेण बोध्यत इति घटो नेत्यत्र पंचम्यापत्तिर्दु
नञः निपातत्वात्तत्र पंचमीप्रयोजकत्वं नास्ति= र्वारेति विभाव्यते तथापि निपातातिरिक्तान्योन्याभावार्थकपदयोगस्यैव पंचमीप्रयोजकत्वं कल्प्यते अनुशासनस्य प्रयोगानुरोधित्वादिति प्राहुः ॥ इति पृथक्त्वग्रंथः ॥ मूले ऽप्राप्तयोरित्या
दिना संयोगस्वरूपमुक्तं तत्र प्राप्तिः संबंधः स च समवायोऽपीत्यत उक्तमप्राप्तयोरिति लक्षणं तु संयोगत्वजातिरिति मूले आद्योऽन्यतरकर्मज इति ननु संयोगत्वेनान्यतरकर्मणः कार्यतावच्छेद
कम् उभयकर्मजन्यसंयोगे संयोगजन्यसंयोगे च व्यभिचारादिति चेन्न विजातीयकर्मत्वेन विजातीयसंयोगत्वेन समवायेन हेतुहेतुमद्भावात् उभयकर्मजसंयोगादौ च तादृशवैजात्याभावे न व्यभि

पृथक्त्वाधिकरणघटस्तत्रैव
समवायेन रूपमस्ति=८

यत्र समवायेन विजातीयसंयोगं प्रति
समवायेन कर्मकारणम्=९

सामानाधिकरण्यसंबंधेन
याकपालनिष्ठायां क्रियायाः=३

हस्ततरुसंयोग संयोग जन्यत्वात्यंताभावसमानाधिकरणं शरीरक्रि
याजन्यत्वं शरीरक्रियाजन्यहस्तयोगे शरीरक्रियाजन्यत्वात्यंताभावस
मानाधिकरणहस्ततरुसंयोगजन्यत्वं हस्ततरुसंयोगे तयोरेक संयोगजन्यत्वं
त्र समावेशः शरीरतरुसंयोगे अतः संकरः=९

50
न्या·मु·टी·
५०

वाधभावात् एवमुभयकर्मणः संयोगस्यापि द्वसंयोगं प्रति हेतुत्वं बोध्यम् मलेभवेत्संयोगजोपर इति ननु संयोगजसंयोगे मानाभावः यत्र कपालक्रियया कपालतरुसंयोगस्ततः कुंभत
रुसंयोगस्तत्र कपालक्रियाया एव तरुसंयोगं प्रति कारणत्वं न तु कपालतरुसंयोगस्येति चेन्न समवायेन संयोगं प्रति समवायेन क्रियायाः कारणत्वात् कुंभे समवायेन क्रियाया अ
भावेन कुंभे तरुसंयोगानुपपत्तेः क्रियायाः सामानाधिकरण्यसंबंधेन हेतुत्वांतरकल्पनापेक्षया समवायेन संयोगस्यैव हेतुत्वकल्पनौचित्यात् वस्तुतो यत्र कपालक्रियया कपाला
तरेण तरुणा चैकस्मिन्क्षणे संयोगस्तदुत्तरक्षणे घटोत्पत्तिः कपालक्रियानाशश्च नाशकस्योत्तरसंयोगस्य पूर्वं सत्त्वात् तदुत्तरक्षणे कुंभतरुसंयोगानुपपत्तिः पूर्वक्षणे कपालक्रि
यायानाशात्तस्मात्कपालसंयोग एव कारणमिति संयोगजसंयोगसिद्धिर्निराबाधैवेति अत्र केचित् कथं संयोगस्यैतद्विधमन्यतरकर्मजन्यसंयोगस्याप्रसिद्धेः यत्र पुक्रियये
पुष्टरयोः संयोगस्तत्र संयोगाद्यधिकरणवृक्षे क्रियाविरहेण व्यभिचारादन्यतरकर्मणः संयोगं प्रति कारणत्वस्य वक्तुमशक्यत्वादित्याहुः तन्न कार्याव्यवहितपूर्वक्षणावच्छेदे
न कार्यतावच्छेदकावच्छिन्नयत्किंचिद्व्यक्त्यधिकरणीभूतयावद्व्यक्तिवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव कारणताघटकमेवं च कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यताव
च्छेदकावच्छिन्नयत्किंचिद्व्यक्त्यधिकरणयावद्व्यक्तिषु कारणाभाववत्त्वमेव व्यभिचारः न चैवंविधो व्यभिचारः प्रकृते रघोरपि तौ हस्तपादवं तर्गततया तत्र क्रियाभावासत्त्वादिति दिक् नन्वे
वं यत्र हस्तक्रिया ततो द्वितीयक्षणे शरीरक्रिया तत्र चतुर्थक्षणे हस्ततरुसंयोगस्तस्मिन्नेव क्षणे शरीरक्रियाजन्यशरीरपूर्वदेशसंयोगनाशस्तदुत्तरक्षणे शरीरतरुसंयोगो जायते त
स्य च हस्ततरुसंयोगजन्यत्वं शरीरक्रियाजन्यत्वं वेत्यत्र विनिगमनाविरहः न चोभयमेव तत्र हेतुर्जातिसंकरप्रसंगादिति चेन्न तत्र संयोगद्वयस्यैव योगमात्रं द्वित्वाद्यहस्तसादृश्यदोषादिर
त्यन्ये तत्र चित्रसंयोग एवोत्पद्यते कारणत्वं तत्र संयोगकर्मोभयत्वेनेति चित्रसंयोगो विजातीय एवेति न सांकर्यमित्यपरे इत्यन्यत्र विस्तरः ॥ इति संयोगग्रंथः ॥ पूर्ववदिति संयोग
वदित्यर्थः तेनैव कपालविभागेनेति तेन कपालविभागेनैवेत्यर्थः एवकारेण कर्मणो व्युदासः कपालस्याकाशविभागो जन्यत इति अन्यथा कपालाकाशसंयोगस्य नाशकार
भावेन नित्यत्वापत्तिरेवं कपालाकाशसंयोगस्य प्रतिबंधकस्य सत्त्वेनोत्तरसंयोगानुत्पत्त्या कर्मणोऽपि नित्यत्वापत्तिः उत्तरसंयोगस्यैव स्वजनककर्मनिवर्तकत्वादिति भावः अग्रमर्थेस
द्विविधायोक्तं तत उत्तरदेशेन ततः कर्मनाश इति तेन कर्मणो वेति कपालद्वयविभागजनककर्मणो वेत्यर्थः देशांतरविभागः कपालाकाशविभागः आरम्भकेत्यादि आरम्भकसंयो
गः कपालद्वयसंयोगादिः तत्प्रतिद्वंद्वी तद्विरोधी तन्नाशक इति यावत् एवमग्रेपि आरम्भकसंयोगः कपालाकाशसंयोगादिः अन्यथेति आरम्भकसंयोगप्रतिद्वंद्विविभागजन
ककर्मणो नारम्भकसंयोगप्रतिद्वंद्विविभागकर्मणश्चैक्ये इत्यर्थः विकसदिति तत्रानावच्छेदेनानारम्भकसंयोगप्रतिद्वंद्विविभागजनककर्मणः सत्त्वात्तेन कर्मणा कमलावच्छिन्नारंभ
कसंयोगविरोधिविभागोत्पत्तिस्तेन चारंभकसंयोगनाशस्तेन कमलनाशः स्यादिति भावः कारणविभागेनैव कारणमात्रविभागेनैव कपालद्वयविभागादिनेति यावत् पूर्वम् द्र
व्यारम्भकद्रव्यनाशात्पूर्वम् तथा च पूर्वोक्तं ततो घटनाशस्ततः कपालस्याकाशविभागो जन्यत इत्यसंगतमिति भावः सति द्रव्ये द्रव्यनाशं विना देशांतरविभागासम्भवादिति ५०

संयोगज्य कुर्यः=

कार्यतावच्छेदकावच्छि
न्नयत्किंचिद्व्यक्त्यधि
करणीभूतयावद्व्यक्ति
तर्गततया=८ शरीर
तरुसंयोगे=१

विकसत्कमले=२

हस्ततरुसंयोगनाशस्य शरीरतरुसंयोगनाशकत्वादेवं=६ संयोगविभागयोरनपेक्षकारणं कर्मेति सूत्रे कृतस्य कर्मलक्षणस्य=२ विभक्तप्रत्ययः=३ शरीरे=४ शरीरतरुसंयोगनाशोपपत्तेः=६

50 A

अन्यथा कारणमात्रविभागे कर्मलक्षणस्यातिव्याप्त्यापत्तेरिति भावः वस्तुतः कर्मलक्षणस्यात्र नातिव्याप्तिः तस्य कारणकपाल न अक्रियायां स प्रपंचं प्रदर्शितोऽस्माभिः द्वितीय इति कारणा
कारणविभागजन्य इत्यर्थः यावद्रव्यवृत्तिकर्मनियतत्वादिति क्रियाया व्याप्यवृत्तित्वनियमादिति भावः अत एव वक्ष्यमाणयुक्तेरेव शरीरे विभक्तप्रत्ययो न स्यादिति यत्र हस्तक्रि
यया हस्ततरुविभागस्तत्र शरीरे विभागप्रत्ययः सर्वानुभवसिद्धः स च विभागं विना नोपपद्यते न च शरीरसंयोगनाश एव तद्विषय इति वाच्यम् विभागानंगीकारे शरीरतरुसंयोगनाश विभक्तप्रत्ययः=३
शरीरतरुसंयोगनाशे=४ स्यैवासम्भवात् नहि तत्र हस्तक्रियया शरीरतरुसंयोगनाशः कर्मव्यधिकरणत्वात् तस्मात्तत्र हस्ततरुविभागेन शरीरतरुविभागो जन्यते तेन च शरीरतरुसंयोगनाशो जन्यत इत्युपेयत इति विभा
हस्ततरुसंयोगनाश= गसिद्धिः ननु हस्ततरुसंयोगनाश एव तरुशरीरसंयोगनाशे कोऽस्तु तयोरेतदुभयसामानाधिकरण्यसत्त्वात् मास्तु विभागजविभागो हस्ततरुविभागस्तु कर्मजन्यः शरीरतरुसंयोगनाशक
शरीरतरुसंयोगनाश= तया सिद्ध इतीयत्यपि तरण्वापास्तम् हस्ततरुसंयोगनाशेनैव तदुपपत्तेः किंच हस्तक्रियैव स्वसमवायिसमवेतत्वसंबंधेन शरीरनिष्ठशरीरतरुसंयोगनाशे हेतुरस्तु वैयधिकरण्याभावा स्वशरीरेन हस्तक्रिया= तत्समवायिशरीर= तस्मिन्समवेता क्रिया= समवायसंबंधेन=
दिति चेन्न आश्रयनाशान्यगुणनाशस्य विरोधिगुणजन्यत्वनियमेन शरीरकर्मजन्यशरीरतरुसंयोगं प्रति हस्ततरुसंयोगस्याकारणत्वेन च शरीरतरुसंयोगनाशे हस्ततरुसंयोगना
शरीरतरुसंयोगनाशे= शस्यातन्नकत्वात् यच्चोक्तं हस्तक्रियैव स्वसमवायिसमवेतत्वसंबंधेन तत्र कारणमिति तदपि न साक्षात्संबंधेन नाशकत्वनियमस्यासति बाधके संकोचकल्पनानुपपत्तेः वस्तुतस्तु संयोग
भावो विभागो वा भिन्नो भवतु वा संयोगरूपस्तत्र विनिगमनाविरहेणोभयोरप्यतिरिक्तत्वम् अत एव घटात्पटो विभक्त इति प्रत्यय उपपद्यते संयोगनाशात्मकत्वेनाशस्य सावधिकत्वाभावे
घटात्पटो विभक्त इति= न तथा प्रत्ययानुपपत्तेरिति तदिदमभिप्रेत्योक्तं मतः संयोगेत्यादि ॥ इति विभागग्रंथः ॥ मूले मूर्त एव तु दैशिकमिति विभुद्रव्ये विप्रकृष्टदेशमात्रवृत्तित्वसन्निकृष्टदेशमात्रवृत्तित्वबुद्धेर्नि
मित्तकारणस्य दिक्संयोगस्यासमवायिकारणस्य चाभावादिति भावः दैशिकपरत्वस्य निमित्तकारणमाह बहुतरेति बहुतरसंयोगांतरितत्वं तद्विषयिण्यपेक्षाबुद्धिर्दैशिकपरत्वं
प्रति निमित्तकारणमित्यर्थः तदल्पीयस्त्वेति अल्पसंयोगांतरितत्वरूपसन्निकृष्टत्वविषयिण्यपेक्षाबुद्धिर्दैशिकापरत्वं प्रति निमित्तकारणमित्यर्थः कालिकपरत्वापरत्वे जन्यएवेत्यत्र
न्यपरं सन्नम्यतम् नित्येतन्नर्वैत्यन्वत्वरूपज्येष्ठत्वबुद्धेर्नन्तरोत्पन्नत्वकनिष्ठबुद्धेर्निमित्तकारणस्य कालसंयोगरूपासमवायिकारणस्य चाभावादिति भावः मूले पेक्षाबुद्धिनाशेर
परत्वापरत्व= नेति स्वनिमित्तकारणविप्रकृष्टत्वादिबुद्धिनाशेनेत्यर्थः नव्यास्तु न बहुतरसंयोगांतरितत्वरूपविप्रकृष्टत्वाल्पतरसंयोगांतरितत्वरूपसन्निकृष्टत्वाभ्यां दैशिकपरत्वादिव्यवहारः
बहुतरस्पंदांतरितजन्यत्वरूपज्येष्ठत्वाल्पतरस्पंदांतरितजन्यत्वरूपकनिष्ठत्वाभ्यां च कालिकपरत्वादिव्यवहारस्योपपत्तेर्न तयोर्गुणांतरत्वं यत्र च यत्कालेऽस्य ज्येष्ठत्वबुद्धिरुत्पद्यते तेन त परत्वापरत्वयोः=
त्कालमादाय स्पंदस्य न्यूनाधिकता वसेया अतो न कनिष्ठेऽधिकजीविनि परत्वव्यवहारापत्तिरिति वदंति ॥ इति परत्वापरत्वग्रंथः ॥ तदभाववतीति इदं च प्रमायामतिव्याप्तिवारणाय त
दभाववद्विशेष्यकतदभावप्रकारकप्रमायामतिव्याप्तिवारणाय तत्प्रकारकमिति इच्छायामतिव्याप्तिवारणाय ज्ञानमिति तदभावाप्रकारकमिति संशयातिव्याप्तिवारणाय अत्र
भूतले= तद्विशेष्यकत्वावच्छिन्नतदभावप्रकारकताशून्यतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वं ज्ञानत्वं तत्र निश्चयत्वमवसेयं न तु यथाश्रुतं महानसं वह्निमत्तत्र पर्वतो वह्निमानित्यस्या

घटाभावः= भूतलः= घटत्वः= घटनिष्ठपर्वतं=९

51
न्या॰मु॰टी॰
५२

पर्वते वह्निनिश्चयत्वानापत्तेः ज्ञानपदं चेच्छायामतिव्याप्तिवारणाय एकधर्मिकेति ह्रदपर्वतौ वह्नितदभाववन्तौ वेति ज्ञाने नातिव्याप्तिवारणायैकधर्मिकेति एकधर्मितावच्छेदविशिष्टविशेष्य
कत्वावच्छिन्नेत्यर्थः तेन पर्वतो वह्निमान् ह्रदश्च वह्न्यभाववानिति ज्ञानव्युदासः द्रव्यः संयोगवांस्तदभाववांश्चेति समुच्चयवारणाय विरुद्धेति विरोधावगाहित्वं तदर्थः घटो द्रव्यं पृथिवी चेति
ज्ञानवारणाय भावाभावेति इच्छाव्युदासार्थं विशेष्यभागः वस्तुतस्तु एकधर्मावच्छिन्नत्वमेव शेषे विभिन्नरूपेणैकधर्मितावच्छेदकक ज्ञानस्य संशयत्वापत्तिः एकधर्मावच्छिन्नविशेष्यता
तावच्छेदकताकत्वनिवेशे च निरवच्छिन्नविशेष्यतावच्छेदकताकसंशयाप्रसंगः विभिन्नरूपेण धर्मितावच्छेदकतावच्छेदकावगाहिज्ञानस्य संशयत्वप्रसंगश्चेति स्वीयैककोटिप्रका
रतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतापरकोटिप्रकारताशालिज्ञानत्वं संशयत्वमिति ध्येयम् यत्तु संशयत्वं जातिविशेष इति तन्न चाक्षुषत्वादिना संकरप्रसं
गात् संदिग्ध इति क्रियापदं संदेहवान्भवतीत्यर्थः एवमग्रेऽपि समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरित्यादिसूत्रे विप्रतिपत्तिवाक्यजन्यशाब्दसंशयस्योक्तत्वात्साधारणधर्मासाधारण
धर्मज्ञानजन्यसंशय वह्निप्रतिवाक्यजन्यस्तृतीयोऽपि संशय इति मतं निरासायाह विप्रतिपत्तिस्त्विति व्याप्तिज्ञानादीनामित्यादिना निर्देशवाक्यार्थज्ञानपरिग्रहः ननु तर्हि सूत्र
स्य पंचम्यनुपपत्तिरित्यत आह किं त्विति तथा च सूत्रस्य पंचमी प्रयोजकतायामिति भावः एवं ज्ञानप्रामाण्यसंशयाद्विषयसंशय इत्यत्र प्रामाण्यपदमप्रामाण्यस्याप्युपलक्षकं ते
न प्रामाण्यसंशयस्याप्रामाण्यसंशयस्य च विषयसंदेहे स्वातंत्र्येण हेतुत्वमिति भावः एवं व्याप्येति अयं व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे किं मानं कोटिस्मरणादितः एव तत्सं
भवात्किंचित्तदनुविधानस्य तु व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यस्य गृहीतत्वेन तत्स्मरणेनैवोपक्षीणत्वान्न दग्धेहेतु व्याप्यसंशयाद्व्यापकसंशयस्याप्यभावादित्येव ह्याहुः महा
नसे हुताशनो न जलह्रद इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां हुताशनसंशयभावाभावदर्शनात्तस्यापि तस्यापि तद्धेतुत्वम् अत एवोत्कटकोटिक
व्याप्यसंशयाद्व्यापकस्याप्युत्कटकोटिकः संशयः कारणोत्कर्षेणैव कार्योत्कर्षात् न चैतद्भगवत्सूत्रकृदनभिमतमिति वाच्यम् सूत्रस्य चकारस्यानुक्तसमुच्चायकत्वात् तथाहि
समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति सूत्रं तस्य चार्थमाहुर्भाष्यकृत्प्रमुखाः समानधर्मः कोटिद्वयसहचरितधर्मः
अनेकस्मात्सपक्षविपक्षाद्व्यावृत्तो धर्मोऽनेकधर्मस्तयोरुपपत्तिर्ज्ञानं तस्माद्विप्रतिपत्तिर्विरुद्धकोटिप्रतिपादकं वाक्यं तस्मात्सूत्रे पंचम्याः प्रयोजकत्वमर्थो न हेतुत्वम् उपलब्धिः प्रामाण्य
मनुपलब्धिः अप्रामाण्यविरोधि भ्रमत्वं तयोरव्यवस्था संशयः एवं च प्रामाण्यसंशयजन्यो भ्रमत्वसंशयजन्यो विषयसंशय चकाराद्व्याप्यसंदेहादिजन्यव्यापकसंदेहादेः संग्राहकः
विशेषापेक्षो विमर्श इति तु लक्षणम् एकधर्मिकभावाभावप्रकारकत्वरूपविशेषवान्विमर्शो ज्ञानमिति तदर्थः इत्यादिकमित्यादिना साधनाव्यापकव्याप्यत्वसंदेहादितः साधना
व्यापकत्वसंदेहो बोध्यः साधारणज्ञानादेः कार्यतावच्छेदके चाव्यवस्थितोत्तरत्वं देयम् तेन परस्परं न व्यभिचारः ननु साधारणज्ञानादेरिव धर्मिज्ञानस्यापि संशयहेतुत्वात्तत्कृतः संशय
विभागः कथं न प्रदर्शित इत्यत आह संशये धर्मिज्ञानमिति संशये संशयमात्रे तथा च धर्मिज्ञानजन्यतावच्छेदकस्य संशयत्वसमव्याप्यत्वात्तत् द्विभाजकतावच्छेदकतेति भावः

व्याप्यसंशयात्पक्षा हिधानस्य=

चाक्षुषत्वानं ताभाव समानाधिकरणसंश यत्वशब्दजसंशये सं शयत्वान्तताभावसमा नाधिकरणी चाक्षुष त्वपदवाच्यत्वे तथा रेकत्र समावेशाश्र त्वषसंशये=५=

कोटिद्वयस्मरणाग्रे=

व्याप्यसंशयस्यापि= व्यापकसंशयहेतुत्वह=

सूत्रार्थः=३

धर्मिज्ञान=

५२

साधारणज्ञानाव्यवहितोत्तरसंशयं प्रति साधारणज्ञानं कारणं=
विधर्मज्ञानाव्यवहितोत्तरसंशयं प्रति विधर्मज्ञानं कारणं इति=२

धर्मिज्ञानस्य=१

51

वः ननु धर्मिज्ञानस्य संशयहेतुत्वे मानाभावः न च धर्मिज्ञानमंतरेण संशयः स्यादिति वाच्यम् सति धर्मीन्द्रियसन्निकर्षे इष्टत्वात् तत्राह धर्मीन्द्रियेति ३ सं यः पित्तादीत्यादिना माण्डूकवा
सांजुनादेः परिग्रहः अनुमानसिद्धत्वमेव दर्शयति यथेति भगवज्ज्ञाने व्यभिचारवारणाय पक्षे तेनेति अर्थांतरं निराकुरुते न चेति ननु पित्तात्मकदोषाभावः स्वेत्यप्रमायामेव कारणं न
शंखप्रमायामतस्त्राह विनिगमनाविरहादिति प्रमायां दोषाभावः कारणं गुणो वा कारणमित्यत्र विनिगमनाविरहादिति भावः वस्तुतो गुणहेतुतायामेव लाघवं विनिगमकमस्तीत्याह
गुण=५ अनंतेति व्याप्यत्वादिति अनुमानगुणत्वस्याग्रे वक्ष्यमाणत्वात् तद्धेतुत्वमतो यं दोष इति भावः तथा च दोषाभावानां हेतुत्वस्यावश्यकत्वेच गुणस्यापीति तथा च पित्तादिदोषा
भावसत्त्वेपि विशेषणवद्विशेष्यसन्निकर्षरूपगुणाभावात् शंखे पीतभ्रमेति दोषाभावेन न गुणस्यान्यथासिद्धिरिति भावः एवम् एवं सति अन्वयव्यतिरेकसत्त्वेपि यद्यन्यथासिद्धत्वं
तदेत्यर्थः गुणाभावः गुणाभाव एव न तु दोषः कारणं स्यादिति भावः एवमग्रेपीति उपमितौ शक्यसादृश्यज्ञानं शाब्दबोधे योग्यतायास्तात्पर्यस्य वा प्रमैव गुण इति भावः। इति प्रमा
जनकोदोषः प्रमाजनको गुणः। ननु चैवं रङ्गे रजतयोरिमे रजतरंगे इति ज्ञाने तिव्याप्तिरतस्त्राह तद्विशेष्यकत्वे सतीति तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानमित्यर्थः सन्नि
समप्याप्तवच्छेदकार्थकत्वात् तत्प्रकारकभ्रमेतिव्याप्तिवारणाय तद्विशेष्यकेति रजतएव द्रव्यमिति ज्ञाने रजतत्वप्रमात्वापत्तिरतस्तत्प्रकारकेति ज्ञानपदं च तथाविधेच्छायामतिव्याप्तिवारण तद्वद्विशेष्यकतत्प्रकारक=
इत्येकपि संयोगज्ञाने= य। इति प्रमा। एवं सति तत्प्रकारकत्वस्य प्रमात्वघटकत्वे सति भ्रमः प्रमा च स्यादिति लक्षणद्वयस्य तत्त्वसत्त्वादिति भावः ननु चैवं लक्षणाननुगमः स्यात् तत्राह लक्ष्यस्येति अयपाकरक्ते घटे
ज्ञानत्वस्य= श्यामरूपवत्ताप्रतीतेः प्रमात्वं स्यादिति चेदिष्टमेवैतत् घुद्दस्यकराचिच्छामत्वाहर्तमानत्वस्य प्रमात्वाघटकत्वात् अत्र यद्यपि स्मृत्यन्यज्ञानत्वरूपानुभवत्वस्य निवेशे वैयर्थ्यात् ज्ञानत्व
घटितमेव प्रमालक्षणं वक्तुं तथापि तस्य स्मृतिसाधारणतया तत्करणस्य प्रमाणांतरतापत्त्या शास्त्रे प्रमाणव्यवहारोपयिकरूपमनुभवत्वघटितमेवानुमन्यंते तांत्रिकाः वस्तुतस्तु विशिष्टवैशिष्ट
विशेषणतावच्छेदकप्रकारकनिश्चय= यानुभवे विशेषणतावच्छेदकप्रकारकनिर्णयस्य कारणतया तज्जन्यतावच्छेदककोटिप्रविष्टतयानुभवत्वस्य जातिविशेषत्वसिद्धेः ज्ञानत्वस्यानुभवत्वाघटकत्वात् अनुभवत्वस्य वैयर्थ्यमिति
हृतं पल्लवितेन। इति निर्विकल्पकम्। प्रामाण्यं न स्वतो ग्राह्यमिति मतेन स्वतो ग्राह्यत्वं निषिध्यते तत्र स्वतस्त्ववादिनः कस्त्याकांक्षायामाह मीमांसकेति स्वप्रकाशकत्वादिति स्वविष
यकत्वादित्यर्थः तेनैव गृह्यत इति ज्ञाने गृह्यमाणे तन्निष्ठज्ञानत्वादिधर्मवत् तन्निष्ठप्रामाण्यस्यापि ग्रहे बाधकाभावात् तन्मते सर्वं ज्ञानमयं घटो घटमहं जानामीत्याद्याकारकमिति भावः
तथा चेति अयमत्रानुमानप्रकारः इदं ज्ञानं तत्ताप्रविशेष्यकपरत्वप्रकारकज्ञानजन्यां घटत्वप्रकारकज्ञानतात्वात् यायद्गतिर्यत्प्रकारिका ज्ञानता तामा तद्विशेष्यकतत्प्रकारकज्ञानसा
ध्या यथा पटे परत्वप्रकारिके ज्ञानतेति अनुव्यवसायेनेति ननु ज्ञानज्ञानस्य विषयाविषयकत्वात् कथं विषयघटितप्रामाण्यं तस्य विषयः स्यात् तो ज्ञानज्ञानस्य विषयविषयत्वे प्रमाणमाह विषयनि
विषय* रूप्यमिति विषयाविषयकप्रत्यक्षाविषयत्यर्थः ज्ञानविन्निवेद्यौ इति विषयविषयतानियतस्वविषयताकप्रत्यक्षकं ज्ञानमित्यर्थः अतो न साध्यहेत्वोर्वैयधिकरण्यम् तथा च ज्ञानं
विषयविषयतानियतस्वविषयताकप्रत्यक्षकं विषयाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयत्वादित्यनुमानं ज्ञानप्रत्यक्षस्य विषयविषयकत्वे प्रमाणमिति भावः भट्टमते च प्रत्य

ज्ञानं विषयविषयतानियतस्वविषयताकज्ञाततालिंगकानुमितिकं विषयाविषयकज्ञाततालिंगकानुमित्यविषयत्वे सति ज्ञातता लिंगकानुमितिविषयत्वात्=१

रजताद्दौ प्रवृत्त्युपयुक्तस्य पुरुषस्य=४

ह्यस्यानाभिषिक्तज्ञाततालिंगकानुमितिरेव बोध्येत्यन्यत्र विस्तरः अनभ्यासदशापन्नेति अनवधृतप्रामाण्यसजातीयेत्यर्थः ज्ञातमेव निश्चितमेव गंधवतीति व्याप्यवतिव्यापकप्रकारकत्व
स्यव्यापकवति व्यापकप्रकारकत्वव्याप्यत्वादिति भावः ननु कथं तर्हि प्रामाण्यस्यानुमेयता गंधवति पृथिवीत्वप्रकारकत्वस्यैव पृथिवीत्वादिमति पृथिवीत्वप्रकारकत्वादेरपि प्रत्यक्षसं भावा+
भवादत आह तत्प्रकारकत्वेति संशयानुरोधादिति यद्यपि ज्ञाने प्रामाण्यनिश्चयो धर्मितावच्छेदकसामानाधिकरण्येन नापद्यते संदेहस्तु धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्यं
अगृहीत्वा धर्मितावच्छेदकावच्छेदेन प्रामाण्यं गृह्णातीति कथं संशयानुपपत्तिस्तथापि प्रवृत्त्युपयुक्तस्य धर्मितावच्छेदकावच्छेदेन प्रामाण्यग्रहस्य स्वतस्त्वे संशयानुपपत्तिर्दूषणमिति ध्येयम्
अनुमानादि=५ न च प्रामाण्यग्राहकसामग्रीसत्त्वात्कथमग्रिमसंशयानुरोधेन प्रामाण्याग्रह इति वाच्यम् तत्राग्रिमसंशयानुरोधेन संशयजनकदोषस्य प्रामाण्यनिश्चयप्रतिबंधकत्वकल्पनादिति
शयात् ननु यदि प्रामाण्यमनुमेयं तदा प्रामाण्यग्रहवैयर्थ्यम् तथाहि अयं पुरुष इति निश्चये प्रामाण्यसंदेहे नार्थसंदेहस्यायं पुरुषो न वेत्याकारकस्योत्पत्त्या पुरुषार्थिनः प्रवृत्ति
प्रामाण्य= र्न संभवति तत्र प्रामाण्यनिश्चये च न तत्संशयाधीनोऽर्थसंदेह इति प्रामाण्यग्रहस्य प्रवृत्तावुपयोगः प्रामाण्यग्रहस्यानुमित्यात्मकत्वे च प्रामाण्यानुमापककरादिमति पुरुषत्वप्रकार
कत्वादिरूपहेतुग्रहे तु स्वघटकतया पुरोवर्तिनि पुरुषत्वव्याप्यकरादिग्रहस्यावश्यकतया तेनैवायं पुरुषो न वेति संदेहप्रतिबंधसंभवादलं प्रामाण्यानुमानेनेति चेन्न करादौ पुरुषत्वव्या पुरोवर्तिनि पुरुषत्वव्याप्यकरादिग्रहेणैव=
प्यत्वग्रहं विनापि करादिमति पुरुषत्वप्रकारकत्वहेतोः पुरुषत्वघटितप्रामाण्यव्याप्यत्वग्रहसंभवेन प्रामाण्यानुमानसंभवात् एवं न्यायमतेनानुमिते शिवहितीयानुव्यवसायस्या
पि प्रामाण्यग्रहत्वमित्यन्यत्र विस्तरः गुरुः शंकते नन्विति व्यर्थमिति व्यवसायाः अन्यथाख्यातेरभावादिति भावः भ्रमजन्येति न्यायनये भ्रमजन्या प्रवृत्तिस्तन्मतेन स्यादित्य मीमांसकमते=
र्थः भ्रमस्य अन्यथाख्यातेः तत्र रंगगोचरविसंवादिरजतार्थिप्रवृत्तौ रजते इदं रजतमिति ज्ञानकाले रजतभेदाग्रहसत्त्वादिसत्त्वादिप्रवृत्त्यापत्तिवारणाय दोषाधीनस्येत्युक्त
म् न्यायनये दोषाधीनरजतभ्रमत्तस्यानाभिषिक्तरजतभेदाग्रहस्यैव तन्मते दोषाधीनतया रजते रजतभेदाग्रहस्य दोषानधीनत्वादिति भावः यत्र रंगगोचरं रजतवद्भूतलमिति
रजतभेदाग्रहकृतत्व=रजतवद्भूतलभेदाग्रहस्य तत्कारणत्वात्=६ ज्ञानं तत्र विसंवादिज्ञानदशाप्रवृत्तिवारणाय स्वतंत्रोपस्थितेति रजतविशेषणं अख्यविशेष्यतयोपस्थितत्वं तदर्थः वस्तुतो रंगगोचररजतवद्भूतलमिति ज्ञानादपि प्रवृत्तिरिष्टैवेति स्वतंत्रो स्वतंत्रोपस्थितत्वस्यार्थः=६
पस्थितत्वं न देयमिति ध्येयम् हेतुत्वादिति न्यायनयेपीदं रजतमिति भ्रमहेतुतया रजतभेदाग्रहस्य तत्रावश्यकतया तस्यैव हेतुत्वं युक्तं तद्धेतोरिति न्यायादिति भावः कार्यकारण तद्धेतोः तद्धेतुत्वनियमात् भ्रमहेतोः रजतभेदाग्रहस्य प्रवृत्तिहेतुत्वात्=५
भावद्वयकल्पनापेक्षया लाघवादाह अस्त्विति तत्रापि सत्यरजतगोचरप्रवृत्तावपि अपि ना रंगगोचरप्रवृत्तिपरिग्रहः रजतभेदाग्रहः रजतभेदासंसर्गाग्रहाभावः यथाश्रुते
न्यथा+ रजते नेदं रजतमिति ग्रहेऽपि प्रवृत्त्यापत्तेः प्राभाकरमते तत्र रजतभेदग्रहाभावस्य सत्त्वादन्यथाख्यात्यापत्तेरिति यद्यपि पुरोवर्तिविशेष्यकस्य रजतभेदासंसर्गग्रहस्य समवाये
नाभावो विशेषणतया त्वात्मनिष्ठः प्रतिबंधकस्तदभावः कारणमिति फलितं तथा च रंगे नेदं रजतमिति ग्रहेऽपि प्रवृत्त्यापत्तिः रंगविशेष्यकरजतभेदासंसर्गग्रहस्यान्यथाख्यात्यनं
गीकर्तृमतेऽप्रसिद्धत्वेन तदभावस्य प्रतिबंधकत्वासंभवात्तथापि विषयतासंबंधेन प्रवृत्तिप्रति रजतभेदासंसर्गग्रहस्य विशेष्यतासंबंधावच्छिन्नप्रतियोगिताको योऽभावः सवि

रजतभेदाग्रहस्यैव=५

59A

भेद+

शेषणतासंबंधेनप्रवृत्तिंप्रतिप्रतिबंधकइतिविषयनिष्ठतयाप्रतिबध्यप्रतिबंधककल्पनान्नोक्तदोषः एवंचतत्पुरुषीयत्वंप्रतिबध्यप्रतिबंधकतयोरवच्छेदककोटौनिवेशनीयमतोनपुरुषान्तरा
यदोषः नचैवंरंगेइदंरजतंइतिभ्रमानंतरंतत्रप्रवृत्तिर्नस्यात् रजतभेदासंसर्गाग्रहस्यान्यथाख्यात्यापत्त्यातत्र(मीमां)नंगीकारेणतदभावरूपस्यप्रतिबंधकस्यसत्वादितिवाच्यम् रजतभेदोप
स्थितिविशिष्टस्यैवरजतभेदासंसर्गाग्रहाभावस्यप्रतिबंधकत्वोपगमात् नचैवमपिरंगेइदंरजतंघटोनरजतमितिज्ञानानंतरमप्रवृत्त्यापत्तिरितिवाच्यम् रजतभेदग्रहप्रतिबंधकदोषस्योत्तेज
कत्वकल्पनात्तत्ररंगेरजतभेदग्रहानुत्पत्त्यातत्प्रतिबंधकदोषस्यस्वीकरणीयत्वात् नचरंगेरजतभ्रमजनकदोषएवोत्तेजकोस्तु किंरजतभेदग्रहप्रतिबंधकदोषस्योत्तेजकत्वस्वीकारेण ए
वंचरजतभेदोपस्थितिर्वैशिष्ट्यमपिप्रतिबंधकेविशेषणंनदेयम् रजतभेदानुपस्थितिकालेरंगेइदंरजतमितिज्ञानात्प्रवृत्तिप्रसंगाभावात्तत्ररजतभेदासंसर्गाग्रहस्यप्रतिबंधकस्यरं
गेरजतभ्रमजनकदोषरूपोत्तेजकविशिष्टत्वादितिवाच्यम् रंगेइदंरजतमितिभ्रमस्यन्यायमतसिद्धस्य(मीमां)तन्मतेऽभावेनतत्रतादृशदोषस्यानंगीकारात् संभवतीत्यनंतरंयेनविसंवादिप्र — रजतभ्रमजनकदोषस्य=
अन्यथाख्याति= — वृत्तौतद्धेतुत्वंस्यादितिशरणीयम् संनिकर्षस्याभावादिति ज्ञानलक्षणायाःप्रत्यासत्यंतरस्यकल्पनंगौरवदोषदुष्टमित्यभिमानः हेतुताघटकस्यान्वयव्यतिरेकाभ्यामितिशेषः
अन्यथापि रंगगोचररजतार्थिप्रवृत्तावपि नतत्कल्पनात् विशिष्टज्ञानहेतुत्वस्यकल्पनात् नचात्रमानाभावइतिवाच्यम् रंगेरजतार्थिप्रवृत्तिर्विषयविशिष्टज्ञानसाध्याप्रवृत्तित्वाद्यन्तेरजतप्र — रंगगोचररजतार्थिप्रवृत्तिंप्रतिविशिष्टज्ञानंहेतुरित्यत्र=८
अनुमाने= — कप्रवृत्तिवदित्यनुमानस्यैवमानत्वात् अत्राप्रयोजकत्वमाशंकते नचेति लाघवेनेति संवादिविसंवादिभेदेनकार्यकारणभावद्वयमपेक्ष्यप्रवृत्तिमात्रेविशिष्टज्ञानस्यैकहेतुत्वकल्पनाल्ला
अनुमानस्येतिशेषः= — घवेनेत्यर्थः तथाचलाघवज्ञानरूपानुकूलतर्कसत्वान्नाप्रयोजकत्वमितिभावः रजतांशेसन्निकर्षाभावान्नान्यथाख्यातिःसम्भवतीतिप्राभाकरोक्तंदूषणमुद्धरति इत्थंचेति प्रवृत्तिमात्रेवि
३३ शिष्टबुद्धेर्हेतुत्वेचेत्यर्थः फलमुखेति कार्यकारणभावग्रहात्मकफलात्सर्वंगौरवस्यानिर्णयात्कौरवसंदेहस्यचाप्रतिबंधकत्वादितिभावः नचसंवादिविसंवादिप्रवृत्तिसाधारणप्रवृत्तित्वाव
च्छिन्नंप्रत्येवभेदाग्रहःकारणमितिनकार्यकारणभावद्वयकल्पनागौरवम् नचविशिष्टज्ञानत्वापेक्षयाइष्टभेदग्रहाभावत्वस्यकारणतावच्छेदकत्वेगौरवमितिवाच्यम् रजतविशिष्टानुमि
अनुमित्यादौ= — त्यादौरजतभेदाग्रहत्वेनकारणत्वेतत्रैवप्रवृत्तिसाधारणरजतत्वविशिष्टविषयकत्वस्यैवकार्यतावच्छेदकत्वकल्पनेनैवनिर्वाहात् न्यायनयेतप्रवृत्तित्वावच्छिन्नंप्रतिविशिष्टज्ञानहेतुत्वेनहेतु
प्रवृत्तित्वावच्छिन्नंप्रतिविशिष्टज्ञानंहेतुरितिकार्यकारणभाव= — त्वांतरकल्पनेगौरवमितिनतदनुरोधेनकल्पनीयभ्रमात्मकरजतज्ञानार्थंज्ञानलक्षणाप्रत्यासत्त्यादरइतिकारणबाधाद्बाधितमेवमिथ्याज्ञानमित्याशंकांमनसिनिधायस्वस्वविशेषकारण — ज्ञानलक्षणाप्रत्यासत्तिरूप=
बाधाभावादनिवार्यमेव मिथ्याज्ञानमित्याह किंचेत्यादिना यत्ररजतेनरजतभेदग्रहोनवारंगेरजतभेदग्रहस्तत्रसतियुगपदिंद्रियसन्निकर्षेरंगरजतयोरिमेरजतइतिज्ञानेनकिमपिबाधकंरजत
रंगरजतयोरिमेरजतेइतिज्ञाने= — (रजत) (रजतत्व) त्वेनसमंसंयुक्तसमवायस्यसत्वात् तादृशंचज्ञानंरंगांशेनप्रमात्मकंविशेषणविशेष्यसन्निकर्षरूपसामग्र्यभावात् किंचान्यथाख्यातिरेवेतिभावः ननुतत्तद्विशेष्यतत्तद्विशिष्टबुद्धिंप्रति
तत्तद्विशेषणेतत्तद्विशेष्यघटितसन्निकर्षोहेतुरन्यथातिप्रसंगात् तथाचकथंरजतघटितसंयुक्तसमवायेनरंगेरजतत्वग्रहउत्पन्नः आह अपिचेति अन्यथाख्यातिभयादित्यनंतरंरंगेरज
तभेदाग्रहस्यरजतेरजतभेदाग्रहस्येतिद्वित्वस्यसत्वादित्यनेनान्वयः अनेनरंगेतिष्टभेदाग्रहरूपानिवृत्तिसामग्रीरजतेइष्टभेदाग्रहरूपाप्रवृत्तिसामग्रीप्रदर्शिता रंगेरजतभेदाग्रहस्येत्या

संनिकर्षस्याहेतुत्वे=२
सन्निकर्षाभावेपिविशिष्टज्ञानंस्यात्=२=२

प्रवृत्तिः स्यादिति भावः=३

53 न्या॰मु॰टी॰ दि॰ प॰

रिनाच रंगे रजतभेदाग्रहरूपा प्रवृत्तिसामग्री रजते निष्टभेदाग्रहरूपा निवृत्तिसामग्री च प्रदर्शिता दोषादेवेति मीमां॰ तन्मते न्यायमतभ्रमस्य लाभिषिक्तदोषस्य हेतुत्वादिति भावः इदं चेष्टभेदाग्रहः प्र
वृत्तिकारणमनिष्टभेदाग्रहो निवृत्तिकारणमिति यथाश्रुताभिप्रायेण इष्टभेदोपस्थितिविशिष्टेष्टभेदाग्रहः प्रतिबंधकस्त्वभावः कारणमिति दर्शितं तन्निष्कर्षे तु रजतभेदोपस्थितिविशिष्ट
रजतभेदासंसर्गग्रहस्य प्रतिबंधकस्य रंगे भावादिति रीत्या सामग्री बोध्या ननु रंगे रजतभेदाग्रहप्रयोजकदोषस्य प्रतिबंधकत्वान्न रंगे निवृत्तिरेवं रजते रजतभेदासंसर्गाग्रहप्रयोजकदोषस्य
ग्राह+ प्रतिबंधकत्वान्न रजते प्रवृत्तिरिति कथं युगपत्प्रवृत्तिनिवृत्त्योरापादनमित्यत आह किं चेति भेदाग्रहस्य व्याप्यवदभेदाग्रहस्य अनुमितिर्निर्बाधेति सति बाधाभावे न्यथाख्यातिरूपानु
मितिर्निर्बाधेत्यर्थः आपतितुमिति अन्यथाख्यातिरूपमापतितमित्यर्थः ननु वह्निव्याप्यधूमवदभेदाग्रहान्न ह्रदो वह्निमानित्यन्यथाख्यातिरूपानुमितिः परं त्वगृहीतासंसर्ग
कज्ञानद्वयमेवात्रोत्पद्यते न च तत्र विशिष्टज्ञानोत्पत्तौ बाधकाभावो व्याप्यवदभेदाग्रहस्य ह्रदो वह्निमानित्यनुमितिकारणस्य सत्त्वादिति वाच्यम् अन्यथाख्यातौ प्रमाणाभावेन तादृशा
कार्यकारणभावस्याकल्पनादिति तत्र प्रमाणं दर्शयति इत्थं चेति यद्यानन्वनुमितिं प्रति विशिष्टज्ञानस्यैव हेतुत्वं यत्र चेन तादृशा विशिष्टबोधसामग्री तत्र लिंगासंसर्गाग्रहात्क्रिमसं
सर्गाग्रहस्यैव परैरुपगमान्नायं पिंडे वह्न्यनुमित्यनुरोधादन्यथाख्यातिरित्यत आह इत्थं चेति चकारोप्यर्थे ननु तादृशानुव्यवसायेनेदं विशेष्यकज्ञाने रजतत्वप्रकारकत्वविशिष्ट
रूपः परं तु रजतत्वप्रकारकत्वासंसर्गाग्रहरूप एवेत्यत आह संक्षेप इति विद्यमानेपि भेदग्रहे आहार्यप्रत्यक्षोत्पादादिच्छायाः जनकत्वं वाच्यम् इच्छानामनुजनकत्वानुरोधेन चानुमिति
त्वादीनामेव कार्यतावच्छेदकत्वात्प्रवृत्तित्वावच्छिन्नं प्रति भेदग्रहाभावत्वेन पृथक्कारणत्वे गौरवापत्त्या विशिष्टज्ञानत्वेनैव तत्र हेतुता कल्पनीयेति विसंवादिप्रवृत्त्यनुरोधेनान्यथाख्यातिर्दुर्वारैवे
प्रा+ तिभावः ॥ इति प्रामाण्यम् ॥ ननु प्रामाण्यमनुमानगम्यं तदा भवेद्यद्यनुमानं प्रमाणं भवेत्तदेव न संभवति व्याप्तिग्राहकाभावेनानुमानस्य ज्ञानादित्यतः प्रामाण्यानुमितिप्रयोजकतया व्यभिचारस्याग्रहो यस्य सह
चारग्रहस्तथेति मूलेन व्याप्तिग्रहोपायो दर्शितः स चायुक्तः भूयोदर्शनस्य कारणीभूतव्याप्तिज्ञानाभावादित्यत आह एवं व्याप्तिग्रहस्येति व्यभिचाराग्रहस्य व्याप्तिग्राहकतामुपपादयति व्यभिचारग्रहस्येति १
सहचारग्रहस्य तामुपपादयति एवमिति भूयोदर्शनस्य कारणत्वं खंडयति भूयोदर्शनं चेति व्यतिरेकव्यभिचारमाह सकृद्दर्शनेपीति भूयोदर्शनस्याहेतुत्वेपि क्वचित्प्रयोजकतया तदादर
इत्याह क्वचिदिति तर्कोपेक्ष्यत इति शंकापनयनार्थं तर्कोपेक्षित इत्यर्थः तद्दर्शयति तथाहीत्यादिना यद्ययमिति अयं धूमवान्यदि तः कारणं विनेति तथा च धूमो वह्निव्यभिचारी स्याद्वह्नि
जन्यो न स्यादिति तर्काकारो बोध्यः यथा अयं वह्निमान्न स्यात् धूमवान्न स्यादिति तर्कस्य विषयपरिशोधकस्य व्याप्तिग्रहानौपयिकतया संगतेः तत्रापि तादृशतर्ककारणीभूतकार्यकारण
भावग्रहेपि आशंका भवेत् आशंकाप्रतिबंधिका भवेत् व्याघातमेव दर्शयति यदीत्यादिना ननु तर्कस्य व्याप्यापादकव्याप्ताज्ञानं कारणं तत्र व्याप्तिज्ञानप्रतिबंधकव्यभिचारशंकानिवर्तक
स्तर्कोपेक्षितः एवमग्रेपीत्यनवस्थेत्यत आह यदेति स्वत एव शंकासामग्रीविरहादेव तर्कोपेक्षेत्यनंतरमतो नानवस्थेति शेषः ननु तर्कस्य व्यभिचारशंकानिवर्तकत्वं तर्ककारणीभूतव्याप्तिज्ञानेन
नैव निवृत्तेः सम्भवादिति चेदत्र केचित् अनाहार्यशंकायास्तर्ककारणीभूतव्याप्तिज्ञानेन निरास संभवेप्याहार्यशंकायास्ततो निवृत्तिर्न संभवति आहार्यज्ञानस्य तदप्रतिबध्यत्वात् किंतु तर्केणैव त

इदं रजतमित्याकारकमेकं वह्निमानित्याकारकं द्वितीयं= अन्यथाख्यातौ= नैयायिकैः=

प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानं कारणं=

रंगे रजतत्वावद्विषमित्याकारकं=

प्रवृत्तित्वावच्छिन्ने=

व्याप्तिग्राहकता=

भूयोदर्शनस्य=

धूमो वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्याकारकं=४

न+

यत्रापादकोऽधूमः तत्रापाद्यो वह्निरित्याकारकं=३ व्याप्तिग्रहेण=१
व्याप्तिज्ञानात्=२

उद्देश्यकाभाववद्विशिष्टव्यभिचारसंशयविरहसंपादकत्वमस्तु तमेव
तर्कस्येत्याहुः परे तत्तदापादककापत्तित्वेनाहार्यानाहार्यसाधारण
तद्विशिष्टबुद्धित्वावच्छिन्नं प्रति प्रतिबंधकतया+३+

आपादज्ञानदुष्टं आपाद्यज्ञानरूपानिष्टसाधनत्वात्=१
आरोपत्वं=३
दोषेण=१

विशिष्टसत्ता यावक्ष्यां तु= अत्र द्वयोरनुमानयोर्द्रव्यत्वमुपाधिः=६

53 A

व्यभिचारशंका=२ व्याहि अनिश्चयसंजननात्मकेन तर्केणापादज्ञाने आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननद्वारापादज्ञाने दोषो जन्यते तेन चापादज्ञाने इच्छाप्रतिबंधः क्रियते एवं चेच्छारूपकारणविरहादेव नाहार्यशं
कोत्पत्तिरित्यर्थवशसंपन्नमेव तर्के तन्निवर्तकत्वमिति केचित्तु तर्कस्य शंकानिवर्तकत्वं व्याप्तिज्ञानकारणीभूतो यो व्यभिचारशंकाविरहस्तत्संपादकत्वम् एवं च व्यभिचारशंकाप्रतिबंधकतया तर्कः
स्योत्तेजकतया तर्कस्य व्यभिचारशंकानिवर्तकत्वमित्याहुः तर्कश्चाहार्यारोपविशेषः तत्त्वं च मानसत्वव्याप्यो जातिविशेषस्तर्कयामीत्यनुभवात्सिद्धा सा विशेषनिवर्तकतया वा सिद्ध इति तर्कश्च
द्विविधः विषयपरिशोधको व्याप्तिग्राहकश्चेति तत्र विषयपरिशोधको निर्वह्निः स्यान्निर्धूमः स्यादित्यादिः धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादित्यादिश्च व्याप्तिग्राहकः विस्तरस्त्वन्यत्रा
नुसंधेयः ॥ इति तर्कः ॥ इदानीं व्याप्तिग्रहोपायनिरूपणोत्तरं व्याप्तिनिश्चयाभावप्रयोजकव्यभिचारशंकाकारणज्ञानविषयत्वेनोपाधेः स्मरणोत्सति तथा च प्रसंगसंगत्योपाधिनिरूपणमिति भावः सिद्धिविषयत्वरू
अनुमाने= पसाध्यत्वस्य सिद्धिजनकत्वरूपसाधनत्वस्य च सोपाधावभावादभिमतेति यो यदवच्छिन्नव्यापकत्वे सति यदवच्छिन्नाव्यापकः स तदवच्छिन्नसाध्यकतदवच्छिन्नहेतावुपाधिरित्यर्थः यथाश्रुते भिमान साध्यत्वाभिमत व्यापकत्वे सति साधनत्वाभिमताव्यापकत्वमिति=
स्य विशेषणत्वे यत्र न तदभिन्नं तत्राव्याप्तिः स्यात् यदवच्छिन्नविवक्षणात् गुणकर्मान्यत्वविशिष्टसत्तावान् जातिमत्त्वादित्यादौ संयोगी गुणकर्मान्यत्वविशिष्टसत्त्वाना व्याप्यतिव्याप्ती व्यापक
त्वाव्यापकत्वे एकप्रकारेणैकसंबंधेन च विवक्षिते तेन द्रव्यत्वत्वेन समवायसंबंधेन च वह्निः इति व्यापकस्य द्रव्यत्वस्य वह्न्यादिना संयोगादिसंबंधेन च धूमं प्रत्यव्यापकत्वेपि वह्निमान् धूमादित्यादौ द्रव्य
त्वादौ नातिव्याप्तिः स श्याम इति काकः श्यामो मित्रातनयत्वादित्यादाविति अर्थः तेन वक्ष्यमाणे नध्वंसो विनाशी जन्यत्वादित्यनेन न पौनरुक्त्यम् अस्य साधनावच्छिन्नसाध्यव्यापकत्वादयमस्य सा शाकपाकजत्वस्य=अयमस्य भावत्वोपाधेः=
धनरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात् साध्यव्यापकत्वाभावमुपपादयति श्यामत्वस्येति ननु साधनावच्छिन्नसाध्यव्यापकत्वविवक्षणे यमतो नोक्ताव्याप्तिः पक्षधर्मावच्छिन्नसाध्य
पकोपाधावव्याप्तिमाह एवं वायुरिति अत्र प्रत्यक्षं प्रत्युद्भूतरूपस्याव्यापकत्वे रूपस्य स्फुटतरामव्यापकत्वमित्युद्भूतपदं व्यर्थं तथाप्युपाधेः साध्यव्यापकत्वे कार्यकारणभावलक्षणानुकूलतर्क
उद्भूतपदस्य= प्रदर्शनार्थं तदिति ध्येयम् पक्षधर्मावच्छिन्नसाध्यव्यापकत्वोक्तो तु सर्वोक्तः शाकपाकजत्वाव्याप्तिरिति भावः अव्याप्तिं परिहरति मित्रातनयत्वेत्यादिना व्यभिचारिणि त्वित्यादि वायुः प्रत्यक्षो
द्रव्यत्वादित्यादौ प्रत्यक्षत्वरूपसाध्याधिकरणमात्मा उद्भूतरूपात्मकोपाधिशून्यसाध्यव्यभिचाराधिकरणं गगनं तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वस्योद्भूतरूपे भावात् उक्तमुपाध्यधिकरणमि
का+ ति उद्भूतरूपाधिकरणपरमाणवांशान्यतरत्वावच्छिन्नसाध्याप्रसिद्ध्या तद्दोषतादवस्थ्यमतः साध्याधिकरणमिति उद्भूतरूपाधिकरणं यत्प्रत्यक्षत्वाधिकरणं घटादि तत्र द्रव्यत्वाद्यात्मकधर्मा
वच्छिन्नसाध्यव्यापकत्वाभावात् उक्तं यत्रेत्यादि तत्रापि साध्यव्यभिचाराधिकरणपरमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वात्मकसाधनव्यापकत्वात् उपाधिशून्यमिति तत्रैवोपाध्यधिकरणे साध्याधिकरणं घ
प्रत्यक्षत्वाधिकरणं= ट उपाधिशून्यमधिकरणमात्मा तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वाभावात्साध्यव्यभिचाराधिकरणमिति उद्भूतरूपवत्त्वाधिकरणं यत्प्रत्यक्षत्वाधिकरणं घटः यत्रोद्भूतरूपशून्यं प्रत्यक्षत्वाभावा
धिकरणमतीन्द्रियं रूपादि तदन्यतरत्वावच्छिन्नद्रव्यत्वरूपसाधनाव्यापकत्वस्योद्भूतरूपे भावात् साध्याधिकरणमिति परित्यज्य साध्यव्यभिचाराधिकरणमित्युक्तम् तदर्थश्च साधननिष्ठसाध्यव्यभिचार
निरूपकाधिकरणत्वम् अंततइति तादृशधर्मी तस्यास्तत्त्वादित्यर्थः न च साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं तथा च धूमादिसाध्यव्यापके धूमादिनिष्ठव्याप्तेः केवलधूमत्वावच्छि

साध्यव्यभिचाराधिकरणार्थश्च=२

स्वसाध्यव्यभिचारिताया:=६ पक्षेतरे=६

54 न्या॰ मु॰ टी॰ ५४

धूमत्व धूम महानस

त्वात्कथं तादृशधर्मावच्छिन्नधूमादिनिष्ठव्याप्तिनिरूपकत्वमार्द्रेन्धनत्वादीनामिति वाच्यम् तद्धर्माधिकरणीभूतसाध्याधिकरणनिष्ठाभावाप्रतियोगित्वरूपस्यैव तद्धर्मावच्छिन्नसाध्यव्यापक
त्वस्य लक्षणे प्रवेशो न तु यद्धर्मावच्छिन्नसाध्यनिष्ठव्याप्तिनिरूपकत्वस्येत्याशयात् धूमवान्वह्नेरित्यादावयःपिंडमहानसान्यतरत्वावच्छिन्नसाध्याव्यापकं व्यंजनवत्त्वादिकं संग्राह्यमेवेति ध्ये
यम् अत एव यद्धर्मावच्छिन्नत्वघटितनिरुक्तलक्षणस्य तात्पर्यविषयत्वादेव एतदनुसारेण निरुक्तलक्षणानुसारेण स्वस्य साध्यमिति षष्ठीतत्पुरुषभ्रमं व्यावर्त्तयितुमाह स्वं चेति न चास्तु

वह्निमति अयोगोलके धूमाभाव

आर्द्रेन्धनसंयोगाभावत्वेन=आर्द्रेन्धनसंयोगवदन्यत्वेन=४ पक्षेतरत्वस्य=

यदभावेन यद्वदन्यत्वेन वा साधनवति साध्याभाव उन्नीयते स उपाधिर्लाघवात् अत एव जलत्वतेजस्त्वयोस्तु उभयत्वेन रूपेण न कश्चिदप्युपाधित्वमित्याहुः तद्धर्मवति उपाधिव्यभिचारेण त
द्धर्माधिकरणीभूतं यत् साध्याभावाधिकरणं तद्वृत्तित्वेन वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि बहिर्द्रव्ये उद्भूतरूपव्यभिचारित्वादित्यादिरूपं द्रष्टव्यम् ननु पक्षेतरत्वेति
व्याप्तिः न च तस्य लक्षणत्वमेव एकाप्रदेशेषामित्यादिमूले प्रदर्शितस्य लक्षणस्यैतावच्छेदकस्य तत्राभावात् तत्रैतोपक्षेतरव्यभिचारस्य पक्षमादायैव संभवात्साध्याव्यभिचारस्य तमादाय संभ पक्षे=
वादत आह बाधानुन्नीतेति साध्यव्यापकत्वेति स्वव्याघातकत्वादिति बाधेन पक्षे साध्याभाववत्ता उन्नीतः साध्यव्यापकत्वेन निश्चित इत्यर्थः संदिग्धोपाधिरपीति पक्षे साध्यसंदेहे
न साध्यव्यापकतासंदेहस्य उपाधिमात्रस्य दूषकत्वव्याघातादित्यर्थः पक्षेतरत्वस्योपाधित्वे सर्वत्रानुमाने पक्षेतरत्वोपाधेः संभवादनुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्योपा
धेर्दूषकत्वस्यासंभवादिति भावः ननु तथापि यत्र साध्यव्यापकताग्राहकं प्रमाणमस्ति तत्र पक्षेतरत्वे लक्षणातिव्याप्तिर्दुर्वीरेत्यत आह बाधोन्नीतस्त्विति बाधेन पक्षे साध्याभाववत्ता उ
न्नीतः साध्यव्यापकत्वेन निश्चित इत्यर्थः संदिग्धोपाधिरपीति पक्षे साध्यसंदेहेन साध्यव्यापकतासंदेहस्य पक्षेतरत्वे संभवादिति भावः न च स्वव्याघातकत्वेनानुपाधित्वादेवानुद्भावन
संभवे संप्रदायमात्रेण हेतुत्वकथनमसंगतमिति वाच्यम् यत्र साध्यव्यापकताग्राहकतर्कावतारस्तत्र व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यंभावेन व्यभिचारानुमानत्वरूपस्य दूषक
त्वस्य व्याघातासंभवात् सत्प्रतिपक्षोत्थापकत्वेनोपाधेर्दूषकतावादिनां मतमाह केचित्त्विति इत्थं चेति सत्प्रतिपक्षोत्थापकतया दूषकत्वे चेत्यर्थः अत्र च सत्प्रतिपक्षोत्थापकत्व

साध्यवत्त्वाभावसाधनात्

करकेऽनुसाधीन स्वभीधत्वाभावेन=

कल्पे च पक्षावृत्तिरिति पक्षावृत्तित्वेन पक्षेतरभावेन साध्याभावसाधनादिति भावः ॥ इत्युपाधिः ॥ गुरुमते लौकिकः शाब्दोऽनुवादको वैदिक एव प्रमाणम् तन्मतनिराकरणायाह वैदिकेति
अत्र स्वर्गकामो यजेतेत्यादिपदत्वेन पक्षता तेन विशेषतः संसर्गासिद्धिरिति द्रष्टव्यम् तात्पर्यविषयेति अत्र ब्राह्मणो विद्वेत्यादौ यदाधिकरणत्वसंसर्गे तात्पर्यं तदविषयत्वादिसंसर्गेणार्थांति
रवारणाय तात्पर्यविषयत्वं संसर्गविशेषणम् तात्पर्यतानेऽन्तरपदार्थत्वेनेतरपदार्थस्य प्रवेशात् घटत्वादिनास्मृतसंसर्गो न सिद्धेरतः स्मारितेति स्मारितत्वं च वृत्त्या बोध्यम् तेन वस्तुपदा पदार्थस्य=

आकाशी=३

समवायेनाकाशत्वादिनोपस्थितेन रूपेण संसर्गसिद्धभावेऽपि न क्षतिः हेतौ चायमेति उत्तरो राज्ञः पुरुषोऽपसार्यतामित्यादौ राजपुरुषयोर्योग्यार्थयोः संसर्गे तात्पर्याभावेन साध्याभावाद्व्य संसर्गज्ञानपूर्वकत्व=
भिचारस्त्वाकांक्षाविशेषणम् तद्वेदं परमनेन स्वसाम्यकसंसर्गेण तदर्थान्वितस्वार्थबोधं जनयत्विति पदतात्पर्यार्थकं तेन नाकांक्षायास्तदंशे वैयर्थ्यप्रसंगः वह्निना सिंचतीत्यादिवा
क्ये संसर्गप्रमापूर्वकत्वसाध्याभावेन व्यभिचारवारणाय हेतौ योग्यतापदम् नीलो घटो द्रव्यं पटश्चेत्यादौ नीलः पटश्चेत्यादिभागे नीलपटयोराकांक्षायोग्यतासत्त्वेन हेतुसत्त्वाद्व्यभिचारवा ५४

आकांक्षाविशेषणं=२

साध्याभावत्व=१

पटः कर्मत्वमानयनं कृतिरित्यस्य=८ घटमानयेत्यत्र घटः कर्मत्वमानयनं कृतिरित्यत्र=८

आकांक्षादीनां परस्परप्रतियोगित्वालाभे=१

संसर्गज्ञानपूर्वकत्वस्य=१

णाणपासत्तिपदत्व कदेवपदं चाकांक्षादीनां परस्परप्रतियोगित्वलाभाय अन्यथासाध्यस्यपरस्परार्थघटितत्वेन व्यभिचारप्रसंगात् नन्विष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यक
ज्ञानस्य प्रवर्तकतया संसर्गज्ञानपूर्वकत्वानुमितेरेतरेतादृशतया कथं प्रवर्तकत्वम् अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन पुरोवर्त्तिविशेष्यकत्वेन प्रमापूर्वकत्वसिद्धावपि पुरोव
र्त्तिविशेष्यकरजतत्वादिप्रकारकज्ञानस्य तस्मादनुपपत्तेस्तदर्थं प्रवृत्तप्रामाण्यस्वीकार इत्यत आह यद्वेति मिथःसंसर्गेति तात्पर्यविषयपरस्परसंसर्गवंत इत्यर्थः तेन तात्पर्यविषयसंसर्ग
मादायार्थांतरम् ननु दृष्टांते साध्यसिद्ध्यभावात्कथं व्याप्तिग्रह इत्यत आह दृष्टांतेपीति ननु सर्वत्र शाब्दश्रवणानंतरमनुमितिरूपकार्यान्यथानुपपत्त्या व्याप्तिज्ञानं कल्पनीयमित्यत आह किं
चेति पदज्ञानं कल्पयित्वेति पदस्मरणं कल्पयित्वेत्यर्थः ब्रह्मादिशब्देनार्थस्येव ब्रह्मादिरूपेणार्थेनापि ब्रह्मादिपदस्मरणसंभवाद्वाच्यत्वादिवद्वाचकत्वादिसंबंधस्यापि स्मारकत्वादि
तिभावः इदमुपलक्षणम् आकांक्षादिज्ञानं कल्पयित्वेत्यपि बोध्यम् मणिकृतस्त्वेते पदार्थाः परस्परसंसर्गवंतः योग्यतादिमत्पदोपस्थितत्वादित्यनुमाने योग्यतानलिंगविशेषणं लिंग
स्यनिश्चितस्यैव निश्चायकतया योग्यतायाः संशयेपि शाब्दबोधदर्शनादतः शब्द एव प्रमाणमितिवदन्ति मिश्रास्त्वनुमानमुद्रया शब्दस्य बोधकत्वे घटमानयेति स्वरूपयोग्ये घटः कर्म
त्वमानयनं कृतिरितिस्वरूपायोग्यमिति न स्यात् अनुमानस्याभक्त्यासंभवात् न चाकांक्षाघटितहेत्वभावान्नानुमितिरिति वाच्यम् आकांक्षाभ्रमेणानुमितिसंभवात् विषयाबा
धाच्चतस्याः प्रमात्वात् शब्दप्रामाण्येपि स्वभावात्तादृशशाब्दबोधकत्वमित्याहुः परे तु घटात्पृथगित्यादौ घटावधिकपृथक्त्वप्रकारेण निरवच्छिन्नविशेष्यताकः पृथक्त्वाश्रयस्य शाब्द
बोधः सर्वानुभवसिद्धः स चास्माकं तादृशानुपूर्वीकपदज्ञानत्वेन तादृशशाब्दबोधं प्रति हेतुत्वादुपपद्यते वैशेषिकाणां तु घटावधिकपृथक्त्वे घटपदस्याकांक्षा पृथक्पदस्यापि तत्वादि
त्यनुमानेन न तन्निर्वाहः पदविधया घटपृथक्त्वस्याभानेपि तदाश्रयस्याभानात् न च घटं पदीकृत्य घटावधिकपृथक्त्ववानित्यनुमित्या तन्निर्वाह इति वाच्यम् पदादिनिष्ठविशेष्यतायास्तत्र पदार्थ
वच्छेदकीभूतपदत्वावच्छिन्नतया निरवच्छिन्नविशेष्यताकतादृशशाब्दबोधसमानाकारत्वस्य तयाप्यनिर्वाहादित्याहुः तत्र तेषु मध्ये असिद्धिपक्ष इति अत्यंताभावाप्रतियोगिसाध्यक इत्य
र्थः यथाश्रुते सिद्धिव्याघातात् अत्यंताभावाप्रतियोगित्वस्य प्रमेयत्वादौ समस्त्वा लक्षणसमन्वयः न चैतन्न संभवति प्रमाविषयत्वरूपस्य तस्य नानात्वेनाननुगमादिति वाच्यम् प्रमात्वस्येव
परंपरासंबंधेनानुगतत्वात् इत्थं च प्रमेयत्वादेर्व्यतिरेकित्वभ्रमेपि केवलान्वयित्वमेवेति मंतव्यम् असत्सपक्ष इति सिद्धसिद्धिव्याघातादत्राप्यगृहीतहेतुसहचारं यद्व्यतिरेकिसाध्यं तत्कत्वा
मर्थो बोध्यः सत्सपक्ष इति गृहीतान्वयिव्यतिरेकिसाध्यकमित्यर्थः यत्संबंधेन यदवच्छिन्नं प्रतीति यत्संबंधावच्छिन्ना यद्रूपावच्छिन्नव्याप्यतानिरूपितव्यापकता गृह्यत इत्यर्थः इतरव्याप्येतेति
इतरस्य व्याप्यतेत्यर्थः तादात्म्येनेतरव्यापकत्वेतिपाठे तादात्म्यसंबंधावच्छिन्ना या इतरनिष्ठव्याप्यता तन्निरूपितव्यापकतेत्यर्थः तादात्म्यसंबंधेनेति तादात्म्यसंबंधावच्छिन्नप्रतियोगिताका
भावः सिध्यतीत्यर्थः येन संबंधेन व्याप्यता गृह्यत इत्यनुक्तौ तु तादात्म्येनेतरस्य व्याप्यता यत्र गृहीता तत्रेतरात्यंताभावस्य सिद्धिः स्यादिति भावः संयोगसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावे
नेति साधारणं तेन संबंधांतरावच्छिन्नप्रतियोगिताकेन न सिद्धिरित्यर्थः अनेन च येन संबंधेन व्यापकता गृह्यत इत्यस्य फलं सूचितं प्रदर्शितरीत्यैव येन रूपेण यदवच्छिन्ने [illegible] इष्टपि प्रयोजनमस्य

त्मनयोः १

व्यापकतावच्छेदकप्रकारकनियमात्=३

पि+ आकांक्षाभ्रमेणाज्ञातायानुमितिः तस्याः=

घटात्पृथगित्याकारकः= पृथक्त्वाश्रयस्य शाब्दबोधनिर्वाहः=९

साध्य+

प्रमेयत्वस्यपरंपरासंबंधेनानुगतत्वमति=

पटः कर्मत्वमानयनं कृतिरित्य=८

अनुमितौ=

अत्यंताभावाप्रतियोगित्वप्रमेयत्वेऽसिद्धि न संभवति=६

साध्याभावः=२ पक्षतावच्छेदकनानात्वएवांशतः सिद्धसाधनस्य दोषत्वादेव=३ इतरभेदस्य=१

55 न्या॰मु॰टी॰ दि॰ ५५

म नन्वसाध्यसाधनसहचारज्ञानाभावात्कथं व्यतिरेकव्यतिरेकव्याप्तिज्ञानमित्यत आह अत्रचेति तथाच व्यतिरेकसहचारेणैव व्यतिरेकव्याप्तिग्रहात्नान्वयसहचारग्रहापेक्षेतिभावः ननु विना नं+
साध्यप्रसिद्धिं तदभावाज्ञाने व्यतिरेकव्याप्तेर्दुर्ग्रहत्वं स्यात्साध्यप्रसिद्धौ च सिद्धसाधनमिति चेन्न साध्यस्य घटादावेव प्रत्यक्षसिद्धत्वात्पृथिवीतरभिन्ने तु देशप्रतीतेरप्रसिद्धत्वान्न सिद्धसाध
पक्षतावच्छेदकनानात्वएवांशतः सिद्धसाधनस्य दोषत्वात् अतएवानित्ये वाङ्मनसी इत्यत्र वागिति बुद्धेरुद्देश्यायाः सिद्धत्वेनांशतः सिद्धसाधनमिति ननु तथापि घटः कथं पक्षः साध्यस्य इतरभेद=
निश्चयेन तत्संदेहरूपसिसाधयिषयोरभावादिति चेन्न पतः सर्वा पृथिवीतरभिन्ना नवेति संशयस्य तत्प्रकारकसिसाधयिषायाश्च घटविषयत्वात् घटत्वेन विशेषदर्शने सिद्धौ वा ते
घटत्वेनरूपेण= नरूपेण संशयसिसाधयिषे न भवतः पृथिवीत्वेन तु भवतएवेति ननु पृथिवीतरभिन्ना पृथिवीत्वाद्यद्वदित्यन्वयेनैवेतरभेदसिद्धेर्व्यतिरेकिवैयर्थ्यमिति चेन्न अन्वयव्याप्तेरग्रहेव्य निरः+
तिरेकव्याप्तिस्फूर्तिदशायां व्यतिरेक्यनुमितिजननसंभवेन व्यतिरेकानुमानप्रवृत्तेर्निष्प्रत्यूहत्वात् आचार्यमतमाह केचित्त्विति व्यतिरेकसहचारेण अन्वयसहचारप्रेण व्यतिरे
कसहचारेण अन्वयव्याप्तिरेवेत्येवकारेण व्यतिरेकव्याप्तेर्व्युदासः नन्वेवं व्यतिरेकव्याप्तिज्ञानरूपकारणाभावात्कथं व्यतिरेक्यनुमितिरित्यत आह नत्विति व्यतिरेकव्याप्तिज्ञानमित्यस्या
नुमितावित्यादि नन्वयव्याप्तिज्ञानस्यैव हेतुत्वे कथं व्यतिरेकीति व्यवहार इत्यत आह यत्रेति ननु पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ साध्यस्येतरभेदस्याप्रसिद्धत्वात्कथं व्यतिरेक
घटादौ= सहचारग्रह इत्यत आह साध्यप्रसिद्धिस्त्विति ननु घटादौ साध्ये निर्णीते कथं तत्रेतरभेदानुमितिरत आह पक्षादिति अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन साध्यसिद्धेर अन्वयव्याप्तिज्ञानहेतुत्वे=
प्रतिबंधकत्वादिति भावः अत्र चान्वयव्याप्तिघटकतावत्पदार्थज्ञानादेवान्वयव्याप्तिज्ञानोत्पत्तौ व्यतिरेकसहचारज्ञानस्य तद्धेतुत्वे मानाभावः नच व्यतिरेकसहचारेणोत्पत्र प्रयोजकत्वं अन्वयव्याप्तिज्ञाने=
प्रयोजकत्वं= तृतीयार्थस्तच्चनानुपपन्नमन्वयव्याप्तिज्ञानप्रतिबंधकव्यभिचारशंकानिरासद्वारा व्यतिरेकसहचारज्ञानस्य तत्र प्रयोजकत्वादिति वाच्यम् व्यतिरेकसहचारग्रहेप्यधिकरणांतरे व्य व्यतिरेकसहचारज्ञानस=
भिचारशंकाताद्वस्थ्यात् तदधिकरणीयव्यभिचारशंकानिरासद्वारा तत्र तस्योपयोगित्वमित्यपि न तदधिकरणे साधनाभावग्रहमात्रेणैव तदधिकरणीयव्यभिचारशंकानिवृत्तेरित्यस्व
मोवदंतीत्यनेन सूचितः केचित् मीमांसकाः तदपि [illegible] अर्थापत्तेः प्रमाणांतरत्वमपि दिवा न भुंक्ते इत्यादावित्यादिना मयूरः पर्वतेऽस्मिन्नृत्यति न नृत्यति चेत्यस्य संग्रहः नन्वेत
ति+ द्वाक्यान्मयूरः पर्वते नृत्यतीति ज्ञानमुत्पद्यते नचैतद्वारेणः संभवति पर्वते नृत्यस्य साध्यस्याप्रसिद्धौ व्यतिरेकव्याप्त्यनिरूपणादिति कथं नार्थापत्तिः प्रमाणांतरमिति चेन्न मयूरन
त्यं पर्वताधिकरणकं पर्वतेतरानधिकरणत्वे सति साधिकरणत्वात्पर्वतत्ववदित्यन्वयव्यतिरेकिणैव पर्वताधिकरणकमयूरनृत्यज्ञानसंभवात् ॥ इति प्रमाणांतरनिराकरणानुमा
नेविधानिरूपणं धर्मित्वेनेति इदं च प्राचांमतेनोक्तम् नवीनमते तु नित्यं विज्ञानमानंदं ब्रह्मेति श्रुत्या भगवति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकं जन्यसुखत्वं सुखत्वावांतरजा
तिविशेषो वेति बोध्यम् ॥ इति सुखदुःखग्रंथः ॥ तत्र तयोर्मध्ये अतएव फलज्ञानस्य फलेच्छां प्रति हेतुत्वादेव पुरुषार्थः संभवतीति सुखं दुःखाभावश्च पुरुषार्थः संभवतीत्यर्थः ५५
ननु यज्ज्ञानमित्यादौ स्वविषयकज्ञानजन्येच्छाविषयत्वमर्थः तथाचोपायेतिव्याप्तिस्तस्यापि स्वविषयके इष्टसाधनताज्ञानजन्येच्छाविषयत्वादत आह इतरेच्छेति कृतिसाध्यताज्ञानमि

सपक्षाद्वेन सखंडःखाभावस्य=८ उपायस्य=

55A

ति ननु कृतिसाध्यताज्ञानस्य स्वातंत्र्येण चिकीर्षां प्रति हेतुत्वे मानाभावः तद्धर्मावच्छिन्नविशेष्यके इष्टसाधनताज्ञानस्य तद्धर्मप्रकारकेच्छां प्रति हेतुतायाः क्लृप्तत्वात् कृतिसाध्यत्वावच्छिन्नविशेष्यके इष्टसा

धनताज्ञानादेव चिकीर्षायाः संभवादिति चेन्न यत्र कृतिसाध्ये ष्टे पाकत्वेन इष्टसाधनत्वं न गृहीतमपि तु अदृष्टपाकत्वेन कृतिसाध्यत्वं अदृष्टपाकत्वेन चेष्टसाधनत्वं गृहीतं तत्रापि पाकगोचरप्रवृत्त्ये

रानुभविकतया तदनुरोधेन चिकीर्षाया आवश्यकत्वेन तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातंत्र्येण हेतुताया आवश्यकत्वात् अथ कृत्यसाध्यताज्ञानस्य प्रतिबंधकत्वादेव इष्टाद्रेष्टो चिकीर्षा

नुत्पादात् कृतिसाध्यताज्ञानस्य चिकीर्षां प्रति हेतुत्वे एव मानाभाव इति चेन्न कृतिसाध्यत्वाभाववत्तायात्वद्वच्छेदकधर्मज्ञानानां प्रतिबंधकत्वकल्पनापेक्षया कृतिसाध्यताज्ञानहेतुत्वे लाघ

वात् इष्टसाधनताज्ञानमपि ति अन्यथा निष्फलत्वज्ञानेपि चैत्यवंदनादौ चिकीर्षापत्तिरिति भावः अत्रेदं बोध्यम् पाकविशेष्यके इष्टसाधनताज्ञानस्य कार्यतावच्छेदकं न पाकादिगोचरचि

कीर्षात्वं कृतिसाध्यत्वप्रकारकत्वनिवेशे प्रयोजनविरहात् पाको जायतामितीच्छाया असंग्रहापत्तेश्च किं तु पाकत्वावच्छिन्नमुख्यविशेष्यकेच्छात्वं पाकसाध्यं स्वं जायतामितीच्छायां व्यभि

चारवारणाय मुख्येति इष्टसाधनतेत्यत्रेच्छासमुपस्थिती विशेषणाम् तेनेच्छाज्ञानमन्यकालेपि चिकीर्षानिर्वाहः अत एव कृतिसाध्यताज्ञानस्य हेतुत्वादेव बलवद्द्विष्टेति द्विष्टं द्वेषविषयीभू

तम् द्वेषश्च दुःखे तादृप्येण ज्ञानात् सर्पादौ तत्साधनताज्ञानात् द्वेषे बलवत्त्वं च जातिविशेषः प्रतिबंधकमिति ननु बलवद्द्वेषविषयसाधनत्वज्ञानस्य प्रतिबंधकत्वे चेत्तस्यागम्यागमनज

न्यनरके यदा बलवान् द्वेषस्तदा मे वस्यतादृशद्वेषश्चान्यस्यागम्यागमने तादृशनरकजनकत्वज्ञानवत इच्छाप्रवृत्त्योरनुपपत्तिः एवं चैत्रस्यैव कालान्तरे तादृशद्वेषसत्त्वेपि न च तत्तत्कालीन

तत्तत्पुरुषीयेच्छां प्रति प्रवृत्तिं प्रति च तत्कालीन तत्पुरुषीय बलवद्द्वेष्टजनकत्वज्ञानस्य प्रतिबंधकत्वं कल्प्यते यत्पुरुषस्य यदा न क्वापि द्वेषस्तत्कालतत्पुरुषांतर्भावेन तादृशज्ञानप्रतिबंधकत्व

स्याकल्पनान्न तत्र तादृशप्रतिबंधकाप्रसिद्ध्या तदभावरूपकारणस्याभावाद्वृत्त्यनुपपत्तिरिति वाच्यम् तत्पुरुषस्य यदागम्यागमनजन्यनरके बलवान् द्वेषस्तदा तत्पुरुषस्य तत्रेच्छादेरगम्या

म्यागमनगोचरतत्पुरुषीयतत्कालीनेच्छाया अप्रसिद्ध्या तत्पुरुषतत्कालांतर्भावेन तादृशकार्यकारणभावस्याभावेन तत्र तत्पुरुषीयागम्यागमनगोचरेच्छानुत्पादप्रयोजकस्य दुर्भिज्ञापत्तेरिति

चेन्न तद्धर्मप्रकारकद्वेषविशिष्टस्य तद्धर्मावच्छिन्नजनकत्वज्ञानस्य तत्र प्रतिबंधकत्वकल्पनेनोक्तायत्यभावात् तद्धर्मप्रकारकद्वेषानन्तरं तादृशेच्छायां तादृशद्वेषाभावः कारणम् तादृशद्वे

षोत्तरतद्गोचरेच्छायां तद्धर्मावच्छिन्नजनकत्वज्ञानाभावः कारणम् बलवद्द्वेष इति पाकादिगोचरेच्छायां बलवद्द्वेषविषयसाधनत्वज्ञानजन्यः पाकगोचरो द्वेषः प्रतिबन्धकः एवोक्तप्रतिबंधक

द्वयकल्पनापेक्षया लाघवादिति भावः अत्र चोत्कटसुखोत्कटदुःखजनकत्वमेकस्मिन्कर्मणि गृहीतं तत्र सुखत्वतिपत्तस्य लघ्वेच्छाद्वेषयोरनुत्पत्तेस्तत्र कार्यकाले द्वेषाभावस्य सत्त्वेनेच्छो

त्पादापत्तिः न च पुत्र बलवद्द्वेषविषयसाधनत्वज्ञानेन तत्तीपक्षणे द्वेषोत्पत्ति तदनन्तरक्षणे च्छोत्पादापत्तिस्तावपीति वाच्यम् तत्रेच्छोत्पादस्येष्टत्वात् क्षणविलंबस्य पापपथनिर्णीयत्वा

दित्यनेनास्वरसः सूचितः बलवदनिष्टजनकत्वज्ञानमिति अत्रापि तद्धर्मप्रकारकद्वेषानन्तरेच्छायां तद्धर्मावच्छिन्नजनकत्वज्ञानाभावः कारणम् तादृशद्वेषानन्तरेच्छायां तु तद्धर्मप्रकार

कद्वेषाभावः कारणमिति निष्कर्षो बोध्यः फलेकस्यचिन्मते इत्यनेनास्वरसः सूचितः मञ्चबलवदनिष्टाननुबंधित्वज्ञानत्वस्य हेतुतावच्छेदकत्वे बलवदनिष्टजनकत्वप्रकारतानिरूपिताभा

प्रवृत्त्यनुरोधेन=३

इष्टसाधनताज्ञानस्य चिकीर्षां प्रति कारणत्वाभावे=५

अगम्यागमनजन्यनरके बलवान्द्वेषश्चान्यस्य=

प्रतिबंधकाभाव=

अगम्यागमनत्वधर्म=

नरकत्वधर्मावच्छिन्न=

इच्छाप्रवृत्त्योरनुपपत्तिरिति दोषः=१

बलवद्द्विष्टसाधनताज्ञान=१

प्रयोजकस्य दुर्भिज्ञापत्त्यभावात्=१२

बलवद्द्विष्टसाधनताज्ञानं प्रतिबंधकं तद्धर्मावच्छिन्नजनकत्वज्ञानं प्रतिबंधकं इति द्वयं=५

तत्पुरुषीयागम्यागमनगोचरेच्छा अस्वरसः=१ नुत्पादे=६

यथा सत्प्रतिपक्षस्थले द्वेषानुमितीनभवतस्तथा तत्रेच्छाद्वेषयोरनुत्पत्तिः=४ द्वेषोत्पत्त्यनन्तरक्षणे=३

अगम्यागमनत्वधर्मप्रकारकद्वेषाभावः=६

अगम्यागमनत्वधर्मप्रकारकः=२

बलवदनिष्ट=२

बलवदनिष्टजनकत्वनिष्ठप्रकारतानिरूपिताभावनिष्ठ
विशेष्यताशालित्वापेक्षया बलवदनिष्टसाधनत्वप्रतियो
गिकाभावत्वस्य लघुत्वात्=१

ज्ञान=३

न्याम्‌: टी॰ द्वि॰ ५६ 56

बविशेष्यताशालित्वादेस्तादृशनिरूप्यनिरूपकभावघटितत्वेन गौरवात्तद्घटितबलवदनिष्टसाधनत्वज्ञानाभावत्वेनैव हेतुत्वं युक्तम् नचाप्रामाण्यज्ञानानास्कंदितबलवदनिष्टज्ञानानुबंधित्व
ज्ञानत्वापेक्षया प्रामाण्यनिश्चयानास्कंदिततदनुबंधित्वज्ञानत्वस्य प्रतिबंधकतावच्छेदकत्वे गौरवमिति वाच्यम् युद्धादौ बलवदनिष्टसाधनत्वसंदेहेपीच्छाप्रवृत्त्योरुदयात् बलवदनिष्टसाधनत्व
ननुबंधित्वनिश्चयस्यैवेच्छाप्रतिबंधकतायामन्यतरानुबंधित्वसंशयस्यापि विकारणतायाश्चवाच्यतया च विपरीतगौरवादिति नचबलवदनिष्टानुबंधित्वज्ञानस्य प्रवर्तकत्वे तद्विषयस्य विधा
र्थत्वाभावात् कलंजभक्षणादेरित्यादिवाक्यानामप्रामाण्यापत्तिरिति वाच्यम् तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेपि प्रवृत्तिप्रतिबंधकबलवदनिष्टसाधनत्वज्ञानविघटकत्वेन प्रवृत्तिप्रयोजक
त्वात् प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यर्थत्वानपायात् अत्र यद्यपि यत्र प्रथमक्षणे द्वेषो द्वितीयक्षणे फले इच्छा तृतीयक्षणे फलसाधनताज्ञानं ततश्चतुर्थक्षणे द्वेषनाशाद्भवत्येव यत्पञ्चक्षणे
उपायेच्छा यत्र फले इच्छादिक्रमेणैषामुत्पत्तिस्तत्र फलेच्छारूपकारणाभावादेव नोपायेच्छा एवमन्यत्रापि आत्मविशेषगुणानां योगपद्यानंगीकारादिति बलवदनिष्टानुबंधित्वज्ञानस्य हे
षस्य वा प्रतिबंधकत्वं न युक्तम् न युक्तं च बलवदनिष्टानुबंधित्वज्ञानस्य हेतुत्वं तथापि द्विविधक्षणातिरिक्ते विद्वेषेच्छाप्रवृत्त्योरतदुत्पत्त्यानुभविकतया ज्ञानयोरेव न यौगपद्यमित्यभ्युपगमाद्द्वे
षस्यैवोक्तप्रतिबंधकत्वस्य हेतुत्वस्य चावश्यकत्वमिति ध्येयम् ॥ इतीच्छार्थः ॥ तेन बलवत्त्वविशेषणेन ॥ इति द्वेषः ॥ प्रवृत्तिरित्यादि प्रवृत्तित्वं रागजन्यतावच्छेदकतया सिद्धो जातिविशे
षः निवृत्तित्वं च द्वेषजन्यतावच्छेदकतया जीवनयोनित्वं च सादृजिकप्राणसंचारविषयकयत्नत्वम् ननु बलवदनिष्टानुबंधित्वज्ञानाभावस्य प्रवृत्तिहेतुत्वे मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्ति
रत आह मधु इति चिकीर्षाभावादिति चिकीर्षां प्रति बलवदनिष्टानुबंधित्वज्ञानाभावस्य हेतुत्वादिति भावः कृतिसाध्यताज्ञानादिवदिति अन्यथा कृतिसाध्यताज्ञानादेरपि चिकीर्षा
यामेव हेतुत्वं स्यान्न प्रवृत्तौ व्यापारेण व्यापारिणो नान्यथासिद्धत्वमिति प्रकृतेपि समानमिति भावः प्राभाकरमतमाह कार्यताज्ञानमिति साच चिकीर्षैव तद्द्वारा कृतिसाध्यत्वप्रकारके
च्छाद्वारा द्वयोरेवेति एवकारोप्यर्थे स्वविशेषणवत्तेति स्वं प्रवर्तमानः पुरुषः तद्विशेषणं काम्ये कामना नित्ये कालशौचादि तद्वत्ता पर्याप्तेतत्संबंधः तस्य प्रतिसंधानं ज्ञानमित्यर्थः तस्य
कार्यताज्ञाने हेतुतालिंगविधया तथाहि पाको मत्कृतिसाध्यः मत्कृतिं विनाऽसत्त्वे सति मदिष्टसाधनत्वादित्यनुमानम् अत्र मदिष्टसाधनत्वमात्रोपादाने वृष्ट्यादौ व्यभिचार इति सत्यंतम् म
दिष्टसाधने परपाकादौ व्यभिचारवारणाय मत्कृतिं विनेत्यत्र मत्पदम् प्रमेये व्यभिचारवारणाय मदिष्टसाधनत्वादिति मदीयश्रमस्य मदृष्टोऽरिष्टसाधनत्वान्न द्वेषता इष्टस्य मतत्त्वापि मदिति
न च स्वेच्छाधीनकृतिसाध्यताज्ञानमेव प्रवर्तकमन्यथा नांतरीयकश्रमे प्रवृत्त्यापत्तेः तच्चोक्तानुमानान्न सिद्धमिति वाच्यम् स्वेच्छाधीनकृतिसाध्यत्वस्यैव साध्यत्वात् एवं च हेतावपि मत्कृतिं
विनेत्यत्र स्वेच्छाधीनत्वं मत्कृतेर्विशेषणं देयमन्यथान्येच्छाधीनमत्कृतिसाध्ये मदिष्टसाधने नांतरीयकजलसंयोगादौ व्यभिचारापत्तेः एवं सति स्वेच्छाधीनमत्कृतिघटितहेत्वभावादेव श्रमेप्य
भिचारवारणसंभवाद्विशेष्यदलवैयर्थ्यं प्रयोजनं यद्यपि न संभवति तथापि नीलधूमादिवद्वैयर्थ्यं त्वंतरत्वाददोषः एवमहमिदानींतनकृतिसाध्यसंध्यावंदनकः द्विजातित्वे सति विहितसंध्याकालीनशौ
चादिमत्त्वादित्यनुमानम् यो द्विजातित्वे सति विहितसंध्याकालीनशौचादिमान् स तत्कालीनकृतिसाध्यसंध्यावंदनक इति सामान्यतो व्याप्तेरिति नचैवं रीत्येष्टसाधनत्वहेतुकानुमानसंभवेपि प ५६

[illegible]दृशज्ञानस्यका
रणत्वापेक्षया=२
बलवदनिष्ट=३
बलवदनिष्टानुबंधी
त्वज्ञानस्य=४

प्रथमक्षणे फलेच्छा ततो
द्वितीयक्षणे फलसा
धनताज्ञानं तृतीयक्षणे
द्वेषः ततः चतुर्थक्षणे
फलेच्छारूपकारणा
भावात्=६
स्वाभाविक=९

बलवदनिष्टानुबं
धित्वस्य=३

ग्रं+

मदिष्टसाधनत्वस्य

पाको मदिच्छाधीनमत्कृतिसाध्यः मदिच्छा
धीनमत्कृतिं विनाऽसत्त्वे सति मदिष्टसा
धनत्वात्=३

इच्छा=स्वर्गे=३

567 ष्टेस्वविशेषणवत्ताप्रतिसंधानजन्यं कार्यताज्ञानं न संभवति इष्टसाधनत्वस्य यागनिष्ठत्वेन पुरुषविशेषणत्वाभावात् इच्छायाश्च पुरुषविशेषणत्वेपि तस्यां लिंगत्वासंभवात् लिंगघटकत्वेपि
पक्षेतद्वृत्ता ज्ञानानिर्वाहकत्वादिति वाच्यम् काम्यसाधनताज्ञानस्यापि पक्षे यागादेः स्वविषयसाधनत्वरूपकामनासंबंधज्ञानात्मकत्वात् तु स्वत स्तद्वृत्ताज्ञानं तत्संबंधज्ञानं तज्ज्ञानमेव न न
पक्षेवितंडांतर्भूत इति काम्यसाधनताज्ञानस्यापि कामनासंबंधज्ञानात्मकतयाद्यानुपपत्त्यभावात् ननु स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्य प्रवर्तकत्वे इष्टसाधनताज्ञानजन्यका
ले पि पाके स्वविशेषणकृत्यादिघटितहेत्वंतराघत्रकार्यतानुमितिर्यथा पाकः स्वेच्छाधीनमत्कृतिसाध्यः श्रमादिभिन्नत्वे सति मत्कृतिव्यतिरेकप्रयुक्तव्यतिरेकत्वात् यद्वा स्वेच्छाधीनमत्कृतिं
विनाऽसत्त्वादिति तत्रापि प्रवृत्त्यापत्तिरत आह काम्येहीति कामनायागपाकादिगोचरकामना क्वचित्प्रथैव पाठः तथाच स्वविशेषणेत्यत्र विशिष्यतादृशकामनारूपमेव स्वविशेषणं वाच्यमेवं यागादिगोचर=
इच्छा= विशेषणवत्त्वस्वविषयसाधनत्वरूपं वाच्यं तेन न स्वेच्छाधीनत्वेत्यादिद्वितीयहेतुज्ञानजन्यकार्यतानुमितिस्थले प्रवृत्त्यापत्तिरिति भावः ननु काम्यसाधनताज्ञानजन्यकार्यताज्ञानस्य प्रवर्तक
त्वे मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिरत आह ततश्च बलवदनिष्टेति तथाच स्वविशेषणवत्ताप्रतिसंधाने बलवदनिष्टाननुबंधित्वविषयकत्वं विशेषणं देयमिति भावः ननु तदन्नस्या बलवदनिष्टाननुबंधिकाम्यसाधनताज्ञानजन्यकार्यताज्ञानप्रवर्तकमिति=१
पि भोजने प्रवृत्त्यापत्तिस्तस्याप्यतीतभोजनकामनाघटितलिंगज्ञानजन्यकार्यताज्ञानसत्त्वादत आह तस्येति तदानीमिति कामनायास्तदानीं पुरुषविशेषणत्वाभावादित्यर्थः तथाच
बलवदनिष्टाननुबंधितदानींतनकामनाविषयसाधनत्वज्ञानजन्यकार्यताज्ञानप्रवर्तकमिति=४ स्वविशेषणेत्यत्र तदानींतनत्वं स्वविशेषणे देयमिति भावः ननु स्वेच्छाधीनमत्कृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादिलिंगज्ञानजन्यकार्यताज्ञानात् संध्यावंदने प्रवृत्त्यापत्तिः कृतेरपि स्वविशे
षणत्वादत आह नित्येनैमित्तिके चेति आदिना विहिततत्कर्मकालस्य परिग्रहः न च कालस्य कथं पुरुषविशेषणत्वमिति वाच्यम् स्वविहितजीवनवत्त्वसंबंधेन तस्य पुरुषविशेषणत्वा कालस्य=
त् विहितकालजीवित्वादेर्वा विधेयदेनग्रहात् तथाच नित्यगोचरप्रवृत्तिस्थले स्वविशेषणपदेन विशिष्य तत्कालीनशुचित्वादिरूपविशेषणमेव ग्राह्यमिति न दर्शोक्तातिप्रसंग इति भा
वः नैयायिकः शंकते नन्विति तदपेक्षया बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनताज्ञानजन्यकृतिसाध्यताज्ञानापेक्षया लाघवेनेति नियमादिघटितजन्यतापेक्षया विषयत्व
स्य लघुत्वादिति भावः ननु बलवदनिष्टजनकत्वज्ञानं न हेतुः क्वचिद् द्रुतायासमसाध्ये बहुतरस्यापि दुःखस्याबलवत्त्वात् क्वचिदल्पस्य दुःखस्य बलवत्त्वाद् गणनबलवत्त्वस्य दुर्वचत्वादित्यत
आह बलवदनिष्टाननुबंधित्वं चेति इष्टोत्पत्तीति इष्टोत्पत्तिनांतरीयकं यदुःखं तदपेक्षयातिरिक्तं यदुःखं तज्जनकत्वमर्थः एतेन मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिरपास्ता इष्टो
मधुविषसंपृक्तान्नभोजनेन= त्पत्तिनांतरीयकदुःखातिरिक्तस्य मरणस्य दुःखस्य तेन जननात् अत्र केचित् सुखमात्रजनके कर्मणि इष्टोत्पत्तिनांतरीयकदुःखमप्रसिद्धमिति तत्र प्रवृत्त्यभावप्रसंग इति तदयुक्तम्
क एकं कर्मेति न्यायेन सुखजनके कर्मणि दुःखजनकत्वनियमेनाप्रसिद्ध्यभावात् मिथ्यात्त्व इष्टोत्पत्त्यनांतरीयदुःखजनकत्वमुक्तस्यार्थ इति नाप्रसिद्धिरित्याहुः नन्वेवं सति नरकसा
धनत्वेन प्रमिते परदाराभिगमनादौ रागोत्कटस्य प्रवृत्ते इष्टोत्पत्त्यनांतरीयकं दुःखजनकत्वेन तस्य निश्चयादित्यत आह बलवद्द्वेषेति द्वेषे बलवत्त्वं जातिविशेषः अतएव
रागांधस्य परदारागम्यागमनादिजन्यदुःखेन तादृशद्वेषस्तदा तद्धेतावपि प्रवृत्तिः साध्यत्वसाधनत्वयोर्विरोधमुपपादयति असिद्धस्येति आद्यक्षणवृत्तित्वविशिष्टस्य पाकादेरित्य

बलवान्=१ नरक+

57
व्या॰मु॰टी॰ ५३

र्थः सिद्धस्य अनागतत्वाणवृत्तित्वविशिष्टस्य कृत्यव्यवहितोत्तरक्षणसंबंधित्वघटितस्य कृतिसाध्यत्वस्य पाकोत्पत्तिक्षणएव पाकवृत्तित्वात्कालांतरभाव्योदनादिफलसाधनत्वस्योद
नाव्यवहितपूर्वक्षणसंबंधित्वघटितस्योत्पत्तिक्षणे पाकावृत्तित्वात्तयोरेकक्षणावच्छेदेनैकत्रवृत्तित्वविरोधादितिभावः यद्यपिकालांतरभाव्योदनाव्यवहितपूर्वक्षणवृत्तितावच्छेद
कधर्मवत्त्वरूपमोदनसाधनत्वमाद्यक्षणवृत्तित्वविशिष्टेपिपाकेसंभवतीतिकथंविरोधस्तथापिस्वरूपयोग्यमिदंनफलोपधायकमितिज्ञानात्प्रवृत्त्यनुदयेनफलोपधायक
साध्यत्वसाधनत्वयोः= त्वरूपेष्टसाधनत्वज्ञानस्यैवसंशयसाधारणस्यप्रवृत्तिकारणत्वंवाच्यंएवंचफलोपधायकत्वंचाद्यक्षणविशिष्टेयोगेनसंभवतीतिभावः साध्यत्वसाधनत्वयोर्विरोधंव्यु
त्पाद्यतयोरेकज्ञानविषयत्वंनसंभवतीत्याह नचैकमेकेनेकदेति अव्याप्यवृत्तिपदार्थस्यस्वस्वावच्छेदकानवगाहिज्ञानंनसंभवतिमूलेवृक्षःसंयोगीत्येवप्रतीतेःतथाचसाध्य
त्वसाधनत्वयोरपिस्वस्वावच्छेदकासिद्धत्वसिद्धत्वविषयकमसिद्धःपाकःकृतिसाध्यःसिद्धश्चपाकइष्टसाधनमितिज्ञानंसमूहालंबनंवाच्यंतच्चनसंभवतिसिद्धत्वासिद्धत्व
योःपरस्परविरोधित्वादित्यभिमानः तस्मात्कालभेदादिति नचेदानीमसिद्धःपाकःकृतिसाध्यःअग्रेचसिद्धःपाकइष्टसाधनमितिज्ञानादेवप्रवृत्तिरस्त्वितिवाच्यम् इदानींत
नाग्रेतनकालयोरननुगमात् प्राणित्वस्यापिपुरुषविशेषणत्वेनाहमिदानींतनकृतिसाध्यविषभक्षणःप्राणित्वादित्यनुमितिसंभवात् विषभक्षणसाधारणस्ववि
शेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानमितिबलवदनिष्टाननुबंधीष्टसाधनताशोचाद्यन्यतरलिंगप्रतिसंधानजन्यकार्यताज्ञानंप्रवर्तकंवाच्यंतदपेक्षयाबलवदनिष्टा
ननुबंधीष्टसाधनताविषयककार्यताज्ञानमतिलघुइति तदेवकाम्यनित्यसाधारणंकारणत्वेनकल्प्यतइत्यभिप्रायेणप्रभाकरमतंदूषयति मैवमिति साध्यत्वसाधनत्व
एककालीनकृतिसाध्यत्वेष्टसाधनत्वज्ञानस्य=२ एकदेति पदम्=३ योर्विरोधंदूषयति नचेति नहीत्यर्थः यदाकदाचिदिति यत्किंचित्कालीनस्यसाध्यत्वस्ययत्किंचित्कालीनेनसाधनत्वेनविरोधाभावादित्यर्थः तथाचैककालीनकृतिसाध्य
त्वेष्टसाधनत्वयोर्विरोधेपिनक्षतिस्तथाज्ञानस्यास्माभिःकारणत्वानंगीकारात् किंतुनिर्विशेषितयोःसामान्यतःकृतिसाध्यत्वेष्टसाधनतयोर्ज्ञानस्यैवहेतुत्वांगीकारादिति
भावः तादृशंचज्ञानंसंभवतीत्याह एकदेति इदंचज्ञानान्वयि ज्ञानात् ज्ञानसंभवात् मूलावच्छेदेनवृक्षेकपिसंयोगीतिज्ञानस्यानुभविकत्वात्तयोरव्याप्यवृत्तेर्ज्ञानंस्वाव अव्याप्यवृत्तितावच्छेदकमलविषयकमेवेति=
च्छेदकविषयकमेवेतिनियमेमानाभावात्पूर्वोक्तदोषइतिध्येयम् प्रभाकरानुयायिनवीनमतमाह नव्यास्त्विति ज्ञातुमशक्यत्वादिति सामान्यलक्षणा प्रत्यासत्त्य
प्रत्यासत्त्य+ नंगीकारेणोपस्थानाभावेनानुमितेरप्यसंभवादितिभावः तदभावात् यादृशस्यपुंसःकृतिसाध्यंयद्वृत्तं तादृशत्वज्ञानाभावात् नन्विष्टसाधनताज्ञानस्यप्रवृत्तिजनकत्वेभावि
स्वप्रयोजन+ नोवानन्येप्रवृत्त्यापत्तिरतआह इदंतद्बोध्यमिति इष्टसाधनत्वादीत्यत्रादिपदोपग्रहीतस्येदानींतनकृतिसाध्यत्वघटककृत्याविदानींतनत्वविशेषणस्यप्रयोजनमाह तेनभावीति
इष्टसाधनत्वघटकेच्छायांतद्विशेषणमाह एवंतत्रइति बलवदनिष्टेत्यत्रबलवद्द्वेषेतद्विशेषणप्रयोजनमाह प्रवर्ततेचेति प्रवृत्तौप्रवृत्तेःपूर्वम् नरकसाधनत्वज्ञानादिति न
रकरूपबलवदनिष्टसाधनत्वज्ञानादित्यर्थः उत्कटरागादिनेति अगम्यागमनजन्यसुखेउत्कटरागादिनेत्यर्थः नरकेति बलवदनिष्टेत्यर्थः तिरोधानात् अननुसंधानात् रामजी ५३

आगम्यागमनजन्यसुखेत्यर्थः=१

प्राणसंचारादिविशेष्यतानिरूपितेष्टसाधनता न्रवृत्तिसाधनताज्ञानस्य प्रवर्त्तक त्वांगीकारेण=६

प्राणसंचारादिविशेष्यतानिरूपितेष्टसाधनता प्राणसंचारे ऽभावात्प्रवृत्तिः कुतः प्राणसंचारमित्यत्रि इष्टप्रवृत्तिविशेष्यतानिरूपिता या कृतिसाध्यतातज्ज्ञानमेव=५

तत्वप्रकृतिसाध्यतत्प्रकारिका प्रवृत्ति प्रवृत्ति=२ साध्यक्रियाविषयिणी इच्छा चिकीर्षा=२

57A तादृशप्रासुखे उत्कटरागसत्वे अगम्यागमनजन्यनरके बलवद्द्वेषानुदयादितिभावः प्रवृत्तिरूपेति स्वेच्छाधीनकृतिसाध्यता ज्ञानहेतुत्ववादिमणिकृन्मतेपिस्वेच्छाधीनत्वंहि
तिविशेषणं प्रवृत्तिरूपकृतिलाभायैवेतिभावः कृतिसाध्यताज्ञानमित्यत्र प्रवृत्तित्वेन प्रवेशइत्यर्थः इत्थंचतेषामपीभवता इच्छा प्रवृत्तिसाध्यत्वप्रकारिकावोध्या ज्ञानेच्छयोः
समानप्रकारकत्वेन हेतुहेतुमद्भावादितितेन प्रवृत्तित्वेन निवेशेन प्राणपंचकसंचारेनप्रवृत्तिरिति नचप्राणनामतीन्द्रियतयोपादानप्रत्यक्षाभावादेव न प्राणोपादान
कसंचारसाध्यकप्रवृत्त्यापत्तिरितिवाच्यम् प्राणवहनाडीपादानकप्राणसंचारसाध्यकप्रवृत्त्यापत्तिवारणायैव प्रवृत्तिसाध्यताज्ञानहेतुत्वांगीकारात् यद्वापिप्राणसंचारा
वृत्तिविशेष्यतासंबंधेनकृतिसाध्यताज्ञानहेतुत्वांगीकारेवतेषां प्रवृत्तिवारणसंभवतितेषामपिपरैर्जीवनयोनियत्नसाध्यत्वभ्युपगमात्प्रवृत्त्यापत्तिवारणाय प्रवृत्तिसाध्यत्वज्ञा
नत्वेन हेतुत्वमावश्यकमितिध्येयम् एतेनप्राणसंचारेप्रवृत्तिवारणाय प्रवृत्तिसाध्यताज्ञानस्यहेतुत्वेपिप्रवृत्तिसाध्यत्वभ्रमात्प्राणसंचारेप्रवृत्त्यापत्तिर्दुर्वारेत्यपास्तम् नचप्रवृत्तिसा
ध्यताज्ञानस्यहेतुत्वेपिभोजननान्तरीयकश्रमेसाध्यतयाप्रवृत्त्यापत्तिर्दुर्वारेतिवाच्यम् तादृशश्रमेचिकीर्षाविरहादेवप्रवृत्त्यनुपपत्तेः तत्रचिकीर्षाविरहश्चश्रमस्यदुःखरूपतया दुः
खत्वज्ञानस्येच्छाप्रतिबंधकतयेच्छासामान्यसामग्रीविरहादेव एतेननान्तरीयकश्रमेप्रवृत्तिवारणाय स्वेच्छाधीनकृतिसाध्यताज्ञानस्यहेतुत्वंवाच्यमितिमणिकृन्मतमपास्तम् नचकृ
तिप्रवृत्तिसाध्यताज्ञानेच्छयोः सत्वात्तत्रसाध्यताख्यविषयतासंबंधेनप्रवृत्त्यापत्तिरितिवाच्यम् साध्यतयाप्रवृत्तिंप्रति फलत्वज्ञानस्यप्रतिबंधकत्वात् वस्तुतस्तुतत्तद्धर्मान्यवृत्ति
विषयतासंबंधेनज्ञानंप्रतितत्तद्धर्मभेदस्यहेतुतायाआवश्यकत्वात् तत्रचकार्यतावच्छेदककोटौ ज्ञानत्वस्थानेगुणत्वमेवनिवेशनीयम् एवंचसुखत्वान्यवृत्तिविषयतासंबंधेन
गुणस्यकृतिसाध्यताज्ञानजन्यतावच्छेदकीभूतं यत्साध्यताख्यविषयतासंबंधेन प्रवृत्तित्वं तद्व्यापकतयातद्वच्छिन्नजनकत्वसुखत्वभेदस्यसुखत्वेभावादेव न तत्र साध्यत
याप्रवृत्त्यापत्तिः व्याप्यधर्मावच्छिन्नजनकसामग्र्याःफलजननेव्यापकधर्मावच्छिन्नजनकसामग्र्याअपेक्षितत्वात् अनयैवरीत्याप्राणसंचारत्वेश्रमत्वेचसाध्य
ताख्यविषयतावच्छेदकतासंबंधेन प्रवृत्तिवारणंवोध्यम् एतदेवहरिनिधायप्राणसंचारस्यप्रवृत्त्ययोग्यत्वादेवनतत्रप्रवृत्तिरितिमिश्रैरभिहितमितिदिक् इत्थंचेति प्रवृत्तिं
प्रतीष्टसाधनत्वादिधियो हेतुत्वेचेत्यर्थः इष्टसाधनत्वादीत्यादिनाबलवदनिष्टाननुबंधित्वकृतिसाध्यत्वयोःपरिग्रहः अत्रचनिष्फलेप्रवृत्त्यभावादिष्टसाधनत्वस्येष्टसा
धनेपिमधुविषसंपृक्तान्नभोजनेऽप्रवृत्तेर्बलवदनिष्टाननुबंधित्वस्यकृत्यसाध्येसमेरुशृंगादावप्रवृत्तेः कृतिसाध्यत्वस्यचज्ञानंप्रवृत्तिहेतुः तच्चविधितइतीष्टसाध
नत्वादिकंविध्यर्थइतिभावः ननुभावियोवरात्यादौप्रवृत्तिवारणायेदानींतनकृतिसाध्यताज्ञानादेःप्रवर्त्तकत्वंवाच्यंतच्चविधिवाक्यानलभ्यतेततःकृतिसाध्यत्वेष्टसाधनत्वप्रकार
कज्ञानस्यैवोत्पत्तेरितिकथंप्रवर्त्तकंज्ञानंविधितइति अत्रवदंति नविधिःसाक्षात्प्रवर्त्तकंज्ञानमुत्पादयति किंतुविधिवाक्यादिष्टसाधनत्वेकृतिसाध्यत्वेचावगतेकिमिष्ट
मित्याकांक्षायांस्वर्गकामादिपदसमभिव्याहारात्स्वर्गस्यसाधनमितिज्ञानमानुमानिकंमानसंवोत्पद्यते अन्यथाविशेषरूपेणफलज्ञानाभावात्प्रवृत्त्यनुपपत्तेरेवमिदं

प्रमे इच्छासामग्री विरहांगीकारेण=

स्वेच्छाधीनत्वविशेषणेगौरवात्=

विधितः=

58

न्या॰कु॰टी॰ ५८

नींतनत्वांतर्भावेन कृतिसाध्यत्वादिज्ञानमत्रमानादिति अत एवोक्तं विधिजन्यं ज्ञानं तत्र प्रवर्त्तकमिति अत्र भट्टपादा लोके प्रवृत्तिहेतुः स्वेच्छाजन्यापरपर्येण तत्र्याश्च त ते॰

श्रायायां प्रवर्त्तना पुरुषव्यापारो गोपिद्वितीयप्रवृत्तो सा प्रयोजिका आचार्यप्रेरणायेदं करोमीति व्यवहारात् प्रवर्त्तनाच प्रवर्त्त्येषितुः प्रवृत्त्यनुकूलव्यापारविशेषः स चे

तनस्याभिप्राय एवाचेतनस्य तु वेदस्याभिधानामकः कश्चिद्व्यापारः समवेतः तथा चाचार्याभिप्रायज्ञानाद्यथा शिष्यः प्रवर्त्तते तथाभिधाज्ञानाद्धि धियस्यले प्रवृत्तिरि

ति सैव लिङ्‌र्थः सैव च शाब्दीभावना लिङ्‌त्वांशेनोच्यते अर्थीभावनात्वाख्यातत्वांशेन तदुक्तं अभिधाभावनामाहुरन्यामेव लिङ्‌दयः अर्थात्मभावनात्वन्या

सर्वाख्यातस्य गोचरेति अभिधा भावना शब्दस्निग्धभावना भिधाभावना अर्थी युगादिशतात्मा वा अर्थात्मकत्वं चार्थगोचरत्वमप्याश्रितत्वं वा तथा च यागा तदुक्तं॰

दिगोचरात्माश्रिता प्रवृत्तिरर्थीभावना अत्र च शाब्दीभावनाया अर्थीभावनैव भाव्याऽर्थीभावनाया अपूर्वफलं स्वर्गादीतिबोध्यम् लिङ्‌भिधा सैव च शाब्दीभावना भाव्या

च तस्याः पुरुषप्रवृत्तिः संबंधबोधः करणं तदीयं प्ररोचना चांगतयोपयुज्यत इति १ अस्यार्थः लिङ्‌भिधा वाच्या तस्याः किं भाव्यमित्याकांक्षायामुक्तं

भाव्या च तस्या इति केन भाव्येत्याकांक्षायां संबंधेति संबंधबोधः लिङ्‌दिपदशक्तिज्ञानं तच्चालस्येन निवर्त्तमानं पुरुषं स्वस्तित्वे नयतीति सा सहकारिणी ना

स्य प्ररोचनेतीति वदंति तन्न लोके स्वेच्छाधीनप्रवृत्ताविष्टसाधनताज्ञानस्य हेतुत्वेन क्लृप्तत्वादन्यत्रापि प्रवृत्तौ हेत्वन्तरस्य किमिति विरुद्धप्रवर्त्तनाज्ञानस्यातिरिक्तहेतु

त्वेन अत एव वेदेऽपि न प्रवर्त्तनाज्ञानं हेतुः शाब्दशक्तिभिन्नायामभिधायां मानाभावाच्च अत एवमंडनमिश्राः पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्त्तकः प्रवृत्तिहेतुं ध

र्मं च प्रवदंति प्रवर्त्तनामित्यादिना प्रवृत्त्यनुकूलत्वेनेष्टसाधनत्वमेव प्रवर्त्तनेत्युक्तवंतः नन्वेवं विश्वजिताद्यजेतेत्यादौ फलाश्रवणेनेष्टसाधनताज्ञानाभावात्प्रवृत्तिर्न

स्यादत आह इत्थं चेति इष्टसाधनत्वादेर्विध्यर्थत्वे चेत्यर्थः ननु नित्ये संध्योपासनादौ फलाभावान्नेष्टसाधनताज्ञानं प्रवर्त्तकं न वा तद्धि यो विध्यर्थ इत्यभिप्रायेण

शंकते नन्विति न चार्थवादिकमिति संध्यामुपासते ये तु सततं संशितव्रताः विधूतपापास्ते यांति ब्रह्मलोकं सनातनमित्यर्थवादबोधितमित्यर्थः नित्यत्वहानि

प्रसंगेरिति नित्यत्वकाम्यत्वयोर्विरोध इत्यभिमानः ननु तयोर्विरोधे मानाभावः अहरहः संध्यामुपासीतेत्यादिश्रुतिः संध्यामुपासते इत्यर्थवादयोरेकवाक्यतावलेन त

तत्कालजीविफलका म्यपाठः= त्कालाधीनविकल्पकामस्य संवलितो धिकारः कस्य न स्यात अत आह कामनाभावइति अकरणाप्रसंगेरिति अकरणे प्रत्यवायानुत्पत्त्यापत्तेरित्यर्थः कामनारूपाधिका

राभावात्तदनधिकृतोऽकरणस्य प्रत्यवायजनकत्वाभावादितिभावः ननु तथापि नित्यस्थलीयफलश्रुतेर्वैयर्थ्यमित्याशंक्यार्थवादत्वात्तत्र स्तुतिमात्रे तात्पर्यं कल्प्यत इत्य

त आह इत्थं चेति कल्पनादिति इदमुपलक्षणमर्थवादोपस्थितकामनाया अधिकारत्वेप्यकर्त्तव्यनिहितकर्मेत्यादिनाशौचे सति विहितानानुष्ठानस्य प्रत्यवायजनक

त्वबोधनात्कामनासंवलितस्याशुचित्वादेनाधिकारत्वे किं न नित्यस्थले फलकामनाशुचित्वाद्योरधिकारयोः संवलनं न तथाच कामनाविरहे पि अशुचित्वादिरूपाधि ५८

58A कारवतः शौचादिरूपाधिकारसत्त्वान्न तु संध्याकरणस्य प्रत्यवायजनकत्वमेव कामनायाः अधिकारत्वेपि नरधिकारवतः शौचादिविरहिणः संध्याकरणस्य प्रत्यवाय-
नित्ये= जनकत्वं न कल्प्यते श्रुचितत्कालजीवित्वरूपाधिकारैकदेशवतोप्यधिकरणे प्रत्यवायजनकत्वकल्पनेन संवलिताधिकारत्वेपि सति विरहाद्वेत्यपि द्रष्टव्यम् एतेन त श्रुचितत्कालजीवित्वाधिकारत्वांशीकारेण=२
न्नियमेन फलकामनासत्त्वे कामनाभावेपि न क्षतिः ननु नित्यगोचरप्रवृत्ताविष्टसाधनताज्ञानं कारणमेव नेत्यनेनैवोपपन्नो किमर्थं नित्यस्यापि काम्यत्वं कल्पनीयमत आह
मीमांसकमतं=५ ष्टसाधनत्वमिति अन्वयव्यतिरेकाभ्यां प्रवृत्तित्वावच्छिन्नं प्रतीष्टसाधनताज्ञानस्य हेतुत्वादिति भावः अत एव कुसुमाञ्जलौ संध्योपासनमफलमपि क्रियते वेदबोधितत्वादि
त्याशंक्य गुरुमतमेतन्न गुरोर्मतमित्यभिधायैवोपेक्षितमाचार्यैः यद्यपि पंडापूर्वं स्वतः प्रयोजनं नित्यस्य कर्मणस्तु तिप्रभाकरमतं तद्विदूषयति यद्यपीति कामनाभावे पंडापूर्वा
त्मकफलकामनाभावे रात्रिसत्रन्यायादिति यथाहि रात्रिसत्रशब्दवाच्यानां ज्योतिर्भिर्गिरित्यादिवाक्योत्पन्नकर्मणां फलजिज्ञासायामर्थवादानां स्वर्गादिकल्पने गौरवाद्धि प्रतिष्ठाजिर्म
यापवादेन प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति इत्यर्थवादश्रुतप्रतिष्ठैव फलमिति सिद्धान्तितं तथात्रार्थवादिकं ब्रह्मलोकएव फलं लाघवादित्यर्थः अन्यथा फलाभावे पा+
तेन आर्थवादिकफलकल्पने लाघवेन नत्वत्रार्थवादिकं फलं प्रदर्शयति अनुत्पन्नमित्यादिना अत एव पितृप्रीतेः श्राद्धफलत्वादेव उत्सर्ग इतीति श्राद्धादिफलस्य
पंडापूर्वं= कर्त्रगामित्वे तु व्यभिचाराभावान्नियमएव स्यादिति भावः पंडापूर्वस्वीकारेपि तत्साधनताज्ञानस्य प्रवर्तकत्वं न भवतीत्याह पंडापूर्वार्थमिति न वा तत्साधनमिति तथा च
चेच्छाविषयत्वाभावेन फलत्वाभावात्तत्साधनताज्ञानं प्रवर्तकमिति भावः ननु त्वन्मतेपि प्रत्यवायानुत्पत्तेः कथं फलत्वं स्वतः पुरुषार्थत्वाभावात् न वा दुःखानुत्पत्तिरूपपु
रुषार्थसाधनत्वेन तत्रेच्छाविषयत्वं दुःखानुत्पत्तेः प्रागभावरूपायाः जन्यत्वादित्याशंक्य परिहरति प्रत्यवायेत्यादिना अन्ते स्यत्राविनुदेश्यत्वसमभ्यर्थः कथं प्रवृत्ति
रिति पूर्वोक्तरीत्या प्रत्यवायानुत्पत्तेः फलत्वाभावेन तत्साधनताज्ञानस्य प्रवृत्तिहेतुत्वात् संध्यावन्दनादौ च कथं प्रवृत्तिरित्यर्थः प्रत्यवायाभावः प्रत्यवायप्रागभावः त
दभावे संध्यावन्दनादिनित्याभावे तदभावः प्रत्यवायाभावस्याभावः तदभावे प्रत्यवायाभावस्याभावे तदभावः दुःखप्रागभावाभावो दुःखरूपः योगक्षेमसाधार
णेति योगः अप्राप्तस्य प्राप्तिः क्षेमः सिद्धस्य संरक्षणं प्रवृत्तेः प्रतीष्टसाधनताज्ञानस्य हेतुतायां साधनतायाः क्षेमसाधारण्याएव प्रविष्टत्वादिति भावः प्रागभावस्य प्र
तियोगिविकल्पग्रासेन फलत्वासंभवात्प्रत्यवायात्यन्ताभाव एव नित्यस्य फलं स्वरूपसंबंधविशेषात्मक क्षेमसाधारणजन्यताया अत्यन्ताभावे सत्त्वादिति नव्याः
एवमेव योगक्षेमसाधारणमेव नञ्चनकलंजमिति अत्र कलंजभक्षणाभाव इष्टसाधनमित्यन्वयबोधाभ्युपगमे बाधकाभावादाह विध्यर्थेकथं नञर्थेति वि
ध्यर्थेन नञर्थयोः कथमन्वयः विध्यर्थेष्टसाधनत्वान्वितनञर्थस्याभावस्य कलंजभक्षणे कथमन्वय इत्यर्थः अशाक्यत्वादिति कलंजभक्षणे तस्य बाधादि

नकलंजंभक्षयेदित्यादौ निषेधे तु बलवदनिष्टाजनकत्वं विध्यर्थः
तदभावस्तु नञर्थः बलवदनिष्टजनकं कलंजभक्षणं कः पुरुषइत्य
न्वयः=१

इष्टसाधनताभाव
स्य कृतिसाध्यत्वा
भावस्य च=१

तथाचकलंजनिष्टफलाधःसंयोगानुकूल
बलवदनिष्टजनककृतिसाध्यव्यापारानुकू
लकृतिमानितिवाक्यार्थः=४

बलवदनिष्टाननुबंधित्वस्य=५

59
न्या॰मु॰टी॰
५९

तिभावः बलवदनिष्टाननुबंधित्वमात्रमिति विधेःकृतिसाध्यत्वादिष्वित्रिषुशक्तित्रयस्वीकारेणकृवित्वस्यचित्वस्यचिरर्थस्यबोधस्वीकारादितिभावः प्रत्येकंप्रतिकृतिसाध्यत्वविशि
ष्टबलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वज्ञानत्वेनैकमेवहेतुत्वंलाघवान्नतुकृतिसाध्यत्वादिप्रत्येकविषयकज्ञानत्वेनगौरवात्तेनाविधेरपिविशिष्टमेवशक्यंवाच्यम् एवंच
त्वनिषेधस्थलेपिविशिष्टाभावोविधिसमभिव्याहृतनञाबोध्यतइत्यभिप्रायवानाह अथवेति विशेषणाभावेविश्राम्यतीति एवंचेष्टसाधनत्वादिमतिकलंजभक्षणेदोविशिष्टा
भावोबोध्यमानोबलवदनिष्टाननुबंधित्वाभावेपर्यवस्यतीतिभावः विशिष्टस्यविध्यर्थत्वेश्येनेनेवबलवदनिष्टाननुबंधित्वरूपविशेषणबाधात्कथंविशिष्टस्यविध्यर्थस्यबोधइत्याशं
कते नवश्येनेनेति श्येनेनेतिकर्मनामधेयम् अभिचरन् शत्रुमारणंकामयन् कथमिति श्येनेनेतस्यबाधितत्वादितिभावः अर्थः विधिजन्यबोधविषयः वैधेयत्वान्निषेधइति य
ज्ञीयपश्वालंभनानुरोधेन नहिंस्यादितिनिषेधस्यवैधहिंसेतरहिंसापरत्वादितिभावः अभिचारइति तथाचाभिचारमहीनंचत्रिभिर्कृच्छ्रैर्व्यपोहतीत्यत्रप्रायश्चित्तोपदेशवैयर्थ्यापत्त्या
निषेधविधेस्तदितिरिक्तपरत्वंनसंभवतीतिभावः नचैवंयज्ञीयपशुहिंसायाअपिप्रत्यवायजनकत्वापत्तिरितिवाच्यम् अनुपदिष्टप्रायश्चित्तहिंसेतरहिंसापरत्वान्निषेधविधेरि
ति साक्षान्मरणानुकूलव्यापारएवहिंसानहिश्येनेनमरणेतिनहिंस्यादितिनिषेधाविषयत्वादस्येवबलवदनिष्टाननुबंधित्वमित्यभिप्रायेणसाक्षात्परम्परासाधारणमरणानुकू
लमात्रस्यहिंसात्वेदोषमाह मरणानुकूलव्यापारमात्रंयदिहिंसातदेति साक्षात्परंपरासाधारणःसर्वोपिव्यापारोयदिहिंसातदेत्यर्थः ननुमरणोद्देश्यकत्वनिवेशोऽस्त्वोद्देशेनप्र
वृत्तिमनाराचेनयत्रब्राह्मणमरणंतित्रप्रायश्चित्तंनस्यात्तस्याहिंसात्वाभावेननहिंस्यादितिनिषेधाविषयत्वादतआह अन्योद्देश्यकेति वाचनिकमिति ननुनहिंस्यादितिनिषेधविष
अभिचारस्यार्थकता= यत्वेतिभावः अदृष्टाद्वारकत्वेनेति श्येनस्यादृष्टद्वारैववैरिमरणसाधनत्वादितिभावः नन्वस्तुश्येनस्यहिंसात्वंकिमदृष्टाद्वारकत्वविशेषणेनेत्यतआह अतएवेति अदृष्टा
द्वारकत्वविशेषणादेवेत्यर्थः नहिंसात्वमिति तथाचनाराचशस्त्रेणबलवहुतनारेहिंसात्ववारणायावश्यकेनादृष्टाद्वारकत्वविशेषणेनैवश्येनस्यापिहिंसात्ववारणमितिभावः न
तुसाक्षान्मरणजनकत्वविशेषणादेवनाराचशस्त्रजन्यश्येनादेर्वारणेकिमदृष्टाद्वारकत्वेनगुरुविशेषणेनेतितदस्यःशंकते नचसाक्षादिति अदृष्टाद्वारकत्वविशेषणंवि
नैवश्येनेबलवादनिष्टाननुबंधित्वमुपपादयतांमतमाह केचिदिति हिंसाफलमिति साक्षान्मरणफलकव्यापारःफलमित्यर्थः तस्य खड्गादिघातादेः पापजनकत्व
मिति अभिचारमहीनंचेत्यादिनाभिचारस्यपापजनकत्वबोधनात्साक्षान्मरणजनकव्यापारस्यैवाभिचारपदार्थत्वादितिभावः नचएवंनैचेत्यादिनासाक्षान्मरणजनकव्यापारस्यै
वहिंसात्वमित्यस्याशंकितत्वात्तेनैपौनरुक्त्यमितिवाच्यम् एवंसाक्षान्मरणजनकस्यश्येनजन्यापूर्वस्यहिंसात्वमाशंकितमिहचतत्प्राप्तस्यखड्गाभिघातादेरितिभेदात् न
वादिपदेनश्येनजन्यापूर्वस्यततप्राप्तस्यग्रहणात्कथंभेदइतिवाच्यम् श्येनजन्यापूर्वस्येवतन्मतेखड्गाभिघातंप्रत्येवव्यापारतयातस्यमरणजनकत्वाभावात् नचसाक्षा

विशेष्यंकृतिसाध्यत्वं तदुत्तरभक्षणतत्रबोध्यमानोविशिष्टाभावःकृतिसाध्यत्वस्य विशेषणीबलवदनिष्टाननुबंधित्वेपर्यवस्यतीत्यर्थः=३

साक्षान्मरणजनकस्य=२

५७

नचसाक्षान्मरणजनकत्वस्यैवहिंसात्व
मित्यादियन्मतेपूर्वउक्तंतेन=३

खड्गघातस्य=२ अभिचार=४

591 मरणजनकव्यापारस्य हिंसात्वे खड्गघातेन ब्राह्मणेऽब्राह्मणपाकपरंपरया मृते हिंसात्वानुपपत्तिस्तदवस्थैवेति वाच्यम् तत्र खड्गघाताक्रमेण सन्निपातादिदोषस्योत्पत्त्या मरणं
प्रति तस्य व्यापारतया व्यापारेण व्यवधानासंभवात् कुतस्तर्ह्यास्तिकानां श्येनेन प्रवृत्तिरत आह अग्रिमेति तथा च पापप्रयोजकत्वान्न तत्रास्तिकानां प्रवृत्तिरिति भावः अत्र
नव्याः मास्तु श्येनस्य न हिंस्यादिति निषेधविषयत्वं तथाप्यभिचारतया पापजनकत्वं सर्वसंमतमभिचारस्योपपातकमध्ये मनुना परिगणितत्वादिति कथं तस्य बलवदनिष्टाननुबं श्येनस्य=
धित्वम् यच्चोक्तं श्येनजन्यखड्गाभिघातादेरेवाभिचारतया पापजनकत्वं न श्येनस्येति तदपि न अभिचारमहीनं चेत्यत्राभिचारपदेन तज्जनकश्येनादेर्ग्रहणात् अन्यथा प्रत्यभिचा अभिचारपदेन श्येनाग्रहणे=४
रेण यत्र न खड्गघातादिकं तत्राप्रायश्चित्तं न स्यात् एवमपि श्येनेऽपापप्रयोजकतया बलवदनिष्टाप्रयोजकत्वोपपादनस्य चाशक्यत्वाच्च प्रवृत्तिं प्रति बलवदनिष्टाप्रयोजक
त्वज्ञानस्यैव जनकतया तादृशविषयस्यैव विध्यर्थत्वात् तथा च श्येनस्य बलवदनिष्टाननुबंधित्वमुपपाद्य विधेर्बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वविशिष्टकृतिसाध्येश
क्तिरयुक्ता किं तु त्रिषु शक्तिं स्वीकृत्य क्वचित्कस्यचिदर्थस्य बोध इत्यंगीकरणीयं श्येनेनेत्यादौ बलवदनिष्टाननुबंधित्वस्य बोधो न भवत्येव परं त्विष्टसाधनत्वकृतिसाध्यत्वयोरेवेति किं
त्वविशेषणविशेष्यभावे विनिगमनाविरहेणापि विशिष्टे शक्तिर्न युक्ता न च प्रत्येकं शक्तिमभ्युपेत्य क्वचित्कस्यचिदर्थस्य बोधोपगमे नियामकाभाव इति वाच्यम् तात्पर्यस्यैव निया
अगम्यागमनं बलवदनिष्टाननुबंधीति भ्रमात्मकं ज्ञानमिति ज्ञाननिबंधनोऽप्रामाण्यव्यवहारः=९ मकत्वात् प्रत्येकशक्तिपक्षे गम्यां गच्छेदित्यादिवाक्यानामिष्टसाधनत्वादिप्रमाजनकतया प्रामाण्यापत्तिरित्यपि न इष्टापत्तेः तत्राप्रामाण्यव्यवहारस्तु कदाचिद्बलवदनिष्टा
ननुबंधित्वभ्रमजनकत्वनिबंधनः न च बलवदनिष्टाननुबंधित्वे सतीष्टसाधनत्वे सति कृतिसाध्यः पाक इत्येव बोधो न तु कृतिसाध्यत्वे सतीत्यादिरूप इति विशिष्टशक्तिपक्षेऽपि न
विनिगमनाविरह इति वाच्यम् तथैव बोधो नान्यथेत्यस्य शपथनिर्णेयत्वात् तस्माद्बलवदनिष्टाननुबंधित्वादिषु प्रत्येकं शक्तिरिति प्रथमकल्प एव युक्तः तत्रापि बलवदनिष्टाननुबं प्रत्येकं शक्तिस्वीकारे=
धित्वं नार्थः यागादिजन्यनांतरीयकदुःखस्यापि यागकर्तुः कस्यचिद्बलवद्द्वेषविषयतया यजेतेत्यादीनामप्रामाण्यापत्तेः न कलंजमित्यादिनिषेधविधिवदश्वमेधेन यजेतेत्यादी नेन
नामप्रामाण्यापत्तेश्च अश्वमेधे हि यदा यः पुरुषः प्रवर्तते तत्कालीनतत्पुरुषीयबलवद्द्वेषविषयाजनकत्वमर्थ इति न मतं कालभेदेन पुरुषभेदेन च विधिशक्तिकल्पने गौरवात् कालविशे
षपुरुषविशेषाणां विशिष्य ज्ञातुमशक्यतया कालविशेषपुरुषविशेषाणां तत्र भावेन शक्तेर्ग्रहीतुमशक्यत्वाच्च नाश्वमेधेन यजेतेत्यादिनिषेधविधिवन्न कलंजं भक्षयेदिति निषेधविधीनामप्रामा
प्राक्कनिष्टगत्वाधःसंयोगाद्यनुकूलरोगजनकव्यापारानुकूलकृतिमान्= ण्यापत्तेश्च तत्र यदा यः पुरुषः प्रवर्तते तत्कालीनतत्पुरुषीयबलवद्द्वेषविषयाजनकत्वस्य तत्रापि सत्त्वात् किं तु वैदिकविधेः पापाजनकत्वमर्थः तदभावश्चाजनकत्वं कलंजं भक्षयेदित्या कलंजनिष्टगत्वाधःसंयोगानुकूलपापजनकव्यापारानुकूलकृतिमान्=
दौ बोध्यते शाकं न भुंजीतेत्यादिवाक्यस्याप्रामाण्यनिवारणाय रोगाजनकत्वमप्यर्थः एवं पुष्टो नो दृष्टेत्येकः पर्वतमारोहेदित्यादावपि तन्नरकनिष्टाजनकत्वमर्थो बोध्यः नव्यास्त्वानंत्यं
नरकत्वरोगत्वादीनां द्वेषविषयतावच्छेदकेनोपलक्षणीभूतेनानुगमय्य तदवच्छिन्नप्रतियोगिताकाभावकूट एव शास्त्रमुपगमात् रोगाद्यजनकत्वादौ लौकिकलिङो लक्षणाभ्यु
पगमाद्धेतिवदंति विध्यर्थे चाचार्याभिप्रायः न च स इष्टसाधनतानुमापकः स्वेष्टसाधनताज्ञानं च प्रवर्तकमित्युदयनाचार्यमतमाह आचार्यास्त्विति पाकं कुर्यादित्यादावित्यादि

प्रथमपुरुषः इच्छावाची प्रथमपुरुषत्वात्
उत्तमपुरुषवत्=२

60

न्या॰कु॰टी॰
६०

मापाकं कुर्यामित्युत्तमपुरुषपरिग्रहः आज्ञादीत्यादि आज्ञेषणापरिग्रहः तथा च पाकं कुर्याः पाकं कुर्यामिति मध्यमोत्तमपुरुषयोराज्ञाध्येषणारूपेच्छावाचित्वं क्रमेण तदिहान्ते
न प्रथमपुरुषे यीच्छावाचित्वमनुमेयमिति भावः लाघवादिति बलवदनिष्टाननुबंधीष्टसाधनत्वाद्यपेक्षया इच्छात्वेन विधिशक्तौ लाघवादित्यर्थः इत्यर्थः इति बोधः ननु प्र
थमांतपदोपस्थाप्यस्याख्यातार्थे नियमादाख्यातार्थस्यानुकूलत्वविषयित्वान्यतरसंबंधेन धात्वर्थे विशेष्यत्वनियमाच्च प्रथमांतपदोपस्थाप्यस्य स्वर्गकामा
देराख्यातार्थे आख्यातार्थस्य च धात्वर्थेन्वयः अन्यथा चैत्रः पचतीत्यादावपि चैत्रवृत्तिकृतिसाध्यः पाक इत्यन्वयबोधापत्तिरिति चेदन्यत्र तथा नियमेप्यत्र व्युत्पत्तिवैचित्र्यादि
ति गृहाण अतएवेष्टसाधनत्वविधिशक्तिपक्षेपि प्राचीनाः स्वर्गकामकृतिसाध्यः स्वर्गसाधनं याग इति बोधमंगीकुर्वंति अनुमायेति अत्र च यागो मम स्वर्गकामस्य बल
वदनिष्टाननुबंधीष्टसाधनं मत्कृतिसाध्यतया इष्यमाणत्वात् मन्मात्रकृतिसाध्यतयेष्यमाणमन्नभोजनवदित्यनुमानमवधेयम् तदभावात् आप्तेच्छत्वाभावेन तदुक्तके आप्तेच्छत्व-
ष्टसाधनत्वज्ञानाभावात् ननु वेदवक्तुरभावात्कस्येच्छा लिङा बोधनीयेत्यत आह यत्त्विति विधिरेवेति वक्तृभिन्नेच्छाया बोधने विधेः सामर्थ्याभावाद्विधिरेव वेदवक्तरीप्स
रेमानमिति भावः नच कर्तुरस्मरणमिति कर्तुः वेदकर्तुः अस्मरणात् स्मृतिभिरबोधनम् तथा च वेदोऽपौरुषेयः स्मर्यमाणकर्तृकत्वादित्यनुमानं बाधकमित्य
र्थः कपिलकणादेति कपिलकणादगौतमादिभिस्तच्छिष्यैश्चाद्यपर्यंतमित्यर्थः कर्तुः स्मरणस्य सकर्तृकत्वबोधकस्मृतेरित्यर्थः नन्वीश्वरस्य वेदकर्तुः सर्गा
दौ केनचित्साक्षादृष्टत्वादननुभवे स्मरणं तदभावे ऋषीणां स्मृतिप्रणयनं च न संभवतीति चेन्न पौरुषेयत्वानुमानेन वेदकर्तारमनुभूय तन्मूलकस्मृतिप्रणयन
योः संभवात् अन्यथा वेदे सकर्तृकत्वानंगीकारे तत्रैव स्मृतिष्वेव वेदस्य सकर्तृकत्वे श्रुतिं प्रदर्श्य स्मृतिमपि प्रदर्शयति एवमिति ननु वेदस्यानित्यत्वबोधकं भारतादे
वचनस्याकर्तृकत्वे प्रमाणं भविष्यतीत्याशंकते स्वयंभूरिति नित्य इत्यर्थः भगवानित्यपि वेदविशेषणम् स्तुतिमात्रमिति तथा च सर्वोक्तश्रुतिस्मृत्योर्विरोधेनास्य भारतस्य
न स्वार्थे तात्पर्यमपि तु स्तुतिपरत्वमिति भावः भ्रमादिसंभवात् पुरुषस्य भ्रमप्रमादादिदोषसंभवादित्यर्थः नित्यसर्वज्ञत्वेनेति नित्यसर्वविषयकज्ञानवत्त्वेनेत्यर्थः नि
र्दोषत्वात् भ्रमादिशून्यत्वात् अतएव नित्यसर्वज्ञत्वाभावादेव ननु नित्यसर्वज्ञपुरुषप्रणीतत्वापेक्षया नित्य निर्दोषत्वे वेदस्वीकृत्य तदेव वेदप्रामाण्ये प्रयोजकमस्तु त
था च सकर्तृकत्वानुमाने बाध इत्यतो वेदस्यानित्यत्वे बाधकमाह किं चेति तत्संदर्भस्येति तन्निष्ठानुपूर्वीविशेषस्येत्यर्थः आनुपूर्वी नित्यत्वे तु नित्यसमवेतनित्यस्य जाति
त्वेन आनुपूर्व्या अपि जातित्वापत्तेरिति भावः अत्र चाप्तेच्छाविषयत्वस्येष्टेच्छाविषयत्वरूपस्य केवलान्वयिनः कलंजभक्षणेपि सत्त्वाद् बलवदनिष्टाननुबंधित्वविशि
ष्टेष्टसाधनत्वरूपसाध्यस्य च तत्राभावेन व्यभिचारात्कथं तस्य तदनुमापकत्वं बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वप्रकारकेच्छाया लिङर्थत्वे च लाघवाद्बलवदनि
ष्टाननुबंधीष्टसाधनत्वमेव लिङर्थो लघुतमात्मेच्छेत्यस्वरस आचार्याणामित्यनेन सूचितः न चेष्टसाधनत्वस्य न विधितो बोधः संभवति स्वर्गत्वावच्छिन्नसाधनत्वस्य यागे ६०

स्वर्गकाम इत्यत्र स्वर्गसाधनत्वे कुत्रचित्स्वर्गसाधनत्वं कुत्र
वृष्टिकाम इत्यत्र वृष्टिसाधनत्व=७ वृष्टिसाधनत्वम्=५

60 A

वाधात् गंगास्नानादिजन्यस्वर्गेव्यभिचारात्स्वर्गनिष्ठवैजात्यावच्छिन्नसाधनत्वस्य च यागेसत्वेपि तद्वैजात्यस्य विधिबोधितस्वर्गसाधनत्वान्यथानुपपत्त्या कल्पनीयस्य ग्र
गनुपस्थित्या तद्घटितकारणत्वे विधिशक्तिग्रहायोगादिति चेन्न स्वरूपसंबंधविशेषरूपाया एव कारणताया विध्यर्थत्वोपगमादित्येके अन्यथासिद्धिनिरूपकतानवच्छे
दक नियतोत्तरवर्त्तितावच्छेदकधर्मवत्त्वं स्वर्गकत्वमेव स्वर्गकारणत्वमित्यन्ये वस्तुतस्तु स्वर्गनिष्ठधर्मावच्छिन्ननिरूपितनियतपूर्ववर्त्तितावच्छेदकधर्मवत्त्वमेव स्वर्गकारणत्वं त
च्च यागेन बाधितं स्वर्गनिष्ठवैजात्यरूपस्वर्गधर्मावच्छिन्नं प्रति यागस्य व्यभिचाराभावात् स्वर्गपदस्य विजातीयस्वर्गे लक्षणेति तत्त्वम् ननु विधेरिष्टसाधनत्वे शक्तत्वेपि स्वर्ग
विधितः=५ साधनत्वस्य तेनो बोधः स्वर्गसाधनत्वादौ विधिशक्तिकल्पने तु शक्त्यानन्त्यम् न च विधिप्रत्ययोपस्थिते इष्टे स्वर्गस्याभेदेनान्वया स्वर्गाभिन्नेष्टसाधनत्वस्य बोधः संभवतीति
पदार्थः पदार्थेनेति व्युत्पत्तिविरोधात्=६ वाच्यम् स्वर्गपदस्य समासान्तर्गततया तदर्थस्यान्यत्रान्वयासंभवादिति चेन्न स्वर्गसाधनत्वादौ विधिशक्तिकल्पनेन न तथा बोधनिर्वाहात् नचैकैकस्य बोधे विनिगमका स्वर्गसाधनत्व वृष्टिसाधनत्व=६
भावः स्वर्गादिपदसमभिव्याहाराधीनतत्तद्धर्मघटितसाधनत्वे तात्पर्यग्रहस्यैव विनिगमकत्वात् न चैवं विधिशक्त्यानन्त्यम् स्वर्गत्वादिधर्मावच्छिन्ननिरूपितसाधनत्वे एकश
क्त्युपगमात् न च शक्यतावच्छेदकभेदाच्छक्तिभेदः इष्टतावच्छेदकत्वेन स्वर्गत्वादीन्यनुगतीकृत्य तदवच्छिन्ननिरूपितसाधनत्वे एकशक्त्युपगमात् न चेष्टतावच्छेदकत्वेन शाब्दबोधे स्वर्गादी
नां भानं स्यान्न तु स्वरूपत इति वाच्यम् इष्टतावच्छेदकत्वस्योपलक्षणतया शक्तिविषयत्वाद्विशेषणस्यैव शाब्दबोधे भानोपगमात् उपलक्षणत्वं च तत्पदजन्यबोधविषयत्वेन शा
क्यविषयत्वं तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वमेव च विशेषणत्वमित्यन्यत्र विस्तरः॥ इति विध्यर्थः॥ उपादानस्येति समवायिकारणस्येति तत्साध्यकप्रवृत्तिं प्रति तत्स घट=
मवायिकारणात्मकतदुपादानगोचरलौकिकप्रत्यक्षस्य हेतुत्वम् नच शब्दसाध्यकप्रवृत्तिर्दंगादौ न स्यात्तदुपादानस्य गगनस्यातीन्द्रियत्वात् तदेव ध्वंससाध्यकप्रवृत्तिरपि तत्सम
वायिनोऽप्रसिद्धेरिति वाच्यम् इष्टापत्तेः शब्दसाक्षात्कारसाध्यकप्रवृत्तेरेव दंगादिगोचराया उपगमादिति प्राचीनमतानुसारेणेदम् नवीनमते त्वधिष्ठानमात्रमुपादानं बोध्यम्
तेन यागादेर्हविः शब्दस्य दंगादिः प्राणसंचारादेश्च प्राणवहनाड्यादिरुपादानमिति बोध्यं॥ इति प्रवृत्तिजनकनिरूपणम्॥ फलेच्छेद्वेषादिति फलगतो द्वेषो द्विष्टसाधनताज्ञानं च
निवृत्तिं प्रति कारणमित्यभिप्रायेणोक्तम् इति निवृत्तिजनकनिरूपणम् प्राणसंचारो हीति अधिकश्वासादिरूपः प्राणसंचारो यत्नसाध्यः प्रत्यक्षयत्नसाध्यतया दृष्टः धाव
तः प्रयत्नोत्कर्षेण श्वासक्रियोत्कर्षदर्शनादिति भावः इत्थं चेति दृष्टान्तसिद्धावित्यर्थः सर्वस्येति एकत्र यत्नसाध्यत्वस्यानुभाविकत्वे न तद्दृष्टान्तेन प्राणसंचारत्वावच्छेदेन भोक्त
जन्यत्वानुमानादिति भावः स एव प्राणसंचारहेतुत्वेनानुमीयमान एव न यात्न जीवनयोनियत्ने मानाभावः प्राणक्रियाया अदृष्टविशेषप्रयोज्यात्ममनःसंयोगरूपाज्जीव
नाख्ययोजकादृष्टाद्यसंभवाद्दुष्कानुमानस्य चाप्रयोजकत्वात् अन्यथा एकत्र यत्नेच्छाजन्यत्वदृष्टान्तेन यत्नतावच्छेदेन ज्ञानजन्यत्वकल्पनापत्त्या सुषुप्तौ ज्ञानादेरप्यतीन्द्रि
यस्य कल्पनापत्तेरिति प्राहुः॥ इति यत्नग्रंथः॥ पतनसमवायिभिन्नत्वरूपस्य पतनासमवायित्वस्य रूपादावतिव्याप्तिरतो व्याचष्टे असमवायिकारणमिति द्वितीयादिपतनस्य

वेगासमवायिकारणत्वादाह आद्येति एवंचसंयोगासमवधानकालीनाक्रियागुणासमवायिकारणिकाक्रियात्वात् संयोगजन्यक्रियावदित्यनुमानेनगुरुत्वसिद्धिरितिभा
वः॥इतिगुरुत्वग्रंथः॥ अग्निसंयोगजन्यमिति अग्निसंयोगासमवायिकारणकमित्यर्थः वक्ष्यमाणातिप्रसंगादाह स्नेहरहितमिति तच्चसांसिद्धिकमेव तथाचसांसिद्धिक
द्रवत्वत्वेनहेतुत्वान्नसुवर्णादिद्रवत्वत्वेनसंग्रहइतिभावः नचावश्यकहेतुत्वेनैवातिप्रसंगेसांसिद्धिकद्रवत्वस्यसंग्रहहेतुत्वेमानाभावइतिभावः स्नेहत्वेनसांसि
द्धिकद्रवत्वत्वेनवाहेतुत्वमित्यत्रविनिगमनाविरहेणोभयस्यापिहेतुत्वात्॥इतिद्रवत्वग्रंथः॥ असौ तैलेप्रतीयमानस्नेहः जलीयः तैलान्तर्गतजलभागनिष्ठः
तथासति तैलान्तर्गतजलभागस्वीकारे दहनप्रातिकूल्यप्रसंगात् दहननाशप्रसंगात् दहननाशंप्रतिसंयोगेनजलस्यहेतुत्वादितिभावः॥इतिस्नेहग्रंथः॥वे
गोजन्यतइति वेगत्वंतुजातिविशेषःप्रत्यक्षसिद्धः तेनचेति कर्मनाशकस्योत्तरसंयोगस्यतदानीमभावाद्वेगस्यैवकर्मनाशकत्वंकल्प्यतइतिभावः ततइति पूर्वकर्मना
शानंतरमित्यर्थः एवमग्रेपीति उत्तरकर्मणापिपूर्ववेगनाशस्ततोवेगांतरोत्पत्तिरित्येवमादिक विनाचवेगमिति वेगंविनाकर्मनाशोनस्यादित्यन्वयः नाशकांतराभा
वादितिभावः ननुपूर्वकर्मणोनाशाभावेकोक्षतिरतआह कर्मोत्पत्तिर्नस्यादिति अत्रहेतुः कर्मणःप्रतिबंधकत्वादिति अत्रकेचित् उत्तरसंयोगेनैवपूर्वकर्मनाशो
त्तरकर्मणःसंभवात्पूर्वकर्मनाशकेकर्मोत्पत्तिस्वीकारेप्रयोजनाभावात्स्थूलंवेगेनतस्माद्वेगेनगच्छतीतिकर्मजनकतयाप्रत्यक्षमेववेगेप्रमाणमित्याहुः पुनर्गमन
स्येति यथापूर्वसंयोगजनकक्रियायाइत्यर्थः स्थितिस्थापकसाध्यत्वादिति वेगस्यतूत्तरदेशसंयोगजनकक्रियाजनकत्वंनतुयथापूर्वसंयोगजनकक्रिया
जनकत्वमितिनवेगेनस्थितिस्थापकस्यान्यथासिद्धिरितिभावः स्थितिस्थापकत्वंजातिविशेषःक्रियाविशेषजनकतावच्छेदकतयासिद्धः स्थितिस्थापकश्च
क्रियाविशेषजन्यःक्रियाविशेषजनकःस्वजन्यक्रियानाश्योतींद्रियश्चेतिमूलेउक्तप्रायम् इत्थंच उक्तप्रकारेणापेक्षाज्ञानात्स्मृतिवारणेच वस्तुतःसं
स्कारंप्रत्युपेक्षान्यनिश्चयत्वेनहेतुत्वेएवविनिगमकमस्तीत्याह किंचेति संस्कारकल्पनस्यगुरुत्वादित्यस्यसंस्कारंप्रत्येवोपेक्षान्यनिश्चयत्वेनहेतुत्वादि
त्यादिसिद्धत्वादित्यग्रिमस्यापिपूर्वंचप्यतस्येनेत्यनेनान्वयः तत्र संस्कारे उद्देश्यवाचकपदस्यप्रागुपेक्षितत्वात्तथाचान्वयप्रदर्शनार्थमुदीच्यस्याप्यसावित्यस्यप्र
असौसंस्कारइति= ग्धारणमितिबोध्यम् अतःसंस्कारःकल्प्यतइति अथानुभवस्यध्वंसएवव्यापारोस्तुप्रतियोग्यभावयोरेकत्राजनकत्वमित्यस्याप्रयोजकत्वात् नचानुर एककार्ये=
भवस्यस्मृतिप्रतिबंधकत्वापत्तिरितिवाच्यम् संसर्गाभाववत्त्वावच्छिन्नकारणताश्रयीभूताभावप्रतियोगित्वस्यैवप्रतिबंधकतापदार्थत्वादिहचसंसर्गाभा
वत्वेनाजनकत्वात् नचानुभवद्वितीयक्षणोत्पन्नसंस्कारेणतृतीयक्षणेस्मरणसंभवाद्ध्वंसस्यव्यापारत्वंनसंभवतिफलस्यप्राक्कालेनुभवध्वंसस्या
भावादितिवाच्यम् तत्रापिद्वित्रक्षणविलंबेनैवस्मरणाभ्युपगमादितिचेन्न संस्कारानंगीकारेकदाचिदनुभूतस्यसर्वदास्मरणापत्तेः अनुभवध्वंसात्मकव्यापा

61A

रस्य सर्वदा सत्वात् नचोद्बोधकाभावात्स्मरणमितिवाच्यम् यत्रवस्तुविशेषज्ञानोत्मकोद्बोधकेनदशापंचवाषयादेः स्मरणात्रिजनितानिनत्वधिकानितत्रघटादिस्मरतीतद्दृस्त्वज्ञा
नस्येवनियतोद्बोधकतयातत्सत्वेउद्बोधकाभावस्यवक्तुमशक्यत्वात् वस्तुतस्त्वनुपरवस्यमाणात्दर्वसाधकयुक्त्यासंस्कारसिद्धिर्निरावाधेतिध्येयम् स्वस्वव्यापारान्यतराभावे
कार्याव्यवहितपूर्वक्षणेस्वस्वव्यापारान्यतराभावे कारणत्वासंभवादिति कार्याव्यवहितप्राक्क्षणवृत्तिस्वस्वव्यापारान्यतरकत्वस्येवकारणतापदार्थत्वादितिभावः
अप्रयोजकत्वादिति संस्कारमन्यत्वस्यस्मृतित्वे प्रयोजकत्वाभावादित्यर्थः मणिमतंप्रदर्शयति परेत्विति त्वन्मतेतराकल्पनीयस्मृतिव्यक्तावुद्बु संस्कार संस्कारस्यहेतु
त्वकल्पनेमन्मतेतुप्रत्यभिज्ञायांतद्धेतुत्वकल्पनमितिसमानमंतरास्मृतिव्यक्तिकल्पनेप्रत्यभिज्ञायांतद्धेतुत्वकल्पनेचतवाधिकंगौरवमित्याहुरित्यनेनास्वरसः सूचितः
इति स्का र ग्रं थ स्वर्गादीत्यत्रस्वर्गपदेनसुखमात्रस्य आदिपदेनशरीरेंद्रियादेःपरिग्रहइतिप्रदर्शयति स्वर्गादिसकलेत्यादिना अग्रेनरकादीनामित्यत्राप्येवम् तत्र धर्मे
यागादीति आदिनाहोमदानपरिग्रहः यागत्वंचदेवतोद्देश्यकस्वस्वत्वध्वंसवद्द्रव्यविशेष्यकेच्छात्वम् देवतोद्देश्यकत्वंदेवतास्वत्ववद्विशेष्यकत्वम् शद्रमयीदेवतेतिप्र
सिनतस्येदमित्यारोपज्ञानविषयत्वम्दृश्यत्वम् होमत्वंचाग्निसंयोगानुकूलक्रियानुकूलयतादिवृत्तिनोदनादिव्यापारत्वम् दानत्वंचमूल्यग्रहणंविनास्वस्वत्वध्वंस
परस्वत्वजनकत्यागत्वमितिसंप्रदायः यागत्वहोमत्वादयोमानसप्रत्यक्षगम्याजातिविशेषाइत्यपरे आहस्यपित्रपेक्षयायागत्वेनब्राह्मणापेक्षयादानत्वेनतत्रसांकर्यान्ने दानत्वंकेवलदाने यागत्वंकेवलयागे यागत्वदानत्वप्रा
दंचुक्तमित्यपरे अन्यथा धर्माभावे चिरविनष्टस्याप्यनुभवस्यस्मृतिजनकत्वादाह निर्व्यापारतयेति चिरध्वस्तमिति चिरकालंनष्टंकर्मातिशयमदृष्टंविनाफलाया
लंफलजननंतनसमर्थमित्यर्थः तथात्वे ध्वंसप्रतियोगिनोरेकत्रजनकत्वाभावे एकमेवादृष्टंकल्प्यतइति वस्तुतस्तुयागस्यापिध्वंसोनव्यापारः तथात्वेकीर्त्तितया ध्वंसव्यापारकत्वे=
कीर्त्तितप्रतियोगिता कभेदस्वान्यागःस्व र्गजनकः= गात्स्वर्गोत्पादद्वारणायस्वर्गजनकतावच्छेदककोटौकीर्त्तितभेदोनिवेशनीयस्तत्रचकीर्त्तितत्वस्यैकस्याभावेनकीर्त्तितत्वावच्छिन्नप्रतियोगिताकभेदनिवेशनमशक्यमतः कीर्त्तितभेदे=
कीर्त्तितव्यक्तीनांतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकएवभेदोनिवेशनीयः एवंचदशकीर्त्तितयागस्थलेपरस्परंतत्तद्व्यक्तिभेदसत्वेनस्वर्गोत्पादवारणायभेदकूटस्यैवका दशकीर्त्तितयागव्यक्ति=
दशयागेषु= रणतावच्छेदकत्वमुपगंतव्यम् तत्रचविशेषणविशेष्यभावेविनिगमनाविरहेणकार्यकारणभावानंत्यमदृष्टस्वीकारेतत्क्षणकतयाकीर्त्तितयागानांमेलनासंभवेनभे
दानामेकत्रनिवेशेप्रयोजनाभावः यादृशकीर्त्तितयागादृष्टमापादनीयंतद्भेदावच्छिन्नयागव्यक्तेस्तदानीमभावात् नचादृष्टसंबंधेनकीर्त्तितयागव्यक्तीनांमेलनसंभवे अदृष्टोत्पादसमये=
नस्वर्गजनकतावच्छेदककोटौकीर्त्तितभेदानामेकत्रनिवेशआवश्यकइतिवाच्यम् अदृष्टानुत्पत्त्यैवास्वर्गसंभवेस्वर्गजनकतावच्छेदककोटौकीर्त्तितभेदानामनिवेशा
त् कीर्त्तितयागात्ध्वंसोत्पादेनध्वंसजनकतावच्छेदककोटौकीर्त्तितभेदनिवेशस्यासंभवादित्यन्यैरपरिशीलितःपंथा कारणत्वइति घटकत्वंसप्तम्यर्थः एवमग्रेपि
कार्यकालवृत्तित्वमेवेति यथासमवायिकारणस्यकारणत्वेकार्यकालवृत्तित्वंघटकंनत्वसमवायिकारणस्यकारणत्वेतथेत्यर्थः तेन कर्मनाशाजलस्पर्शादिना

स्वध्वंससंबंध प्रतिबंधकता तेन यागस्य २

जलस्पर्श=२

तस्य यागादेः पूर्वम् कर्मनाशाजलस्पर्शादितः पूर्वम् नष्टत्वादिति नश्यत्वादित्यर्थः योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नगुणनाश्यत्वादिच्छात्मकयागस्य तृतीयक्षण
एव नष्टत्वादिति भावः एवमग्रेपि धर्मः क्षरतीत्यस्य धर्मो यागादिः क्षरति फलभाक् भवतीत्यर्थकतया कर्मनाशाजलस्पर्शादेः स्वध्वंससंबंधेन स्वर्गादिफलं प्रति प्रतिबंधकत्व
मेव युक्तमिति न सत् एकाश्वमेधानंतरमश्वमेधः कृत इति कीर्तनेन तदनंतरं पुनरश्वमेधकरणेपि स्वर्गानुदयापत्तेः नच तदश्वमेधजन्यस्वर्गत्वावच्छिन्नं प्रति तत्कीर्तनत्वेन प्रतिबंध
कत्वान्नाश्वमेधांतरात्स्वर्गानुदयप्रसंग (गी) इति वाच्यम् यदश्वमेधस्य कीर्तनं कृतं तदश्वमेधजन्यस्वर्गाप्रसिद्ध्या तादृशप्रतिबध्यप्रतिबंधकभावस्य कल्पयितुमशक्यत्वात् तथा
पूर्वं दर्शपूर्णमासयोर्द्विविधं परमापूर्वं कलिकापूर्वं चेति तथाहि यदाग्नेयोष्टाकपालोमावास्यायां पौर्णमास्यां चाच्युतो भवति उपांशुयाजमंतरा यजति ताभ्यामेतमग्नी
षोमीयमेकादशकपालं पूर्णमासे प्रायच्छत् ऐंद्रं दधमावास्याम् ऐंद्रं पयोमावास्यायामिति पंचभिर्वाक्यैर्विहितेभ्यः षड्भ्यः आग्नेयादिभ्यः षडुत्पन्नान्यपूर्वाणि तान्येव क
लिकापूर्वाण्युच्यंते तेभ्यश्च परमापूर्वमिति ननु षडपूर्वाण्यावश्यकानि सा तैरेव स्वर्गहेतवः संतु किं परमापूर्वेणेति चेन्न दर्शपूर्णमासाभ्यां यजेतेत्यनेनोभयत्वावच्छिन्न
स्य स्वर्गसाधनत्वावगमात् उभयत्वावच्छिन्नस्यैकव्यापारकल्पनात् उत्पन्नापूर्वाणां चोभयत्वावच्छिन्नाजन्यत्वात् दर्शपूर्णमासाभ्यामिति विधिप्रवृत्तिसमये चिरविनष्टस्य दर्श
पूर्णमासस्य व्यापारतयैकस्याप्यपूर्वस्य कल्पनाच्च नचैवमनंतरं षण्णां यागानां क्रमिकत्वज्ञाने षडपूर्वकल्पनागौरवं तस्य फलमुखत्वात् नच पंचभिः पंचापूर्वद्वारा षट्केन च सा
क्षादेव परमापूर्वजन्यतामिति किं षट्केन कलिकापूर्वेणेति वाच्यम् षट्केनाप्युत्तरांगदक्षिणासहकारेणैव परमापूर्वजननात्तावत्कालं षट्कस्य यागस्यानवस्थित्यात्तज्जन्यापूर्वस्या
वश्यकत्वात् अत्र परमापूर्वं प्रति स्वर्गं प्रति च दर्शत्वपूर्णमासत्वव्यापकेन दर्शपूर्णमासोभयसाधारणेन वैजात्येन कारणत्वमित्येके दर्शत्वेन पूर्णमासत्वेन च कारणत्वं
दंडचक्रवन्मिलितानां फलोपधानमित्यपरे अत्र त्रयात्मकदर्शस्य जन्यमपूर्वमेकं कलिकापूर्वत्रयव्यापारकम् एवं त्रयात्मकपूर्णमासजन्यमपूर्वमेकमपूर्वं कलि
कापूर्वत्रयव्यापारकं ताभ्यां स्वर्गजनकापूर्वोत्पत्तिस्तच्च परमापूर्वं फलशिरस्कापूर्वमित्युच्यत इति नवापूर्वीपक्ष इत्येके तत्रैव फलशिरस्कापूर्वे मानाभावात् दशापूर्वीत्यन्ये
कलिकापूर्वषट्केनैव परमापूर्वसंभवात् व्यापारीभूतापूर्वद्वये मानाभावात् सप्तापूर्व्येव युक्तेति नव्याः इदं चापूर्वं ज्ञानेच्छावत् यज्ञादौ कर्तुर्निष्ठमुत्पद्यत इत्येके भोक्तृ
निष्ठमिति तत्संप्रदायः प्राभाकरास्तु यागक्रिया सर्वात्मना नैव नश्यति किंतु सूक्ष्मरूपेण स्वर्गदेहारंभकेषु यागसंबंधिद्रव्यारंभकेषु यागकर्तर्यात्मनि वा व्यवस्थाय फल
मारभत इत्याहुः तन्न ज्ञानेच्छादिरूपस्य यागस्यात्मनो योग्यविभुविशेषगुणतया त्रिक्षणचतुःक्षणानवस्थायित्वनियमात् ज्ञानेच्छादीनां स्वानंतरभवेन समानाधिकरण
स्वोत्तरवर्तिगुणनाश्यत्वस्वीकारात् अन्यथैवं रीत्या जगत एव सूक्ष्मरूपतया सर्वदावस्थानप्रसंगादित्यलं विस्तरेण ननु गंगादिदर्शनादिना ईश्वरे कुतो न धर्मादेरुत्प
त्तिरत आह मलेदमोतवासनाजन्याविति ईश्वरे मिथ्याज्ञानजन्यवासनाविरहान्न धर्मादेरुत्पत्तिरिति भावः ननु धर्माधर्मौ प्रति वासनाया हेतुत्वे मानाभाव इत्यत आ

६२१

इममुक्तावल्यामत एवेति ज्ञानिना तत्त्वज्ञानवता वचनविरोधादिति तेनाऽदृष्टनाशमात्रे भोगस्य हेतुत्वप्रतिपादनादिति भावः इत्थं चेति कर्मणां भोगैकनाश्यत्वे चेत्यर्थः
था उपलक्षकत्वाभावे सर्वकर्माणीति सर्वकर्मजन्यादृष्टानीत्यर्थः भस्मसात्कुरुते नाशयति स्मृतिदर्शयित्वाकृतिं दर्शयति क्षीयन्ते चेति तदभिप्रायमेव प्रा
भिप्रायमेव इत्यत्र ग्रं गौरवादिति इत्यादृष्टानां तत्प्रागभावानां तद्धेतुमज्ञानानां च गौरवमित्यर्थः उक्तप्रतीतिविरोधादिति उत्पादविनाशशालिप्रत्ययविरोधादि
र्थः इत्थं चेति प्रत्यभिज्ञानस्य सजातीयविषयत्वे चेत्यर्थः द्वयोरपीति उत्पादप्रतीतिप्रत्यभिज्ञानयोरित्यर्थः अत्र मीमांसकाः स एवायं गकार इति प्रत्यभिज्ञया गकार
स्तावत्कालावस्थानस्य विषयीकृतत्वेनान्तराभूतशब्दादिनाऽनाशेनाऽनाशकाभावाद्वर्णनित्यत्वसिद्धिः न च प्रत्यभिज्ञानं सजातीयत्वविषयिणी बाधकाभावात् अन्य
उपेदाभावे= सर्वत्रापि तथाभावेऽभेदोच्छेदापत्तिः न च तारत्वमन्दत्वरूपविरुद्धधर्माध्यासो बाधकः प्रत्यभिज्ञानबलेन तस्य नित्यत्वसिद्धौ तारत्वादेर्व्यञ्जकवायुधर्मत्वस्य कल्पनात्
णवायुधर्मस्य तारत्वादेरपि ग्रहासम्भवात् य एव तारः स एवान्यापेक्षया मन्द इति प्रतीतेस्तारत्वमन्दत्वयोरविरोधाच्चेत्याहुस्तन्न तथा सति कत्वगत्वादेरपि व्यञ्जकवायुधर्मत्वा
पत्त्या ककारगकारयोरपि भेदो न सिद्ध्येदिति वर्णैक्यापत्तेः वस्तुतस्तु वर्णनित्यत्वपक्षे कण्ठताल्वाद्यभिघातानां कत्वादिकं कार्यतावच्छेदकं वर्णनित्यतापक्षे तु ककारासा
कारत्वमिति गौरवात् न च नित्यत्वमतेऽपि लौकिकविषयितया कत्वमेव जन्यतावच्छेदकमिति न गौरवावकाश इति वाच्यम् कोलाहलप्रत्यक्षस्यासङ्ग्रहप्रसङ्गात् नहि
कोलाहलप्रत्यक्षं कत्वादिविषयकमन्यथा तुल्ययुक्त्या घटादिकस्यापि घटप्रत्यक्षत्वमेव कार्यतावच्छेदकमिति तदपि नित्यमेव स्यादिति न चानित्यत्वमते प्रत्यभिज्ञा
यास्तज्जातीयत्वविषयत्वेन तज्जातीयोऽयमिति स्यान्न तु सोऽयमितीति वाच्यम् यत्र प्रत्यभिज्ञायां जातित्वेन गत्वादेर्भानं तत्रैव तज्जातीयोऽयमित्याकारः यत्र तु स्वरूपतो भानं तत्र
सोऽयमित्याकार इत्यभ्युपगमादिति अत्रेदं बोध्यम् शब्दो द्विविधः ध्वन्यात्मको वर्णात्मकश्च तत्र ध्वन्यात्मकसंयोगजन्याद्यशब्दं प्रति गगनं समवायिकारणं भेर्याकाशसंयो
गोऽसमवायिकारणं भेरीदण्डसंयोगादिर्निमित्तकारणम् विभागजन्यध्वन्यात्मकाद्यशब्दं प्रति तु वंशदलाकाशविभागोऽसमवायिकारणं वंशदलद्वयविभागो निमित्तकारण
म् वर्णात्मकाद्यशब्दं प्रति कण्ठताल्वादिनाकाशसंयोगोऽसमवायिकारणं कण्ठताल्वादिना वाय्वादिसंयोगो निमित्तकारणम् वर्णात्मकद्वितीयादिशब्दं प्रति आद्यशब्दोऽस
मवायिकारणम् न च भेर्याकाशसंयोगकण्ठताल्वाद्यसंयोगादीनां शब्दं प्रति कारणत्वे मानाभाव इति वाच्यम् भावकार्यस्यासमवायिकारणजन्यत्वनियमेन तत्कारणत्वस्वीकार
ात् तादृशनियमे मानाभावे तु मास्तु तेषां कारणत्वं भेरीदण्डसंयोगादिनिमित्तकारणसहकृतेनाकाशेनैव शब्दोत्पत्तिसम्भवादिति प्रथमादिशब्दानां च स्वकार्यशब्देनैव नाशः
चरमस्योपान्त्यशब्देनोपान्त्यशब्देन वा नाश इति मूले तद्वैवौषधमित्यादावित्यादिना सेवेयं दीपकलिकेत्यादिपरिग्रहः ननु तत्रापि व्यक्त्यभेद एव विषयोऽस्तु तेनाभावार्थप्रकाशय
ति यद्दौषधं मयाकृतमित्यादिना अत्र च स्वकर्तृकत्वस्वभिन्नकर्तृकत्वरूपविरुद्धधर्माध्यासाहितभेदप्रत्ययस्य प्रतिबन्धकस्य सत्त्वान्न व्यक्त्यभेदो विषयः किं तु तत्सजातीय

62

संर्धससंवधनकीर्तितयागस्य
प्रतिवंधकत्वात्=३

न्या॰ मु॰ टी॰
६२

तस्य यागादेः पूर्वम् कर्मनाशाजलस्पर्शादितः पूर्वम् उत्पन्नत्वादिति नष्टत्वादित्यर्थः योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नगुणनाश्यत्वादिच्छात्मकयागस्य तृतीयक्षण
एव नष्टत्वादिति भावः एवमग्रेपि धर्मः क्षरतीत्यस्य धर्मो यागादिः क्षरति फलभाग्भवतीत्यर्थकतया कर्मनाशाजलस्पर्शादेः स्वध्वंससंबंधेन स्वर्गादिफलं प्रति प्रतिबंधकत्व जलस्पर्श=२
मेव युक्तमिति न समत्र एकाश्वमेधानंतरमश्वमेधः कृत इति कीर्तनेन तदुत्तरं पुनरश्वमेधकरणेपि स्वर्गानुदयापत्तेः न च तदश्वमेधजन्यस्वर्गत्वावच्छिन्नं प्रति तत्कीर्तनत्वेन प्रतिबंध
कत्वान्नाश्वमेधांतरात्स्वर्गोदयप्रसंग इति वाच्यम् यदश्वमेधस्य कीर्तनं कृतं तदश्वमेधजन्यस्वर्गाप्रसिद्ध्या तादृशप्रतिबध्यप्रतिबंधकभावस्य कल्पयितुमशक्यत्वात् तथा
पूर्वं दर्शपूर्णमासयोर्हि विधिं परमापूर्वं कलिकापूर्वं चेति तथाहि यदाग्नेयोष्टाकपालोमावस्यायां पौर्णमास्यां चाच्युतो भवति उपांशुयाजमंतरा यजति ताभ्यामेतमग्नी
षोमीयमेकादशकपालं पूर्णमासे प्रायच्छत् ऐंद्रं दध्यमावास्याम् ऐंद्रं पयोमावास्यायामिति पंचभिर्वाक्यैर्विहितेभ्यः षड्भ्य आग्नेयादिभ्यः षडुत्पन्नान्यपूर्वाणि तान्येव क
लिकापूर्वाण्युच्यंते तेभ्यश्च परमापूर्वमिति ननु षडपूर्वाण्यावश्यकानि साक्षादेव स्वर्गहेतवः संतु किं परमापूर्वेणेति चेन्न दर्शपूर्णमासाभ्यां यजेतेत्यनेनोभयत्वावच्छिन्ना
स्य स्वर्गसाधनत्वावगमादुभयत्वावच्छिन्नस्यैकव्यापारकल्पनादुत्पत्त्यपूर्वाणां चोभयत्वावच्छिन्नाजन्यत्वात् दर्शपूर्णमासाभ्यामिति विधिप्रवृत्तिसमये चिरविनष्टस्य दर्श
पूर्णमासस्य व्यापारतयैकस्य वापूर्वस्य कल्पनाच्च न चैवमनंतरं षण्णां यागानां क्रमिकत्वज्ञाने षडपूर्वकल्पनागौरवं तस्य फलमुखत्वात् न च पंचभिः पंचापूर्वद्वारा षष्ठेन चसा
क्षादेव परमापूर्वजन्यतामिति किं षष्ठेन कलिकापूर्वेणेति वाच्यम् षष्ठेनाप्युत्तरांगरक्षिणा सहकारेणैव परमापूर्वजननात्तावत्कालं षष्ठस्य यागस्यानवस्थितत्वात् जन्यापूर्वा
स्यावश्यकत्वात् अत्र परमापूर्वं प्रति स्वर्गं प्रति च दर्शत्व पूर्णमासत्वव्यापकेन दर्शपूर्णमासोभयसाधारणवैजात्येन कारणत्वमित्येके दर्शत्वेन पूर्णमासत्वेन च कारणत्वं
द्वंद्वचकुवन्निमिलितानां फलोपधानमित्यपरे अत्र त्र्यात्मकदर्शस्य जन्यमपूर्वमेकं कलिकापूर्वत्रयव्यापारकम् एवं त्र्यात्मकपूर्णमासजन्यमपूर्वमेकमपूर्वं कलि
कापूर्वत्रयव्यापारकं ताभ्यां स्वर्गजनकापूर्वोत्पत्तिरतश्च परमापूर्वफलशिरस्कापूर्वमित्युच्यत इति न वापूर्वापत्तिरित्येके तत्रैव फलशिरस्कापूर्वे मानाभावादृशापूर्वोत्पत्त्ये
कलिकापूर्वषट्केनैव परमापूर्वसंभवाद्व्यापारीभूतापूर्वद्वये मानाभावात् पूर्वोक्तात्सप्तापूर्व्येव युक्तेति नव्याः इदं चापूर्वं जाते श्येनिपितृयज्ञादौ कर्तृनिष्ठमुत्पद्यते इत्येके भोक्तृ
निष्ठमिति तु संप्रदायः प्राभाकरास्तु यागक्रिया सर्वात्मना नैव नश्यति किं तु सूक्ष्मरूपेण स्वर्गदेहारंभकेषु यागसंबंधिद्रव्यारंभकेषु योगकर्तृयोत्मनिवार्यव्यवस्थायफल
मारभत इत्याहुः तन्न ज्ञानेच्छादिरूपस्य यागस्यात्मनो योग्यविभुविशेषगुणतया क्षणचतुष्टयानवस्थायित्वनियमात् ज्ञानेच्छादीनां सदानुभवेन समानाधिकरण
स्वोत्तरवर्तिगुणनाश्यत्वस्वीकारात् अन्यथैवं रीत्या जगत एव सूक्ष्मरूपतया सर्वदावस्थानप्रसंगादित्यलं विस्तरेण ननु गंगादिदर्शनादिना ईश्वरे कुतो न धर्मादेरुत्प
त्तिरत आह सत्येर्दमोतुवासनाजन्याविति ईश्वरे मिथ्याज्ञानजन्यवासनाविरहान्न धर्मादेरुत्पत्तिरिति भावः ननु धर्माधर्मप्रतिवासना याहेतुत्वे मानाभाव इत्यत आ

हमुक्तावल्यामत इति ज्ञानिना तत्त्वज्ञानवता वचनविरोधादिति तेनादृष्टनाशमात्रे भोगस्य हेतुत्वप्रतिपादनादिति भावः इत्थं चेति कर्मणां भोगैकनाश्यत्वे चेत्यर्थः
था उपलक्षकत्वाभावे सर्वकर्माणीति सर्वकर्मजन्यादृष्टानीत्यर्थः भस्मसात्कुरुते नाशयति स्मृतिर्दर्शयित्वाकृतिर्दर्शयति क्षीयन्ते चेति तदभिप्रायमेव प्राग
62A भिप्रायमेव [illegible] गौरवादिति दृश्यशब्दानां तत्प्रागभावानां तद्धेतुहेतुमद्भावानां च गौरवमित्यर्थः उक्तप्रतीतिविरोधादिति उत्पादविनाशशालिप्रत्ययविरोधा
र्थः इत्थं चेति प्रत्यभिज्ञानस्य सजातीयविषयत्वे चेत्यर्थः द्वयोरपीति उत्पादप्रतीतिप्रत्यभिज्ञानयोरित्यर्थः अत्र मीमांसकाः स एवायं गकार इति प्रत्यभिज्ञया गका
स्तावत्कालावस्थानस्य विषयीकृतत्वेनांतराभूतयाद्यादिनाशेनानाशकाभावाद्वर्णनित्यत्वसिद्धिः न च प्रत्यभिज्ञानज्जातीयत्वविषयिणी बाधकाभावात् अन्य
प्रभेदाभावे= सर्वत्रापि तथाभावे भेदोच्छेदापत्तिः न च तारत्वमंदत्वरूपविरुद्धधर्माध्यासो बाधकः प्रत्यभिज्ञानबलेन तस्य नित्यत्वसिद्धौ तारत्वादेर्व्यंजकवायुधर्मत्वस्य कल्पनात् अ
णवायुधर्मस्य तारत्वादेरपि ग्रहणासंभवात् य एव तारः स एवान्यापेक्षया मंद इति प्रतीतेस्तारत्वमंदत्वयोरविरोधाच्चेत्याहुस्तन्न तस्यासतिकत्वगत्वादेरपि व्यंजकवायुधर्मत्वा
पत्त्या ककारगकारयोरपि भेदो न सिद्ध्येदिति वर्णैक्यापत्तेः वस्तुतस्तु वर्णनित्यत्वपक्षे कंठताल्वाद्यभिघातानां कत्वादिकं कार्यतावच्छेदकं वर्णानित्यतापक्षे तु कत्वा
कारत्वमिति गौरवात् न च नित्यत्वमतेपि लौकिकविषयितयाकत्वमेव तज्ज्ञानजन्यतावच्छेदकमिति न गौरवावकाश इति वाच्यम् कोलाहलप्रत्यक्षस्यासंग्रहप्रसंगात् नहि
कोलाहलप्रत्यक्षं कत्वादिविषयकमन्यथा तुल्ययुक्त्या घटादिप्रत्यक्षस्यापि घटप्रत्यक्षत्वमेव कार्यतावच्छेदकमिति तदपि नित्यमेव स्यादिति न चानित्यत्वमते प्रत्यभिज्ञा
यास्तज्जातीयत्वविषयत्वेन तज्जातीयोयमिति स्यान्न तु सोयमितीति वाच्यम् यत्र प्रत्यभिज्ञायां जातित्वेन गत्वादेर्भानं तत्रैव तज्जातीयोयमित्याकारः यत्र तु स्वरूपतो भानं तत्र
सोयमित्याकार इत्यभ्युपगमादिति अत्रेदं बोध्यम् शब्दो द्विविधः ध्वन्यात्मको वर्णात्मकश्च तत्र ध्वन्यात्मकसंयोगजन्याद्यशब्दं प्रति गगनं समवायिकारणं भेर्याकाशसंयो
गोऽसमवायिकारणं भेरीदंडसंयोगादिर्निमित्तकारणम् विभागजन्यध्वन्यात्मकाद्यशब्दं प्रति तु वंशदलाकाशविभागोऽसमवायिकारणं वंशदलद्वयविभागो निमित्तकारण
म् वर्णात्मकाद्यशब्दं प्रति कण्ठताल्वादिनाकाशसंयोगोऽसमवायिकारणं कंठताल्वादिना वाय्वादिसंयोगो निमित्तकारणम् वर्णात्मकद्वितीयादिशब्दं प्रति आद्यशब्दोऽस
मवायिकारणम् न च भेर्याकाशसंयोगकंठताल्वाद्यसंयोगादीनां शब्दं प्रति कारणत्वे मानाभाव इति वाच्यम् भावकार्यस्यासमवायिकारणजन्यत्वनियमेन तत्कारणत्वस्वीका
रात् तादृशनियमे मानाभावे तु मास्तु तेषां कारणत्वं भेरीदंडसंयोगादिनिमित्तकारणसहकृतेनाकाशेनैव शब्दोत्पत्तिसंभवादिति प्रथमादिशब्दानां च स्वकार्यशब्देनैव नाशः
चरमस्य तूपान्त्यशब्देनोपान्त्यशब्देन वा नाश इति मल्लेतदेवौषधमित्यादावित्यादिना सैवेयं दीपकलिकेत्यादिपरिग्रहः नन्वत्रापि व्यक्त्यभेद एव विषयोस्तु तोभावार्थं प्रकाशय
ति यदौषधं मया कृतमित्यादिना अत्र च स्वकर्तृकत्वस्वभिन्नकर्तृकत्वरूपविरुद्धधर्माध्यासाहितभेदप्रत्ययस्य प्रतिबंधकस्य सत्त्वान्न व्यक्त्यभेदो विषयः किं तु तत्सजातीयः

मु॰ टी॰ ६२

भेदोविषयइतिभावः॥ इतिश्री ग्रंथः॥ भानुंप्रणम्यपरिभाव्यचशास्त्रसारं मुक्तावलीकिरणएषवितत्प्रदिष्टः सद्युक्तिभिर्दिनकरेणकरेणसोयंनीतःप्रकाशपदवींसु
धियांमुदेस्तु १ मुक्तावलीप्रकाशोयमज्ञानतिमिरापहः तेनसंतोषमायातुनीलकंठःसतांप्रियः २॥ ॥इतिश्रीमद्दिनकरभट्टविरचितोमुक्तावली
प्रकाशःसमाप्तः॥ ॥संवत् १८ ५०॥ ॥

1850

Muktavali

1850

Diwakar

331

६२